सामाजिकविज्ञानम्

सामाजिक-राजनैतिक-जीवनम् - १

षष्ठकक्ष्यायै पाठ्यपुस्तकम्

सामाजिक-विज्ञानम्

सामाजिकराजनैतिकजीवनम्-१

षष्ठकक्ष्यायै पाठ्यपुस्तकम्

विद्यया ऽमृतमश्नुते

एन सी ई आर टी
NCERT

राष्ट्रिय-शैक्षिकानुसन्धान-प्रशिक्षण-परिषद्
NATIONAL COUNCIL OF EDUCATIONL RESEARCH AND TRAINING

दिसम्बरमासः 2015 इत्यस्मात् संस्करणात्
अस्माभिः संस्कृतानुवादः कृतः ।

आमुखम्

राष्ट्रिय-पाठ्यचर्यायाः रूपरेखा (2005) ज्ञापयति यत् बालकानां विद्यालयीयं जीवनं बाह्य-जीवनेन सह योजनीयम् । अयं सिद्धान्तः पुस्तकीय-ज्ञानस्य तस्मात् न्यासाद् विपरीतः अस्ति यस्य प्रभाववशात् अस्माकं व्यवस्था अद्यावधि विद्यालयस्य गृहस्य च मध्ये अन्तरालं विरचितवती अस्ति । नूतन-राष्ट्रिय-पाठ्यचर्याधारिताः पाठ्यक्रमाः पाठ्यपुस्तकानि च एतम् आधारभूतविचारं क्रियान्वयितुम् एकः प्रयासः अस्ति । एतस्मिन् प्रयासे प्रत्येकं विषयस्य दृढभित्त्या आवरणस्य अथ च सूचना-संस्मारणस्य प्रवृतेः विरोधः समाविष्टः अस्ति । आशासे यत् एते प्रयासाः अस्मान् राष्ट्रिय-शिक्षा-नीतौ (1986) वर्णितायाः बालकेन्द्रित-व्यवस्थायाः दिशि सुदूरं नेष्यन्ति ।

एतस्य प्रयत्नस्य साफल्यम् अधुना एतस्मिन् तथ्ये आश्रितम् अस्ति यत् विद्यालयानाम् आचार्याः अध्यापकाः च बालकेभ्यः कल्पनाशील-गतिविधीनां प्रश्नानां च साहाय्येन शिक्षणाधिगमसमये स्वीयेषु अनुभवेषु चिन्तनं कर्तुम् कियतः अवसरान् प्रददति । अस्माभिः एतत् मन्तव्यं यत् यदि समयं स्थानं स्वतन्त्रतां च बालकेभ्यः प्रयच्छामः तर्हि बालकाः ज्येष्ठैः समर्पितया सूचना-सामग्र्या सह युक्त्वा सङ्घर्षं च कृत्वा नूतन-ज्ञानस्य सर्जनं कुर्वन्ति । शिक्षायाः विविधानां साधनानाम् एवञ्च स्रोतसाम् अवहेलनस्य प्रमुखं कारणं पाठ्यपुस्तकस्य परीक्षायाः एकमात्रम् आधारत्वेन निर्माणस्य प्रवृत्तिः अस्ति । सर्जनस्य प्रारम्भस्य च विकासार्थम् आवश्यकम् अस्ति यत् वयं बालकान् शिक्षणस्य प्रक्रियायां पूर्ण-सहभागित्वेन अङ्गीकुर्मः तथा च तेषां सहभागितां सुनिश्चिनवाम, ते बालकाः ज्ञानस्य निर्धारित-मात्रायाः ग्राहकाः सन्ति इति चिन्तनं त्यक्तव्यम् ।

एतानि उद्देश्यानि विद्यालयस्य दैनिक-जीवने कार्यशैल्यां च भृशं परिवर्तनं याचन्ते । दैनन्दिन्यां समय-सारण्यां परिवर्तनशीलत्वं (लचीलापन) तावदेव आवश्यकम् अस्ति यावत् वार्षिक-कालन्धरस्य क्रियान्वयने जागरुकता, येन शिक्षणार्थं नियत-दिनानां सङ्ख्या वास्तविकं रूपं स्वीकुर्यात् । शिक्षण-मूल्याङ्कनयोः विधयः अपि एनं विषयं निश्चेष्यन्ति यत् इदं पाठ्यपुस्तकं विद्यालये बालानां जीवनेभ्यः मानसिकोद्वेगस्य खिन्नतायाः च स्थाने हर्षं प्रदातुं कियत् प्रभावि सिध्यति । भारस्य समस्यायाः समाधानार्थं पाठ्यक्रम-निर्मातृभिः विभिन्नेषु चरणेषु ज्ञानस्य पुनर्निर्धारण-समये बालानां मनोविज्ञानाय एवञ्च अध्यापनाय उपलब्ध-समयस्य ध्यानं दातुं पूर्वापेक्षया अधिकः सचेष्टः प्रयत्नः कृतः अस्ति । एषः प्रयासः इतोऽपि गभीरतया स्यात् इति प्रयत्ने इदं पाठ्यपुस्तकं चिन्तनाय, विस्मयाय , लघुसमूहेषु वार्तालापाय तर्काय एवं च चर्चायै तथा च हस्ताभ्यां क्रियमाणेभ्यः गतिविधिभ्यः प्राथमिकतां प्रयच्छति ।

राष्ट्रिय-शैक्षिकानुसन्धान-प्रशिक्षण-परिषद् एतस्य पुस्तकस्य रचनायै निर्मितायाः पाठ्यपुस्तक-निर्माण-समितेः परिश्रमस्य कृते कार्तज्ञ्यं प्रकटीकरोति । परिषद् सामाजिक-विज्ञान-पाठ्यपुस्तकस्य परामर्शदातृ-समितेः अध्यक्षं आचार्यहरि-वासुदेवन्-महोदयं प्रति तथा च एतस्याः पाठ्यपुस्तक-समितेः मुख्य-परामर्शदात्रीं विभापार्थसारथीमहोदयां प्रति विशेषरूपेण आभारं प्रकटयति । एतस्य पाठ्यपुस्तकस्य वर्धने बहुभिः शिक्षकैः योगदानं कृतम् । एतद् योगदानं सफलीकर्तुं वयं तेषां प्राचार्याणाम् अपि अभारिणः स्मः । वयं तानि सर्वाणि सङ्घटनानि संस्थाः च प्रति कृतज्ञाः स्मः यैः स्वीय-सामग्रीणां संसाधनानाम् एवं च सहयोगिनां साहाय्यस्य स्वीकरणे औदार्यपूर्वकं सहयोगः कृतः । वयं माध्यमिकोच्चशिक्षा-विभाग-मानव-संसाधन-विकास-मन्त्रालय-द्वारा नियुक्तस्य आचार्यमृणाल-मीरीमहोदयस्य एवं आचार्यजी.पी.देशपाण्डे-महोदयस्य आध्यक्ष्ये निर्मितायाः निरीक्षण-समितेः तान् सदस्यान् प्रति धन्यवादवचांसि व्यवहरामः ये स्वकीयं मूल्यवन्तं समयं सहयोगं च दत्तवन्तः । व्यवस्थागत-संस्करणेषु स्वीय-प्रकाशनेषु च नैरन्तर्येण परिष्काराय समर्पिता परिषद् टिप्पणीः परामर्शान् च स्वागतीकरिष्यति येन भाविसंशोधनेषु साहाय्यं स्वीकर्तुं शक्येत् ।

निदेशकः
राष्ट्रियशैक्षिकानुसन्धान-प्रशिक्षणपरिषद्

नवदेहली
२० दिसम्बरः २००५

पाठ्यपुस्तकनिर्माणसमितिः

अध्यक्षः, सामाजिकविज्ञानपाठ्यपुस्तक-परामर्शदातृ-समितिः

हरीवासुदेवनः, प्रोफेसरः, इतिहासविभागः, कलकत्ताविश्वविद्यालयः, कोलकाता।

मुख्यपरामर्शदाता

शारदाबालगोपालनः, सेंटरफार द स्टडी आफ डेवलपिंग सोसाइटीज, राजपुररोड, नवदेहली।

सदस्याः

अजंलिनरोना, एकलव्य-शैक्षिकशोध-नवाचार-संस्थानम्,मध्यप्रदेशः।

अरविंदसरदाना, एकलव्यशैक्षिकशोध-नवाचार-संस्थानम्, मध्यप्रदेशः।

दिप्ताभोगः, निरन्तर-सेंटर फार जेंडर एवं शिक्षासंदर्भसमूहः, सर्वोदय-इन्कलेव-नवदेहली।

जयासिंहः, प्रवक्ता, डी.ई.एस.एच, एन.सी.ई.आर.टी

कृष्णामेननः, रीडर,लेडी-श्रीराम-कालेज, दिल्लीविश्वविद्यालयः, दिल्ली।

लतिकागुप्ता,परामर्शदात्री,डी.ई.ई.,एन.सी.ई.आर.टी।

मोहनदेशपाण्डे, समन्वयकः, आभा (आरोग्यमान), पुणे।

एम.वी.श्रीनिवासनः, प्रवक्ता, डी.ई.एस.एस.एच.एन.सी.ई.आर.टी।

संजयदुबे, रीडर, डी.ई.एस.एस.एच., एन, सी.ई.आर.टी।

शोभा वाजपेयी, शासकीयमाध्यमिकविद्यालयः, उडा.जनपदं हरदा.मध्यप्रदेशः।

स्वातिवर्मा, हेरिटेजस्कूल, रोहिणी, दिल्ली।

सदस्यः समन्वयकः च

डब्ल्यू.थेमीचोनरेमसनः, प्रवक्ता, एन.सी.ई.आर.टी, नवदेहली।

भारतीय-संविधानम्

उद्देशिका

वयं भारतीयाः, भारतदेशम् एकं [1][**सम्पूर्ण-प्रभुत्व-सम्पन्नम्, समाजवादि, पंथ-निरपेक्षम्, लोकतन्त्रात्मक-गणराज्यं]** निर्मातुं तथा च तस्य समस्तनागराणां कृते;

सामाजिकम् आर्थिकं तथा च राजनैतिकं न्यायम्, विचारस्य, अभिव्यक्तेः, विश्वासस्य, धर्मस्य,

उपासनायाः च स्वतन्त्रताम्,

प्रतिष्ठायायाः अवसरस्य च समतां

प्रापयितुं

तथा च तेषु **सर्वेषु** मानवीयगौरवस्य तथा च [2][**राष्ट्रियैकतायाः अखण्डतायाश्च] सुनिश्चयकर्त्री** बन्धुतां संवर्धयितुं.....

दृढसंकल्पाः भूत्वा **अस्यां स्वसंविधानसभायाम्** अद्य नवम्बरमासस्य 26 तमे दिनाङ्के1949 तमे ख्रीस्ताब्दे (मार्गशीर्षे शुक्लसप्तम्यां 2006 तमे विक्रमसंवत्सरे) **एतत् संविधानम् अङ्गीकुर्मः अधिनियमितं तथा च आत्मार्पितं कुर्मः।**

1. संविधानाधिनियमः (द्वाचत्वारिंशं संशोधनम्) 1976 इत्यस्य द्वितीय-धारायाः द्वारा (3.1.1977 तः) "प्रभुत्व-सम्पन्नलोकतन्त्रात्मक-गणराज्यम्" इत्यस्य स्थाने प्रतिस्थापितम्।

2. संविधानाधिनियमः (द्वाचत्वारिंशं संशोधनम्) 1976 इत्यस्य द्वितीय-धारायाः द्वारा (3.1.1977 तः) "राष्ट्रस्य एकताः" इत्यस्य स्थाने प्रतिस्थापितम्।

आभारः

इदं पाठ्यपुस्तकं केवलं लेखकसमूहस्य प्रयासानां परिणामः नास्ति। पुस्तकनिर्माणस्य क्रमे अस्माकं सहकर्मिणः मित्राणि च पृथक्-पृथक्-प्रकारेण स्वस्य समयं सहयोगं च दत्तवन्तः। अस्माकम् आन्तरिक-समीक्षा-समितेः सदस्यरूपेण मेरी-जॉनः एस.मोहिन्दरः,आदित्यनिगमः तथा च सी.एन.सुब्रह्मण्यमः यथाकालं स्वस्य महत्त्वपूर्णैः परामर्शैः अस्माकं मार्गदर्शनं कृतवन्तः। सार्धमेव सौलीबेंजामिनः राजीवभार्गवः साराजोसफः अनुगुप्ता प्रभुमहापात्रः फराहनकवी अवधेन्द्रशरणः सुजीतसिन्हा भूपेन्द्रयादवः तथा च योगेन्द्रयादवः पृथक्-पृथक्-पाठेषु स्वटिप्पणीं प्रदत्तवन्तः।एलेक्स-एम.जार्जः एकस्मिन् पाठे विशेषेण परामर्शदानाद् आरभ्य स्रोतसामग्र्याः अन्वेषणे च सक्रियभूमिकां निर्वोढवान्। केशवदासः एकस्मिन् पाठे विशेषरूपेण योगदानं कृतवान्। सुमंगलादासः अस्माकं कृते इप्टायाः गीतस्य उपलब्धिं कारितवती यस्य प्रयोगं वयं स्वस्य प्रथमे पाठे कृतवन्तः। बेनः अस्माकं कृते नागालैंडस्य चिमाजीग्रामे तण्डुलस्य कृषेः विषये सूचनां दत्तवान्। एतदतिरिच्य वयं विशेषरूपेण उर्वशीबुटालियां प्रति आभारं व्यक्तीकुर्मः यस्याः पार्श्वे न्यूनः कालः आसीत् पुनरपि सा आङ्गलसंस्करणस्य सम्पादनं कर्तुं स्वीकृतवती। तया कृतसम्पादनस्य कारणतः पुस्तकस्य गुणवत्ता वर्धिता अस्ति।

अस्य पुस्तकस्य सम्पादने विषयवस्तुनः विषये च परामर्शं दातुं वयं विशेषेण पूर्वाभारद्वाजस्य कृते धन्यवादज्ञापनं कर्तुमिच्छामः। तस्याः कार्ये अरविन्दसरदाना शोभावाजपेई टुलटुलविश्वासः प्रकाशकान्तः तथा च सुप्रियापाठकः अपि पर्याप्तं सहयोगं कृतवन्तः। लतिकागुप्ता सर्वेषां पाठानां प्रारम्भिकमनुवादं कृतवती तथा च पश्चाद् अपि तेषाम् उपरि धैर्यपूर्वकं कार्यं कृतवती।

आर.के.लक्ष्मणः (दि-टाइम्स-ऑफ-इण्डिया) शीलाधीरः पोइली-सेन-गुप्ता तथा च अंजलि मांटेरियो स्वस्य रचनानाम् उपयोगं कर्तुम् अनुमतिं दत्तवन्तः। पेंङ्गुइन-तूलिके महाराष्ट्रसर्वकारः च अपि स्वप्रकाशनस्य उपयोगं कर्तुम् अनुमतिं दत्तवन्तः।

चित्राङ्कनस्य कार्ये ज्येष्ठैः सह बालकैः अपि सहयोगः प्रदत्तः। शासकीयमाध्यमिकविद्यालयः उडा जनपदं हरदायाः बालकाः अपि ग्रामे जायमानां कार्याणां विषये चित्राङ्कनं कृतवन्तः। तेषां चित्राणां कोलाज इत्येतेषां ग्रामीणक्षेत्रेषु आजीविकाम् अवबोधयितुं प्रयोगः कृतः अस्ति। अदितेः ऐश्वर्यायाः अनीशायाः स्वराल्याः मीनाक्ष्याः सहरस्य च चित्राणाम् उपयोगः एतस्मिन् पुस्तके कृतमस्ति। तेषु या विविधता अस्ति तस्याः माध्यमेन विविधतायाः अवधारणां ज्ञातुं साहाय्यं लब्धमस्ति।

चित्राङ्कनं मुख्यरूपेण विशाखाप्रकाशनस्य अस्ति। सः यया सूक्ष्मतया लग्नशीलतया च पाठानाम् आवश्यक्तायाः अनुरूपं चित्राङ्कनं कृतवान् ततः पुस्तकमेतन्नावीन्यम् उपगतम्। एतदर्थं सः धन्यवादार्हः अस्ति। प्रथमे पाठे समीरस्य कथायाः उपरि आधारितचित्रं शाश्वतीचौधरी रचितवती। वयं तस्याः आभारिणः स्मः।

पुस्तके प्रयुक्तानि अन्यानि सर्वाणि चित्राणि अस्मभ्यं डाउन-टू-अर्थेन तथा च हिन्दुस्तानटाइम्स इत्यनेन प्रदत्तानि। वयं विशेषेण आउटलुकसमूहं प्रति आभारिणः स्मः ये अस्माकम् आवश्यकताः प्रति बहुसंवेदनशीलाः आसन्। यैनब्रेमेनस्य पार्थिवशाहस्य च चित्राणामपि पुस्तके प्रयोगः कृतः अस्ति। मृत्युंजयचटर्जी प्रारम्भे अस्माकं कृते पाठानां सज्जायाः आवरणस्य च विषये महत्त्वपूर्णान् परामर्शान् दत्तवान् तथा च सोहनपालेन स्वसमस्तक्षमतया कौशलेन अपि च समर्पणेन सह एतस्य पुस्तकस्य कृते अन्तिमं स्वरूपं दत्तवान् यस्मात् कारणात् लेखकसमूहस्य अजस्रपरिश्रमः अस्मिन्

रूपेण पुरतः आगतः । अरविंदसरदाना इत्यस्य दिप्ताभोगस्य च व्यापकानुभवैः एतस्य पुस्तकस्य अन्तिमरूपार्थं साहाय्यं लब्धम् ।

सेंटर-फॉर-दा-स्टडीज- ऑफ-डेवलपिंग-सोसायटीज(सी.एस.डी.एस.) इति एकलव्य-शैक्षिक-शोध-नवाचार-संस्थानं मध्यप्रदेशः-निरन्तरं जेंडरशिक्षासन्दर्भसमूहः तथा च अंकुर-सोसायटी-फॉर- ऑल्टरनेट्विज-इन-एजुकेशन इति एतस्य पुस्तकस्य सज्जीकरणे महत्त्वपूर्णं दायित्वं निर्वोढ्वान् । ते अस्माकं याचनायाः आवश्यक्तायाः च अनुरूपं यथासम्भवं सहयोगं कृतवन्तः। श्रीअधिकारी विकासः सचिनः घनश्यामः च (सी.एस.डी.एस.), दिनेशपटेलः (एकलव्यः) शालिनीजोशी मालिनीघोषः वी.टी.प्रसन्ना अनिलहासदा च नैरन्तर्येण अस्माकं साहाय्यं कृतवन्तः ।

एतैः जनैः सार्धं बहवः अभिभावकाः शिक्षकाः विद्यार्थिनः च ये एतस्य पाठ्यपुस्तकस्य विषये जानन्ति स्म ते अपि एतस्यां प्रक्रियायां सम्मिलिताः। एतस्मात् कारणात् वयं नूतनैः विचारैः बालकानां परिचयं कारयितुं समर्थाः अभवाम। वयं राष्ट्रियशैक्षिकानुसन्धानप्रशिक्षणपरिषदः नवदेहल्याः अपि अधमर्णाः स्मः येषां कारणतः इदं कार्यं सम्भवमभूत । एतस्य विषये विषये परामर्शाः टिप्पणीः च सादरम् आमन्त्रिताः सन्ति ।

एतस्य पुस्तकस्य निर्माणसहयोगं दातुं सवितासिन्हा प्रोफेसरः अध्यक्षः च डी.ई.एस.एस.एच., एन.सी.ई.आर.टी. इत्यस्य कृते विशेषरूपेण धन्यवादज्ञापनं कर्तुमिच्छामः ।

वयं पुस्तकस्य विकासे विभिन्नचरणेषु सहयोगाय अरविंदशर्मणः डी.टी.पी.आपरेटरस्य सुनयनातिवारीवर्यायाः सीनियर-प्रूफ-रीडर इत्यस्याः च विशेषरूपेण कृतज्ञाः स्मः ।

प्रकाशनविभागद्वारा अस्मभ्यं पूर्णसहयोगः सुविधाः च प्राप्ताः सन्ति एतदर्थं वयं तेषाम् आभारिणः स्मः ।

पुस्तक-प्रयोगं कथं कुर्याम

"सामाजिकराजनैतिकजीवनम्" किमर्थम्?

ये सदस्याः राष्ट्रियपाठ्यचर्यायाः २००५ इत्यस्याः रूपरेखां सज्जीकृतवन्तः तेषां विचारः आसीत् यत् नागरिकशास्त्रविषयः कश्चित् विशेषौपनिवेशिकात् अतीत् निर्गतः अस्ति एतस्मात् एतस्य परिवर्तनस्य आवश्यक्ता अस्ति। पाठ्यचर्यायाः समितेः सदस्याः इदमपि ज्ञातवन्तः यत् नागरिकशास्त्रम् अधुना यावत् केवलं सर्वकारिसंस्थानां कार्यक्रमाणां च विवरणदाने एव केन्द्रितम् आसीत्। अयं विषयः अनेन प्रकारेण लेखनीयम् आसीत् यस्मिन् आलोचनात्मकदृष्टिकोणः समाहितः भवेत्। एतस्य सूचनायाः अन्तर्गतं कश्चित् नूतनः विषयः प्रादुर्भूतः"सामाजिकराजनैतिकजीवनम्" । एतेन नूतनेन विषयेण सामाजिकराजनैतिकार्थिकजीवनानां विभिन्नान् पक्षान् सम्मेल्य स्वक्षेत्रस्य विस्तारः कृतः।

सामाजिक-जीवनं राजनैतिक-जीवनञ्च कथं परस्परं भिन्ने स्तः?

अस्मिन् पुस्तके किञ्चित् पृथग्रूपं चिन्तनं स्वीकृतम् अस्ति यस्य स्पष्टीकरणस्य प्रयासं वयं कृतवन्तः। एतस्मिन् त्रयाणां तत्त्वानां सम्मिश्रणमस्ति।

१. बालकाः दृढानुभवानां माध्यमेन सम्यक् प्रकारेण शिक्षन्ते। एतं विचारं केन्द्रे स्थापयित्वा अयं प्रयासः कृतः अस्ति यत् संस्थासु प्रक्रियासु च चर्चा काल्पनिकवृत्तान्तानाम् अथवा केसस्टडी इत्यस्योपरि अथवा तेषाम् अभ्यासानाम् आधारेण भवेत् ये बालकानां स्वानुभवैः सम्बद्धाः भवेयुः।

२. अवधारणानां बालकाः अनेन प्रकारेण परिचयं प्राप्नुयुः यस्मात् तेषाम् अवबोधः भवेत् ते केवलं तथ्यानि सूचनाः च यावत् एव सीमिताः न भवेयुः। एतदर्थं ये उपायाः कृताः सन्ति ते सूचनानां निकषः। पाठे अभ्यासे च बालकेभ्यः एतादृशाः प्रश्नाः प्रदत्ताः सन्ति ये प्रश्नाः तान् चिन्तयितुं प्रेरयेयुः तथा च परिभाषाः न्यूनातिन्यूनरूपेण स्थापिताः सन्ति।

३. बालकाः सामाजिकाभ्यः पारिवारिवारिकाभ्यः संरचनाभिः सह घनिष्ठरूपेण युक्ताः भवन्ति। एतत्तथ्यं मनसि निधाय वयं प्रयासं कृतवन्तः यत् विभिन्नेषु विषयेषु चर्चां कुर्वन्तः आदर्शः यथार्थसन्तोलनं च भवेत्।

४. बालकाः बाह्यानुभव-पुरस्सरं कक्षां प्रविशन्ति। एतस्मिन् पुस्तके विषयेषु येन प्रकारेण चर्चा कृता अस्ति सा चर्चा बालकानां ज्ञाने अभिवृद्धिं करोति। तथा च अवबोद्धुं निरीक्षयितुं च अवसरं प्रददाति। पुस्तके यथार्थं दर्शितमस्ति। एतेन सहैव इदं वर्णितमस्ति यद् वयम् आदर्शस्थितिं प्रति कथं वर्धितुं शक्नुमः। तेषामादर्शाणाम् उपरि बलाघातः कृतःअस्ति ये संविधाने निहितमूल्यानामुपरि आधारिताः सन्ति। एतेषां मूल्यानां कृते जनैः यः सङ्घर्षः कृतः ते अपि आधारभूताः सन्ति।

इदं पुस्तकं चतुर्षु घट्टेषु विभक्तमस्ति ये घट्टाः विभिन्नावधारणासु प्रकाशं निक्षिपन्ति । एते सन्ति– विविधताः, सर्वकारः, स्थानीयसर्वकारः प्रशासनम्, आजीविका च। प्रत्येकं घट्टे एकाधिकाः पाठाः सन्ति ये एतासु अवधारणासु विस्तरेण चर्चां कुर्वन्ति।

(१) प्रत्येकं पाठस्य प्रारम्भः

प्रत्येकं पाठः द्वाभ्यां तत्त्वाभ्यां प्रारभते यस्य माध्यमेन बालेषु तं पाठं प्रति रुचिः तस्य विषये च अधिकं ज्ञातुम् उत्सुकता जायते। प्रथमं तत्त्वम् अस्ति परिचयात्मकः भागः यः सम्पूर्णस्य पाठस्य किञ्चिद् दर्शनं कारयति यत् अयं पाठः केषु मुख्यविन्दुषु चर्चां करिष्यति। बालकानां कृते तेषां जिज्ञासावर्धनाय प्रश्नाः प्रदत्ताः सन्ति तथा च एतादृशाः प्रश्नाः अपि सन्ति ये बालकानां कृते तेषाम् अनुभवैः विषयैः च सम्बद्धतायाः अवसरं कल्पयन्ति। अपरं तत्त्वम् अस्ति प्रत्येकं पाठे आदौ एव आगन्ता किञ्चिद् बृहच्चित्रं यस्य साहाय्येन बालः इदमनुभवं प्राप्स्यति यत् पाठः कस्मिन्

विषये अस्ति। एषा आशा अस्ति यत् कक्षायां पाठनकाले शिक्षकः पुस्तके प्रदत्तप्रश्नैः चित्रैः च साकं स्वस्य प्रश्नानां चित्राणां च प्रयोगं करिष्यति।

द्वितीयः अध्यायः

विविधता तथा च भेदभावः

गते पाठे भवन्तः विविधतायाः विषये पठितवन्तः कदाचित् ये जनाः अपरेभ्यः भिन्नाः भवन्ति तेषां परिहासः क्रियते। अथवा ते बहुषु गतिविधिषु तथा च समूहेषु न प्रवेश्यन्ते। यदि अस्माकं मित्राणि अथवा अन्ये जनाः अस्माभिः सार्धम् अपि एतादृशं व्यवहारं कुर्युः तर्हि वयं दुःखम् अनुभवामः तेभ्यः कुप्यामः तथा च वयम् असहायाः इति अनुभवामः। किं भवन्तः कदाचित् चिन्तितवन्तः यत् इत्थं किमर्थं भवति?

अस्मिन् पाठे वयम् इदम् अवगन्तुं प्रयासं करिष्यामः यत् एतादृशाः अनुभवाः अस्माकं समाजेन सह तथा च अस्माकं परिवेशे विद्यमानानाम् असमानताभिः सह कथं युक्ताः सन्ति।

हेक्टरः तस्य मित्रं च किं तथ्यं विरुध्य संघर्षं कुर्वन्ति स्म ? अश्वेतजनाः कथं भेदभावस्य सम्मुखीकरणं कुर्वन्ति स्म, एतस्य सूचीं कुर्वन्तु –

1.
2.
3.

(२) पाठस्य मध्यस्थाः प्रश्नाः अभ्यासाः च

भवन्तः द्रक्ष्यन्ति यत् प्रत्येकं पाठे कानिचन वर्णयुक्तानि कोष्ठकानि प्रदत्तानि सन्ति येषु चर्चार्थं केचन विषयाः सन्ति केचन प्रश्नाः प्रदत्ताः सन्ति केचन अभ्यासाः च अपि प्रदत्ताः सन्ति। एतेषां सर्वेषाम् अनेके प्रयोगाः सन्ति- प्रथमं तु अयम् अस्ति यत् शिक्षकः अनुमीयेत् यत् विद्यार्थी कक्षायां पाठितपाठं कियन्तं ज्ञातवान् इति।

3. केनचित् शाकविक्रेत्रा सह वार्तां कुर्वन्तु तथा च जानन्तु यत् सः निजकार्यं कथं करोति- सज्जा, क्रयणं, विक्रयाणादिकम् इति।
4. बच्चुः इत्यनेन एकदिनस्य अवकाशग्रहणात् पूर्वमपि चिन्तनीयं भवति, इत्थं किमर्थमस्ति ?

अधोलिखिततालिकायां प्रदत्तकथनानाम् उपरि दृष्टिपातं कुर्वन्तु। किं भवत्यः परिचेतुं शक्नुवन्ति यत् ते सर्वकारस्य केन स्तरेण सम्बन्धिताः सन्ति? तेषां पुरतः चिह्नं कुर्वन्तु।

	स्थानीयः	राज्यम्	राष्ट्रियः
भारतसर्वकारस्य रूसेनदेशेन सह मैत्री-सम्बन्ध-स्थापनस्य निर्णयः	०	०	०
जम्मूभुवनेश्वरयोः मध्ये नवीनरेलसेवारम्भयस्य निर्णयः	०	०	०
पश्चिमबंगालसर्वकारस्य सर्वेषु सर्वकारीयेषु विद्यालयेषु अष्टमकक्षायां परिषदः परीक्षां स्वीकर्तुं निर्णयः	०	०	०

समीरः विद्यालयद्वये किमर्थं न गच्छति स्म ? भवतां चिन्तनानुसारं यदि सः विद्यालयं गन्तुमिच्छेत् तर्हि किम् सः पारयेत् ? किमेतत् समीचीनमस्ति यत् केचन बालाः विद्यालयं गन्तुं प्रभवन्ति तथा च केचन गन्तुमेव न प्रभवन्ति ? एतस्मिन् विषये चर्चां कुर्वन्तु।

अपरः विषयः अयमस्ति यत् विद्यार्थिनाम् अनुभवविषये तेषां याः अवधारणाः सन्ति तासां वर्धनं स्यात्। तृतीयः अयं विषयः वर्तते यत् पूर्वं विद्यार्थी पाठितविषयान् स्मरेत् तथा च वर्तमानकालिके पाठे तेषां प्रयोगं कुर्यात्।

रिक्ते कोष्ठके चर्चार्थं प्रदत्तानां विषयाणां तात्पर्यम् अस्ति यत् बालाः समूहे चर्चां कुर्युः पश्चाच्च सम्पूर्णकक्षायां श्रावयेयुः। चर्चायाः कृते ये विषयाः प्रदत्ताः सन्ति ते मुख्यरूपेण बालकानाम् अनुभवानाम् उपरि केन्द्रिताः सन्ति येन बालकानाम् अवधारणायाः ज्ञानस्य विस्तारः भवेत्। अतः समयस्य अभावे सत्यपि एतेषु ध्यानम् अवश्यम् एव दातव्यम्।

(3) अभ्यासः

पाठोत्तरप्रश्नानां निर्माणसमये इदं ध्यानं दत्तमस्ति यत् विद्यार्थिनः स्वज्ञानस्य विस्तारं कर्तुं शक्नुयुः पाठस्य विषयवस्तुनः केवलं रटनं प्रयोजनं नास्ति। विद्यार्थी स्वकीयैः भावैः प्रश्नानाम् उत्तरं लिखेत् एतदर्थं सः प्रोत्साहनीयः।

अभ्यासः

1. आरक्षकाणां किं कार्यं भवति ?
2. राजस्वाधिकारिणः कार्यद्वयं वदतु।

विभिन्नप्रकारकाणां प्रश्नानां संक्षिप्तविवरणम् अधः लिखितमस्ति।

- केचन प्रश्नाः एतस्मिन् विषये बलाघातं कुर्वन्ति यत् विद्यार्थिनः पाठस्य प्रमुखबिन्दून् विशिष्टप्रकारेण आवर्तेरन्।
- केचन प्रश्नाः एतादृशाः सन्ति ये विद्यार्थिनः अनुभवाधारितोत्तराणि दातुं प्रेरयन्ति।
- केचन एतादृशाः प्रश्नाः सन्ति ये प्रदत्तसूचनायाः आधारेण विद्यार्थिभिः साकं तोलनां कर्तुं कथयन्ति।
- केचन प्रश्नाः तादृशाः सन्ति येषां प्रयोजनमस्ति यत् विद्यार्थिनः तासां परिस्थितीनां कल्पनां कुर्युः यासां विषये ते पठितवन्तः सन्ति। एते प्रश्नाः ताभ्यः विशेषपरिस्थितिभ्यः सञ्जातानां विषयाणां प्रतिक्रियाः अभिलषन्ति।

5. अधोलिखिततालिकायाम् आपणानां कार्यालयानां च नामानि पूरयन्तु – यत् ते कीदृशानि वस्तूनि प्रापयन्ति अथवा कीदृशानि सेवाकार्याणि कुर्वन्ति ?

आपणानां कार्यालयानां च नामानि	वस्तूनां सेवानां च प्रकाराः
---	---
---	---

- केचन तादृशाः अन्यप्रकारकाः प्रश्नाः सन्ति येषु चित्राणाम् उपयोगः क्रियते। तेषाम् आधारेण विद्यार्थिनः एतस्य वर्णनं कुर्वन्तु यत् चित्रे किं दृश्यते तत् च प्रदत्तेन पाठेन कथं सम्बद्धम् अस्ति?

6. अधोलिखिततालिकां पूरयन्तः शेखरस्य रामलिंगमस्य स्थितीनां परस्परं तुलनां कुर्वन्तु –

	शेखरः	**रामलिङ्गमः**
कर्षितभूमिः	----------	----------
श्रमिकाणाम् आवश्यकता	----------	----------
सस्यविक्रयणम्	----------	----------

• 5. अधोलिखितवार्तां पठन्तु तथा च प्रश्नोत्तराणि यच्छन्तु, ---

एतस्याः घटनायाः विषये सूचना तदा प्राप्ता यदा केचन जनाः व्रडितं लाड इत्येतं चिकित्सार्थं चिकित्सालयं प्रति नीतवन्तः। आरक्षकप्राथमिक्यां लाडः लेखितवान् यत् तमुद्दिश्य आक्रमणं तदा जातं यदा सः टैंकर इत्यस्मात् जलं पूरयति स्म । टंकी इति निमोनग्रामपंचायतस्य जलापूर्तियोजनान्तर्गतं निर्मिता आसीत् यतः जलस्य समानरूपेण वितरणं स्यात्। परन्तु लाडः आरोपयति स्म यत् उच्चजातीयाः जनाः विरोधं कुर्वन्ति स्म, ते कथयन्ति स्म यत् टैंकरजले दलितजातीयानाम् अधिकारः नास्ति इति।

इण्डियन-एक्सप्रेस इत्यस्य काचित् वार्ता – 1 मई 2004

क) लाडः किमर्थं ताडितः ?

ख) किं भवन्तः अनुभवन्ति यत् इदं प्रकरणं भेदभावसम्बद्धम् अस्ति ?

5. चर्चां कुर्वन्तु
उपरितनचित्रयोः अवकरचयनस्य तस्य निस्तारणस्य च विभिन्नविधीनां विषये दृष्टवन्तः।
1. भवतां चिन्तनानुसारं कः विधिः अवकरनिस्तारकस्य जनस्य कृते समुचितः अस्ति।

विभिन्नप्रकारकाः एते प्रश्नाः शिक्षकाणाम् एतस्मिन् विषये साहाय्यं करिष्यन्ति यत् शिक्षकाः अवगच्छेयुः यत् विद्यार्थिनः अवधारणाः ज्ञातवन्तः अपि च ते ताभिः सार्धं सम्बद्धाः अपि जाताः। आशा अस्ति यत् विद्यार्थिनां मूल्याङ्कनं कर्तुं शिक्षकः उपरिप्रदत्तप्रश्नानामनुसारं तेषाम् आधारेण च विविधविषयसमन्वितान् प्रश्नान् स्वयम् अपि रचयिष्यन्ति। केषाञ्चित् प्रश्नानां रटनस्य प्रवृत्तेः सर्वथा त्यागः भवेत्। स्वानुभवस्य व्यक्तीकरणं तथा च विषयेषु चर्चा अवधारणायाः अवगमने ताभिः सार्धं सम्बद्धतायाः कश्चित् भागः अस्ति।



अहम् एतं विषयम् परिहासरूपेण स्वीकृतवान् । परिहासः तस्मै जीर्णशीर्णवस्त्रधारिणे बालकाय आसीत् यः जनपथस्य सम्मर्दयुक्ते मार्गे चतुष्पथे रक्तसङ्केतदीपे वार्त्तापत्राणि विक्रीणीते स्म। अहं यदा ततः द्विचक्रिकया गच्छामि स्म सः आङ्गलभाषायाः वार्त्तापत्रं हस्ते उत्तोलयन् .....

(४) कथानकानाम् उपयोगः

इदं पुस्तकम् अनेकेषां काल्पनिकानाम् अकाल्पनिकानां च कथानां प्रयोगं करोति यस्मात् विद्यार्थिनः सस्थानां विचाराणां विषये अवगन्तुं सक्षमाः भवेयुः । एतासां कथानां प्रयोगः विद्यार्थिषु चर्चाम् अन्तःदर्शनं च वर्धितुं भवेत् । अयमेव प्रयासः अस्ति यत् विद्यार्थिनः आत्मानं कथया सार्धम् अधिकाधिकरूपेण योजयेयुः । केषुचित् पाठेषु वयं विद्यार्थिनः स्वानुभवेषु

बच्चुमांझी – कश्चन त्रिचक्रिकाचालकः

अहं बिहारस्य कस्माच्चित् ग्रामात् आगतः अस्मि यत्र अहं शिल्पिकार्यं करोमि स्म । मम भार्या पुत्रत्रयं च ग्रामे निवसन्ति । अस्माकं पार्श्वे कृषिभूमिः नास्ति । ग्रामे शिल्पिकार्यम् अपि निरन्तरं न लभ्यते यद् अर्जनं करोमि स्म तेन कटुम्बपालनं समीचीनतया न भवति ।



कथानकं लेखितुं उक्तवन्तः । कथानकस्य लेखनकाले विद्यार्थिनः अधिकाधिकमात्रायां सर्जनात्मकतायाः कृते प्रेरणस्य आवश्यकता अस्ति। शिक्षकैः एतद् अपि इच्छामः यद् ते अन्येषु विषयेषु पाठ्यमानाभिः अवधारणाभिः सम्बन्धं स्थापयिष्यन्ति।

कल्पनां कुर्वन्तु यत् भवान् कश्चन चित्रकारः कथाकारः वा अस्ति यः तस्मिन् स्थाने निवसति । एतादृशस्य स्थानस्य विषये कथां लिखन्तु अथवा चित्रं कुर्वन्तु।

किं भवती चिन्तयति यत् भवती एतादृशस्थलेषु निवसति चेत् आनन्दम् अनुभविष्यति? तेषां पञ्चानां वस्तूनां सूचीं निर्मातु येषां न्यूनता तत्र अधिकं अनुभविष्यति।

(५) छवीनाम् उपयोगः

एतस्मिन् पुस्तके अनेकानि चित्राणि सन्ति। एतानि सर्वाणि पाठ्यसामग्रीवत् पाठस्य अभिन्नाङ्गभूतानि सन्ति । अपि च आशासे पाठ्यसामग्र्याः अवबोधनकाले शिक्षकः एतेषां चित्राणाम् उपयोगं करिष्यन्ति। सार्धमेव एतेभ्यः चित्रेभ्यः बालाः एतादृशीनां परिस्थितीनां अवगमने साहाय्यं प्राप्स्यन्ति याः तेषां कृते अपरिचिताः सन्ति। शिक्षकाणां कृते अयं परामर्शः



अस्ति यत् ते पुस्तकालयतः समाचारपत्रतः पत्रिकाभ्यः अन्तर्जालतः उपलभ्यमानानां चित्राणामपि प्रयोगं कुर्युः।

(६) भाषायां लैङ्गिकी संवेदनशीलता

एतस्मिन् पुस्तके बालकान् सम्बोधयन् केषुचित् पाठेषु केवलं स्त्रीलिङ्गरूपाणामेव प्रयोगः कृतः अस्ति। यथा एतत् वाक्यं पश्यन्तु"किं कापि एतादृशं मित्रम् अस्ति या भवत्तुल्या दृश्यते?" सामान्यरूपेण एतस्य लेखनं भविष्यति "किं कोऽपि एतादृशं मित्रम् अस्ति यः सर्वतः भवत्तुल्यः दृश्यते।, अत्र मित्रम् इति शब्दे बालकस्य बालिकायाः च अपि ग्रहणमस्ति परन्तु तस्मात् पूर्वं

‘कश्चित्, इत्यस्मात् इत्थं प्रतिभाति यत् केवलं बालकानामेव चर्चा भवति। केवलम् अस्माकं भाषायामेव न अस्माकं जीवने प्रत्येकं पक्षतः बालिकानां न्यूनता तथा च बालिकाः प्रति असमानतायाः भावः दृश्यते । एतस्यामवस्थायाम् अस्माभिः अर्थात् असमानतायाः भावस्य निराकरणार्थम् अस्मिन् पुस्तके बालिकानां कृते स्थानं प्रदत्तमस्ति तथा च भाषायाः मान्यरूपाणि अपि परिवर्तितानि सन्ति। एतद् भवितुं शक्नोति यत् आदौ एतद् विपरीतं प्रतिभूयात् परन्तु अयं प्रयासः नास्ति यत् बालकानां पुरुषाणां च अवहेलनं स्यात् । परन्तु तासां सर्वासां बालिकानां कृते स्थानदानस्य प्रयासः अस्ति याः वर्षेभ्यः अस्माकं भाषातः कार्यक्षेत्रतः च लुप्ताः सन्ति।

(७) अन्येषां साधनानाम् उपयोगः

भित्तिचित्राणां प्रतिबन्धः स्यात्

भित्त्याः उपरि संश्लेषितानि चित्राणि कस्यापि नगरस्य सौन्दर्यं नाशयन्ति । बहुधा चित्राणि महत्त्वपूर्ण-स्थानेषु साइनफलके च संश्लिष्यन्ते। राजमार्गस्य मानचित्रेषु अपि ते संश्लिष्यन्ते। सर्वाणि राजनैतिक-दलानि एतेषां चित्राणां प्रयोगे सहपरामर्शं कृत्वा प्रतिबन्धं स्थापयन्तु।

पाठ्यपुस्तकं महत्त्वपूर्णं भवति परन्तु तत् एतादृशं साधनमस्ति यत् कक्षायां प्रयुक्तसाधनेषु एकमस्ति। विद्यार्थिनः पाठ्यपुस्तकस्य अध्ययनेन साकम् अन्यपाठ्यसामग्र्याः अपि यथा अध्ययनं कुर्युः तथा ते प्रेरणीयाः सन्ति। यथा समाचारपत्रं हास्यचित्रं च ।

स्थितिःसम्यक् नास्ति। अवश्यं पार्श्वस्थे ग्रामे नलात् जलम् आगच्छत् स्यात्।

अनुवादकः → रूपलालशर्मा

विषय-सूची

आमुखः iii

पुस्तकस्य प्रयोगं कथं कुर्याम viii

घट्टः १ विविधता

अध्यायः 1 विविधतायाः अवबोधः 18

अध्यायः 2 विविधता भेदभावः च 30

घट्टः २ सर्वकारः

अध्यायः 3 सर्वकारः किम् अस्ति ? 45

अध्यायः 4 लोकतान्त्रिकसर्वकारस्य मुख्यतत्त्वानि 54

घट्टः ३ स्थानीयसर्वकारः प्रशासनं च

अध्यायः 5 पञ्चसभाराज्यम् 62

अध्यायः 6 ग्रामस्य प्रशासनम् 69

अध्यायः 7 नगरप्रशासनम् 77

घट्टः ४ आजीविकाः

अध्यायः 8 ग्रामीणक्षेत्रे आजीविकाः 87

अध्यायः 9 नगरीये क्षेत्रे आजीविकाः 97

सन्दर्भः 108

चतुर्थः भागः (क)

नागराणां मूलकर्तव्यानि

अनुच्छेदः ५१ क

मूलकर्तव्यानि – भारतस्य प्रत्येकं नागरस्य इदं कर्तव्यं भविष्यति यत् सः –

(क) संविधानस्य पालनं कुर्यात् तस्य आदर्शानां संस्थानां राष्ट्रध्वजस्य राष्ट्रगानस्य च आदरं कुर्यात्,

(ख) स्वतन्त्रतार्थम् अस्माकं राष्ट्रियान्दोलनस्य प्रेरकान् उच्चादर्शान् स्वहृदयेषु धारयेत् तेषां च पालनं कुर्यात्।

(ग) भारतस्य एकतायाः सम्प्रभुतायाः अखण्डतायाः च रक्षणं कुर्यात् तस्य अक्षुण्णतायाः च अपि रक्षणं कुर्यात्।

(घ) देशस्य रक्षणं कुर्यात् आहूते सति राष्ट्रस्य सेवां कुर्यात्;

(ङ) भारतस्य सर्वेषु जनेषु समरसतायाः समानभ्रातृत्वभावनायाः च निर्माणं कुर्यात् या धर्मभाषा-प्रदेश-वर्गाधारितेभ्यः सर्वेभ्यः भेदभावेभ्यः परे स्यात् एतादृशीनां प्रथानां त्यागं कुर्यात् याः महिलानां सम्मानस्य विरोधं कुर्वन्ति।

(च) स्वस्य सामाजिक-संस्कृतेः गौरवशालिन्याः परम्परायाः महत्त्वम् अवगच्छेयुः तथा च तस्य परिरक्षणं कुर्युः।

(छ) प्राकृतिक-पर्यावरणस्य यस्य अन्तर्गतं वनानि क्षुद्रतडागाः नद्यः वन्यजीवाः च सन्ति तेषं रक्षणं संवर्धनं च कुर्यात् तथा च प्राणिमात्रस्य कृते दयाभावं धारयेत्।

(ज) वैज्ञानिकदृष्टिकोणस्य मानववादस्य ज्ञानार्जनस्य तथा च परिष्कारस्य भावनायाः विकासं कुर्यात्।

(झ) सार्वजनिकसम्पत्तेः रक्षणं कुर्यात् हिंसां च न कुर्यात्।

(ञ) वैयक्तिकगतिविधीनां सामूहिकगतिविधीनां च सर्वेषु क्षेत्रेषु उत्कर्षं प्रति गमनस्य सततं प्रयासं कुर्यात् , येन राष्ट्रं नैरन्तर्येण वर्धयत् प्रयत्नस्य उपलब्धेः च उच्चशिखरं स्पृशेत् अपि च

(ट) यदि माता पिता अथवा संरक्षकः अस्ति, तर्हि सः षड्वर्षीयाद् बालकाद् आरभ्य चतुर्दश-वर्षीयाय बालकाय प्रतिपाल्याय वा शिक्षायाः अवसरं प्रदद्यात्।

प्रथमः घट्टः

विविधता

पाठस्य प्रारम्भिकपङ्क्तिषु अवधानं कुर्वन्तु। “स्वकक्षायां सर्वत्र दृष्टिपातं कुर्वन्तु। किं काऽपि तादृशी सहयोगिनी अस्ति या सर्वथा भवत्सदृशा दर्शने प्रतिभाति?” अत्र अस्माभिः विचिन्त्य एव विशेषणस्य कर्तृपदस्य च स्त्रीलिङ्गरूपस्य प्रयोगः कृतः अस्ति, यः सम्पूर्णे पाठे प्रचलति।

शिक्षायां बालिकाः समानरूपेण स्थानम् अवसरान् च प्राप्नुयुः – एतदर्थं विभिन्नैः स्तरैः प्रयासाः क्रियन्ते। एकः उपायः एषः अपि अस्ति यत् वयं लेखनकाले साक्षात् बालिकाः सम्बोधयाम। यदि वयं अद्यावधि प्रकाशितानि पुस्तकानि पश्यामः तर्हि तेषु पाठकः सदैव कश्चिद् बालकः एव भवति अर्थात् पुंलिङ्गरूपस्य एव तत्र प्रयोगः भवति। एषा मान्यता भवति यत् तत्रैव स्त्रीलिङ्गरूपमपि सम्मिलितमस्ति। अत्र अस्माभिः भाषायाः एषा परिपाटी परिवर्तिता अस्ति। एतस्य पाठस्य अतिरिक्तम् अस्माभिः केषुचित् अन्येषु पाठेष्वपि स्त्रीलिङ्गरूपस्य प्रयोगः कृतः अस्ति।

भवितुं शक्नोति यत् प्रारम्भे एषः विधिः असमीचीनः प्रतीयेत्। परन्तु एषः प्रयासः नास्ति यत् अनेन बालकानाम् अवहेलनं स्यात्। अस्माकं प्रयासः अस्ति यत् ताः सर्वाः बालिकाः पाठ्यपुस्तके स्थानं प्राप्नुयुः याभिः सार्धं भिन्नेन भिन्नेन रूपेण असमानतायाः व्यवहारः क्रियते।

प्रथमः ध्यायः

विविधतायाः अवबोधः

स्वस्य कक्षायां सर्वत्र दृष्टिपातं कुर्वन्तु। किं कापि एतादृशी सहयोगिनी अस्ति या प्रत्यक्षतः भवत्सदृशा भवेत्? अस्मिन् पाठे भवती पठिष्यति यत् जनाः विविधेषु विषयेषु परस्परं भिन्नाः भवन्ति। ते न केवलं पृथग् भवन्ति अपरञ्च ते भिन्नेभ्यः क्षेत्रेभ्यः अपि सम्बद्धाः भवन्ति। तेषां धर्मः वासादिव्यवस्था अन्नपानादिकं भाषा उत्सवादयः अपि पृथग्भवन्ति। एताः भिन्नताः अस्माकं जीवने रोचकतां समृद्धिं च आनयन्ति

एतासां भिन्नतानां कारणतः एव भारते विविधता अस्ति। विविधता एकता च कथम् अस्माकं जीवनम् उत्कृष्टं करोति? भारतम् एतावद्विविधतासम्पन्नं राष्ट्रं कथं जातम्? किं सर्वविधाः विभिन्नताः विविधतायाः एव भागभूताः भवन्ति? चलाम, कानिचन उत्तराणि प्राप्तुं वयम् एतं पाठं पठामः।

भवत्याः समवयोभि बालकैः उपरि प्रदत्त-चित्राणि रचितानि सन्ति । रिक्ते कोष्ठके भवती स्वचित्रं रचयतु। किं भवत्याः चित्रम् अन्यैः त्रिभिः चित्रैः समम् अस्ति? एतद्भवितुं शक्नोति यत् भवत्याः चित्रम् एतेभ्यः त्रिभ्यः चित्रेभ्यः बहुभिन्नं स्यात् यथा एतानि त्रीणि चित्राणि अपि परस्परम् अन्योऽन्येभ्यः समानतां न भजन्ते। इत्थम् एतस्मात् कारणात् अस्ति यतो हि सर्वेषां चित्रकलायाः प्रकारः पृथक्-पृथग् भवति। यथा अस्माकं चित्रकलायां भिन्नता वर्तते तेनैव प्रकारेण अस्माकं वर्णस्य चयनादिषु खाद्यादिषु च अपि भिन्नता अस्ति।

स्वस्य विषये निम्नलिखितसूचनां यच्छन्तु-

- बहिर्गमनस्य समये अहं _____ धर्तुमिच्छामि।
- अहं गृहे_____ वार्तां करोमि।
- मम रुचिकरक्रीडा _____ अस्ति।
- अहं_____ विषये पुस्तकानि पठितुमिच्छामि।

स्वस्य अध्यापिकायाः साहाय्येन जानातु यत् भवतीषु कासां सखीनाम् उत्तराणि सदृशानि सन्ति। किं कक्षायां काचित् तादृशी सखी अपि अस्ति यस्याः सूची प्रत्यक्षतः भवत्याः सूच्याः इव वर्तते? प्रायेण न स्यात्। अपरञ्च इत्थं भविष्यति यत् कासाञ्चित् सखीनां कानिचन उत्तराणि भवत्याः उत्तरैः समानतां गतानि भविष्यन्ति। तादृश्यः कति सख्यः सन्ति याः भवतीवत् पुस्तकं पठितुम् इच्छन्ति? भवत्याः कक्षायाः विद्यार्थिनः सम्पूर्णतया कति भाषाः वदन्ति? एतस्मात् भवती ऊहां कृतवती स्यात् यत् बहुषु विषयेषु भवती स्वसखी इव अस्ति तथा च केषुचित् विषयेषु ताभ्यः पृथक् अस्ति।

मैत्रीसम्पादनम्

किं तादृशेन मनुष्येण सह मैत्रीसम्पादनं भवत्याः कृते सरलं भविष्यति यः भवत्याः सर्वथा भिन्ना अस्ति? अधोलिखितां कथां पठतु अपि च एतस्मिन् विषये चिन्तयतु।

अहम् एतं विषयम् परिहासरूपेण स्वीकृतवान्। परिहासः तस्मै जीर्णशीर्णवस्त्रधारिणे बालकाय आसीत् यः जनपथस्य सम्मर्दयुक्ते मार्गे चतुष्पथे रक्तसङ्केतदीपे वार्त्तापत्राणि विक्रीणीते स्म। अहं यदा ततः द्विचक्रिकया गच्छामि स्म सः आङ्गलभाषायाः वार्त्तापत्रं हस्ते उत्तोलयन् मत्पृष्ठे पलायते स्म तथा च तस्य दिनस्य मुख्यवार्ताः आङ्गल-हिन्दीशब्दयोः मिश्रितरूपेण उच्चैः उच्चारयति स्म। अद्य अहं मार्गस्य आश्रयं स्वीकृत्य स्थितवान् तथा च तस्मात् हिन्द्याः वार्त्तापत्रं याचितवान्। तस्य मुखम् उद्घटितम् एव अभवत्। सः पृष्टवान् "एतस्य अयमर्थः यत् भवान् हिन्दीं जानाति?"

"निश्चयेन" अहं वार्त्तापत्रस्य धनं यच्छन् उक्तवान्।

"किमर्थम्? भवान् किं चिन्तितवान्?" सः स्थितवान्। "परन्तु भवान् तु आङ्ग्लीयेन जनेन सदृशः प्रतिभाति। एतस्य अर्थः अस्ति यत् भवान् हिन्दीभाषां पठितुमपि शक्नोति?"

"आम् ! निश्चयेन पठितुं शक्नोमि"। अस्मिन् समये अहम् अधैर्येण उक्तवान्। "अहं हिन्दीं वक्तुं शक्नोमि

पठितुं शक्नोमि अपि च लेखितुम् अपि शक्नोमि। अहं विद्यालये अन्यैः विषयैः (सब्जेक्ट) सार्धं हिन्दीम् अपि पठितवान् अस्मि"। सः विषयं पृष्टवान्। अधुना पर्यन्तं यः विद्यालयं न गतवान् तम् अहं कथं बोधयानि यत् विषयः (सब्जेक्ट) इति किं भवति।" तत् किमपि भवति..." इति अहं प्रारब्धवान् एव आसम् यत् सङ्केतदीपः हरितवर्णीयः जातः तथा च मम पृष्ठे वाहनानां कोलाहलः शतगुणितः जातः। अहमपि आत्मानं वाहनसम्मर्देन सह वर्धितवान्।

अग्रिमे दिने पुनः सः तत्र आसीत्। सः स्मयमानः मह्यं हिन्द्याः वार्तापत्रं यच्छन् उक्तवान् भ्रातः! भवतां वार्तापत्रम्। अधुना वदतु विषयः (सब्जेक्ट) इति किं वस्तु भवति ? आङ्गलभाषायाः अयं शब्दः तस्य मुखे आश्चर्यं जनयति स्म। इत्थमनुभूतं यत् आङ्गलभाषायां सब्जेक्ट शब्दस्य यः अपरः अर्थः अस्ति "प्रजा" इति तस्मिन्नर्थे सः तस्य प्रयोगं करोति।

"ओह, एतत् पठन-पाठन-सम्बन्धितम् अस्ति" इति अहम् उक्तवान्। एतदनन्तरं यतो हि सङ्केतदीपः रक्तवर्णीयः जातः आसीत् अतः अहं पृष्टवान्, "भवान् कदाचित् विद्यालयं गतवान् अस्ति?" "नैव, कदापि न," सः उत्तरं दत्तवान्। पुनः वार्ताप्रसङ्गे सः गर्वेण उक्तवान् "अहं यदा एतावान् उन्नतः आसम् तदारभ्य मया कार्यं कर्तुं प्रारब्धम्"। सः आत्मानं मम द्विचक्रिकायाः आसनेन मापितवान्। "पूर्वं मम अम्बा मया सह आगच्छति स्म,परन्तु अधुना अहम् एकाकी एव कर्तुं पारयामि"।

"अधुना भवतः माता कुत्र अस्ति"? अहं पृष्ठवान्। परन्तु तावत्पर्यन्तं सङ्केतदीपः हरितवर्णीयः जातः अपि च अहं चलितुम् आरब्धवान्। अहं तं पृष्ठतः किमपि वदन्तं श्रुतवान् "सा मेरठे अस्ति अपि च तया सार्धं...."। अन्यत्सर्वं वाहनकोलाहले निमग्नम्।

"मम नाम समीरः अस्ति" सः अग्रिमे दिने उक्तवान् तथा च लज्जाभावेन मम नाम पृष्टवान्, "भवतः नाम?" इदं तु आश्चर्योत्पादकं तथ्यम् आसीत्। मम द्विचक्रिका स्खलिता। "मम नाम अपि समीरः अस्ति" अहम् उक्तवान्। "किम्? तस्य नेत्रे भासिते जाते। "आम्" अहं हसन् उक्तवान्। "भवान् जानाति यत् समीरस्य अर्थः कः – वायुः,पवनः। अपि च पवनपुत्रः कः अस्ति जानाति खलु?.हनुमान्!"

तर्हि अद्यारभ्य प्रथमः समीरः भवान् अस्ति तथा च द्वितीयः समीरः अहम् अस्मि" इति सः प्रसन्नभावेन उक्तवान्। "आम् ! सम्यगस्ति" अहम् उत्तरं दत्तवान् तथा च स्वहस्तं पुरतः कृतवान्। " हस्तमेलनं करोतु द्वितीय-समीर"!

तस्य लघुहस्तः मम हस्ते लघुचटकावत् समाहितः। अहं द्विचक्रिकां चालयित्वा अग्रे गतवान् परन्तु तस्य हस्तस्य औष्ण्यम् अधुना यावत् अनुभूयते स्म।

अग्रिमे दिवसे तस्य मुखे तस्य चिरपरिचितस्मितः न आसीत्। "मेरठे महती समस्या जाता अस्ति" सः उक्तवान्। तत्र परस्परकलहे बहवः जनाः मृताः। अहं मुख्यवार्तापत्रस्य मुख्यसमाचारान् दृष्टवान्।

प्रथमद्वितीययोः समीरयोः मध्ये काश्चन तिस्रः भिन्नताः लिखन्तु।

किम् एताः भिन्नताः तयोः पारस्परिकमैत्र्यां बाधाः जनितवत्यः।

स्थूलाक्षरेषु लिखितमासीत्- साम्प्रदायिकोपद्रवाः। "परन्तु समीर...." अहं वक्तुम् आरब्धवानेव आसम्।"अहं मुस्लिमसमीरः अस्मि" सः उक्तवान्।" अपि च मम सर्वे जनाः मेरठे सन्ति। तस्य नेत्रे सजले जाते। यदा अहं तस्य स्कन्धस्य उपरि हस्तं स्थापितवान् सः दृष्टिम् उपरि न उन्नीतवान्।

अग्रिमे दिने सः चतुष्पथे न आसीत्। न च तस्मात् अग्रिमे दिने सः तत्र दृष्टः, ततः अग्रे अपि सः पुनः कदापि तत्र न दृष्टः । आङ्ग्लहिन्द्योः किमपि वार्तापत्रं समीरविषये मां सूचयितुं न शक्नोति यत् सः कुत्र गतवान् अस्ति।

(पौउली-सेनगुप्तायाः कथा-द-लाइट्स चेंजड इत्यस्मिन् आधारिता)

यत्र प्रथमः समीरः आङ्ग्लभाषां सम्यग् जानाति तत्र एव च द्वितीयः समीरः हिन्दीं सम्यक् जानाति। अपरञ्च द्वयोः भाषा पृथक् अस्ति पुनरपि द्वौ परस्परं वार्तां कर्तुं शक्तवन्तौ। तौ एतदर्थं प्रयासं कृतवन्तौ यतोहि तयोः कृते वार्तालापः महत्त्वपूर्णः आसीत्। प्रथमस्य समीरस्य द्वितीयसमीरस्य च



पृष्ठभूमयः अपि पृथक्-पृथक् सन्ति। यत्र प्रथमः समीरः हिन्दुः अस्ति तत्रैव अपरः समीरः मुसलमानः अस्ति। द्वयोः मध्ये मैत्री जाता यतोहि द्वौ अपि मित्रतां कर्तुम् इच्छतः स्म। अन्नपानस्य वेशभूषायाः धर्मभाषादीनाम् एताः भिन्नताः विविधतायाः पक्षाः सन्ति।

स्वस्य विविधधार्मिकाणां सांस्कृतिकानां पृष्ठभूमीनाम् अतिरिक्तं प्रथमस्य समीरस्य द्वितीयसमीरस्य च मध्ये अन्यविषयेषु अपि परस्परं भिन्नता आसीत्। उदाहरणार्थं प्रथमः समीरः विद्यालये अध्ययनं कृतवान् अपरञ्च द्वितीयः समीरः वार्तापत्रस्य विक्रयणं करोति स्म।

द्वितीयः समीरः विद्यालयं गन्तुम् अवसरमेव न प्राप्तवान्। भवद्भिः सम्भवतः स्वक्षेत्रे एतादृशाः बहवः जनाः दृष्टाः स्युः। ये निर्धनाः सन्ति येषां भोजन-वस्त्र-गृहसम्बन्ध्यावश्यकताः अपि पूर्तिं न गच्छन्ति। इदम् अन्तरं तस्मात् अन्तरात् पृथगस्ति यस्य विषये वयं पूर्वं पठितवन्तः। इयं विविधता नास्ति परन्तु असमानता अस्ति यत् केषाञ्चित् जनानां पार्श्वे न अवसराः सन्ति न भूमिः अस्ति न च धनसदृशानि संसाधनानि एव सन्ति यथा अपरेषां जनानां पार्श्वे सन्ति। अतः निर्धनता सम्पन्नता च विविधतायाः रूपाणि न सन्ति। इयं जनानां मध्ये विद्यमाना असमानता वर्तते।

जातिव्यवस्था असमानतायाः किञ्चिदितोऽपि उदाहरणमस्ति। एतस्यां व्यवस्थायां समाजः पृथक्-पृथक्-समूहेषु विभक्तः। एतस्य विभाजनस्य आधारः आसीत् यत् जनाः

तेषाम् उत्सवानां सूचीं कुर्वन्तु प्रायः येषाम् उत्सवानाम् आचरणं प्रथमः समीरः द्वितीयः समीरः च इति उभौ कुरुताम्

प्रथमः समीरः

द्वितीयः समीरः

किं भवती कस्याश्चित् एतादृश्याः परिस्थितेः विषये चिन्तयितुं शक्नोति यदा भवती तया सार्धं मैत्रीं कृतवती या भवत्याः बहुभिन्ना अस्ति? एतस्य वर्णनं एकस्याः कथायाः रूपेण करोतु।



कीदृशानि कार्याणि कुर्वन्ति। जनाः यस्यां जातौ जन्म प्राप्नुवन्ति स्म तस्याः परिवर्तनं न कर्तुं शक्नुवन्ति स्म। उदाहरणार्थं यदि भवती कुम्भकारस्य कुले अभविष्यत् तदा भवती कुम्भकारी एव अभविष्यत्। कश्चिदपि जनः स्वजाति-सम्बद्ध-व्यवसायं न परिवर्तितुं शक्नोति स्म, अतः तस्य ज्ञानस्य अतिरिक्तं सः ज्ञानमपि अर्जयेत् इति आवश्यकं न आसीत्। एतस्मात् कारणात् असमानता समुत्पन्ना। भवत्यः एतस्मिन् विषये अग्रिमेषु पाठेषु पठिष्यन्ति।

द्वितीयः समीरः विद्यालयं किमर्थं न गच्छति स्म? भवत्याः मतानुसारं यदि सः विद्यालयं गन्तुम् इच्छेत् तर्हि किं सः गन्तुं शक्येत्? किम् एतत् सत्यम् अस्ति यत् केचन बालकाः विद्यालयं गन्तुं शक्नुवन्ति केचन च न गन्तुं शक्नुवन्ति? एतस्मिन् विषये चर्चां कुर्वन्तु।

विविधता अस्माकं जीवनं कथं समृद्धं करोति?

यथा प्रथमः समीरः द्वितीयः समीरः च मित्रे जाते तथैव भवत्याः अपि सख्यः स्युः याः भवत्याः बहु पृथक् स्युः। भवती प्रायः तासां गृहे भिन्नं भोजनं कृतवती स्यात्, ताभिः सार्धं पृथगोत्सवाः आचरिताः स्युः तासां वस्त्राणि धृतानि स्युः तथा च न्यूनाधिक्येन तासां भाषा अपि शिक्षिता स्यात्।



भवतीभ्यः प्रायः विभिन्नानां जन्तूनां राज्ञीनां साहसपूर्णघटनानां भूत-प्रेतादीनां च कथाः रुचिकराः प्रतीयेरन्। एतद् भवितुं शक्नोति यत्

सूचीं कुर्वन्तु यत् भवत्यः भारतस्य पृथक्-पृथक् प्रान्तानां कानि कानि व्यञ्जनानि आस्वादितवत्यः सन्ति। स्वकीयां मातृभाषाम् अतिरिच्य तासां भाषाणां सूचीं कुर्वन्तु यासां भवत्यः काञ्चन शब्दान् अपि जानन्ति।

भवत्यः स्वयमपि कथारचनायां रुचिं दध्युः। कस्याश्चित् उत्तमकथायाः पठनेन सदैव प्रसन्नता लभ्यते। तां पठित्वा अन्याः नूतनाः कथाः रचयितुं विचाराः लभन्ते। ये जनाः कथाः लिखन्ति ते जनाः विभिन्नेभ्यः स्रोतोभ्यः पुस्तकेभ्यः वास्तविकजीवनात् कल्पनातः च प्रेरणां स्वीकुर्वन्ति।

केचन जनाः जङ्गलेषु जन्तूनां मध्ये अतिष्ठन् तथा च ते जन्तूनां मैत्र्याः शत्रुतायाः च

चिन्तयतु भवती काचित् चित्रनिर्मात्री अथवा कथानिर्मात्री अस्ति याः अत्र निवसन्ति । एतादृशस्य स्थलस्य जीवनेन सम्बद्धां काचित् कथां लिखतु अथवा चित्रं निर्मातु।
किं भवती चिन्तयति यत् एतादृशस्थलेषु निवासेन भवती आनन्दम् अनुभविष्यति? तेषां पञ्चानां वस्तूनां सूचीं निर्मातु येषां न्यूनताम् एतादृशस्थलेषु भवती सर्वाधिकं अनुभविष्यति।

विषये कथाः लिखितवन्तः। कैश्चित् अन्यैः जनैः राज्ञां राज्ञीनां च वृत्तान्तं पठित्वा स्नेहस्य सम्मानस्य च कथाः लिखिताः। केचन स्वबाल्यकालस्य वृत्तान्तान् लिखितवन्तः तथा च विद्यालयकालस्य मित्राणां च संस्मरणानि साहसस्य च कथाः लिखिताः।

कल्पनां कुर्वन्तु यत् येषां कथाः भवत्यः श्रुतवत्यः अथवा पठितवत्यः सन्ति, ते सर्वे

कथाकाराः कथाश्रावयितारः च एतादृशे स्थाने वसितुं बाध्याः स्युः यत्र जनाः केवलं द्वयोः वर्णयोः वस्त्राणि धरेयुः यथा श्वेतवस्त्राणि रक्तवस्त्राणि च, तथा च एकप्रकारकस्य भोजनं खादेयुः (प्रायः आलुकानि!) समानरूपेण केवलं पशुपक्षीद्वयं पालयेयुः उदाहरणार्थं हिरणं काकं च, तथा च केवलं सर्पसोपानक्रीडया एव मनोरञ्जनं कुर्युः। एतादृशे स्थाने उषित्वा ते कीदृशीः कथाः लेखितुं शक्ष्यन्ति?

भारते विविधता

भारतं विविधतानां देशः अस्ति। वयं विभिन्नाः भाषाः वदामः। विभिन्नप्रकारस्य भोजनं कुर्मः विभिन्नान् उत्सवान् आचरामः तथा च पृथक्-पृथग्धर्माणां पालनं कुर्मः। परन्तु यदि गभीरतया वयं

भारतस्य जनाः विविधैः उपायैः अधोलिखितानि कार्याणि कुर्वन्ति। अत्र एतेषु एकः उपायः दर्शितः अस्ति। उपायद्वयम् इतोऽपि लिखन्तु

प्रार्थना	ईश्वरस्य भजनगानम्		
विवाहकरणम्		न्यायालयस्य सञ्चिकायां हस्ताक्षराङ्कनम्	
विभिन्नप्रकारकाणां वस्त्राणां धरणम्			मणिपुरे महिलानां फनैक-धरणम्
अभिवादनम्		झारखण्डस्य आदिवासिनां परस्परं "जोहार" इति करणम्	
तण्डुलपाकः	मांस-शाक-प्रयोगाभ्यां च तण्डुल(बिरयानी)पाकः		

चिन्तयेम तर्हि वास्तविकतायां वयम् समान-प्रकारकाणि कार्याणि कुर्मः केवलम् अस्माकं कार्यसम्पादनस्य शैल्यः पृथक्-पृथक् सन्ति।

वयं विविधतां कथं अवगच्छेम?

प्रायः सपादद्विशतवर्षेभ्यः पूर्वं यदा रेलयानं बसयानं कारयानं च अस्माकं जीवनस्य भागभूतं न आसीत् तदा अपि जनाः संसारस्य एकस्मात् भागात् अपरभागं प्रति यात्रां कुर्वन्ति स्म। ते जलयानेषु अश्वेषु उष्ट्रेषु च उपविश्य अथवा पद्भ्यां गच्छन्ति स्म।

प्रायः एताः यात्राः कृषेः वसितुं च भूमेः अन्वेषणाय भवन्ति स्म अथवा व्यापारस्य कृते भवन्ति स्म। परन्तु यात्रायां बहुकालः व्यतीतः भवती स्म अतः जनाः नूतने स्थाने प्रायः पर्याप्तकालपर्यन्तं तिष्ठन्ति स्म। एतदतिरिच्य अनावृष्टेः दुर्भिक्षस्य च कारणतः अपि अनेकधा जनाः स्वगृहं त्यजन्ति स्म। यदा उदरपूर्त्यर्थमपि भोजनं न लभते स्म तदा ते नूतनं स्थानं गत्वा वसन्ति स्म। केचन जनाः कार्यस्य अन्वेषणार्थं केचन च युद्धस्य कारणात् गृहं त्यजन्ति स्म।

यदा जनाः नूतनेषु स्थानेषु वसितुम् आरभन्ते स्म तदा तेषां जीवने किञ्चित् परिवर्तनं भवति स्म। कानिचन प्रचलनानि ते नूतनस्य स्थानस्य स्वीकुर्वन्ति स्म। तथा च केषुचित् प्रचलनेषु ते पुरातनानाम् आचाराणाम् अनुसारं जीवनं नयन्ति स्म। अनेन प्रकारेण तेषां भाषाभोजन-सङ्गीत-धर्मादिषु नूतनस्य पुरातनस्य च मिश्रणं भवति स्म। संस्कृतीनां च परस्परं आदानं प्रदानं च भवति स्म अनेन प्रकारेण शनैः शनैः काचित् मिश्रिता संस्कृतिः प्रादुर्भूता भवति स्म।

यदि पृथक्-पृथक्-क्षेत्राणाम् इतिहासं पश्येम तर्हि ज्ञानं भविष्यति यत् कथं विभिन्न-सांस्कृतिक-प्रभावाः तत्रत्य-जीवन-संस्कृतिभ्यां स्वरूप-दाने योगदानं दत्तवन्तः। अनेन प्रकारेण बहूनि क्षेत्राणि स्वस्य विशिष्टस्य इतिहासस्य कारणात् विविधतासम्पन्नानि भवन्ति स्म।



लद्दाखः - उच्चपर्वतीयं मरुस्थलीयक्षेत्रम्

यथार्थतया अनेन एव प्रकारेण जनाः विभिन्नाभ्यः भौगोलिकस्थितिभ्यः कथं सामञ्जस्यं स्थापयन्ति, तस्मादपि विविधता उत्पद्यते। उदाहरणार्थं समुद्रस्य समीपे वासे तथा च पर्वतीयक्षेत्रेषु वासे महदन्तरम् भवति। न केवलं तत्रत्यानां जनानां वस्त्रेषु खाद्यप्रवृतिषु एव अन्तरं भवति अपरञ्च यादृशं कार्यं ते कुर्वन्ति तदपि

पृथग्भवति। नगरेषु प्रायः जनाः एतद् विस्मरन्ति यत् तेषां जीवनं तेषां भौतिक-वातावरणात् कथं गभीरतया सम्बद्धमस्ति। एतादृशम् एतस्मात्

कौशेयप्रावारकस्य वयनं कुर्वती काचित् महिला

कारणाद् अस्ति यतोहि नगरेषु जनाः विरलाः एव स्वस्य शाकानि अन्नानि च उत्पादयन्ति। ते एतादृशानां वस्तूनां कृते विपण्याः उपरि एव आश्रिताः भवन्ति।

आगच्छन्तु भारतस्य द्वयोः भागयोः लद्दाखकेरलयोः उदाहरणस्य माध्यमेन इदं ज्ञातुं प्रयत्नं कुर्मः यत् कस्यचित् क्षेत्रस्य विविधतायाः उपरि तस्य ऐतिहासिक-भौगोलिक-कारकाणां कीदृशः प्रभावः भवति।

मानचित्रे भारतस्य चित्रं पश्यन्तु तथा च तस्मिन् अन्वेषयन्तु यत् एते द्वे क्षेत्रे – लद्दाखः केरलं च कुत्र स्तः। एतयोः क्षेत्रयोः भौगोलिक-परिस्थितयः भोजनं वस्त्राणि च कथं व्यवसायं प्रभावयन्ति? तासां सूचीं कुर्वन्तु।

लद्दाखः जम्मूकश्मीरयोः पूर्वीभागे उपत्यकासु निहीतं किञ्चित् मरुस्थलीयक्षेत्रमस्ति। अत्र अत्यल्पमेव कृषिकार्यं सम्भवति यतोहि अस्मिन् क्षेत्रे वृष्टिः किंचिदपि न भवति इदं क्षेत्रं चिरकालं यावत् हिमाच्छादितं भवति। अस्मिन् क्षेत्रे न्यूनाः एव वनवस्पतयः प्ररोहन्ति। पानीयस्य जलस्य कृते जनाः औष्ण्यकारणात् यत् हिमं द्रवीभावं गच्छति तदुपरि एव आश्रिताः भवन्ति।

अत्रत्याः जनाः काञ्चित् विशिष्टप्रकारकां अविं पालयन्ति यस्याः उत्तमोर्णस्य प्राप्तिः भवति। इयम् ऊर्णा बहुमूल्या अस्ति अतः एतन्निर्मितः "शाल" इति मूल्यवत् भवति। लद्दाखस्य जनाः सावधानतया एतस्याः उर्णायाः सङ्ग्रहणं कृत्वा काश्मीरस्य व्यापारिभ्यः विक्रीणन्ते। मुख्यतः काश्मीरेषु एव उत्तमोर्णायाः (पश्मीना –इत्यस्य) प्रच्छर्दनपट्टाः वयन्ते। अत्रत्याः जनाः दौग्धिकपदार्थानां यथा नवनीतस्य, चीज इत्यस्य मांसस्य च भक्षणं कुर्वन्ति। प्रत्येकं परिवारस्य पार्श्वे काश्चन गावः अजाः याकाः (हिमगावः) च भवन्ति।

मरुस्थलस्य अयमर्थः नास्ति यत् व्यापारिणः अत्रागन्तुम् आकर्षिताः न अभवन्। लद्दाखः तु व्यापारस्य कृते सुमार्गः इति मतः यतोहि अत्र अनेकाः उपत्यकाः सन्ति यतः गत्वा मध्येशियायाः सार्थाः तस्मिन् क्षेत्रे प्राप्नुवन्ति स्म यस्य नाम अद्य तिब्बतः अस्ति एते सार्थाः आत्मना सह उपस्करान् असिद्धकौशेयं कटादीन् च स्वीकृत्य चलन्ति स्म।

लद्दाखमार्गेण एव बौद्धधर्मः तिब्बतं प्राप्तवान्। लद्दाखं लघुतिब्बतमपि कथयन्ति। प्रायः चतुःशतवर्षेभ्यः प्राक् अत्र जनानां इस्लामधर्मेण

सह परिचयः जातः तथा च अधुना अत्र व्यापकसङ्ख्यायां मुस्लिमाः एव सन्ति। लद्दाखे गीतानां कवितानां च सुसमृद्धः मौखिकसङ्ग्रहः अस्ति। तिब्बतस्य ग्रंथः केसरसागा लद्दाखे अतीव प्रचलितः अस्ति। तस्य स्थानीयरूपं मुस्लिमाः बौद्धाः च गायन्ति तथा च तस्याधारेण नाटकस्य मञ्चनं कुर्वन्ति।

केरलं भारतस्य दक्षिण-पश्चिम-कोणे स्थितं राज्यम् अस्ति। इदं एकतः समुद्रावृत्तमस्ति तथा च अपरतः उपत्यकाभिः आवृत्तम् अस्ति। एतासु उपत्यकासु विविधप्रकारस्य उपस्कराः यथा कृष्णमरीचिकालवङ्गैलादयः प्ररोहयन्ति। एतेषाम् उपस्कराणां कारणतः इदं क्षेत्रं व्यापारिणां कृते अतीव आकर्षकं जातम्।

आदौ अरबी-यहूदीव्यापारिणः केरलम् आगतवन्तः। एषा अपि मान्यता अस्ति यत् ईसामसीहस्य धर्मदूतः संतथामसः प्रायः द्विसहस्रवर्षेभ्यः पूर्वं अत्र आगतवान्। भारते ईसाईधर्मस्य आनयनस्य श्रेयः अपि तस्मै गच्छति। अरबतः आगत्य बहवः व्यापारिणः अत्र उषितवन्तः। इब्नबतूताः यः प्रायः सप्तशतवर्षेभ्यः पूर्वमत्र आगतवान्, स्वयात्रावृत्तान्ते मुसलमानानां जीवनचरित्रस्य विवरणदानस्य काले सः लिखितवान् यत् मुस्लिमसमुदायस्य अत्र महान् आदरः आसीत्।

वास्कोडिगामा जलयानेन अत्र प्राप्तवान् तदा पुर्तगालवासिनः यूरोपतः भारतस्य समुद्रीमार्गं ज्ञातवन्तः। एतेषां सर्वेषां प्रभावाणां कारणतः केरलस्य जनाः विभिन्नानां धर्माणां पालनं कुर्वन्ति येषु यहूदी-ईसाई-हिन्दु-इस्लाम-बौद्धधर्माः च सम्मिलिताः सन्ति।

केरले आयोज्यमानस्य ओणमपर्वणः कश्चित् विशिष्टाकर्षणम्- नौः प्रतियोगिता



मत्स्यग्राहिचीन-देशीय-जालम्

चीनस्य व्यापारिणः अपि केरलम् आगतवन्तः। अत्र मत्स्यग्रहणार्थं ये जालाः प्रयुज्यन्ते स्म ते चैनिकजालैः इव साक्षात् साम्यतां भजन्ते स्म ते च "चीनी-वला" इति कथ्यन्ते। भर्जनस्य कृते जनाः येषां पात्राणां प्रयोगं कुर्वन्ति ते "चीना-चट्टी" इति उच्यन्ते। तस्मिन् "चीन" शब्दः एतत् तथ्यं प्रति सङ्केतयति यत् तस्य उत्पत्तिः कुत्र स्यात्। केरलस्य उर्वराभूमिः तण्डुलसस्यस्य कृते अतीव उपयुक्ता अस्ति तत्रत्याः च अधिकतराः जनाः मत्स्यान् शाकान् ओदनं च खादन्ति।

यत्र केरललद्दाखयोः भौगोलिकस्थितयः परस्परं सर्वथा पृथक् सन्ति तत्रैव वयम् इदमपि पश्यामः यत् द्वयोः क्षेत्रयोः इतिहासे समानप्रकारकस्य सांस्कृतिकप्रभावाः सन्ति। द्वे क्षेत्रे एव चीनारबदेशीयैः व्यापारिभिः प्रभावितेे। यत्र केरलस्य भौगोलिकस्थितयः उपस्कराणां कृषिं सम्भवां कृतवत्यः तत्रैव लद्दाखस्य विशेषभौगोलिकस्थित्या उर्णया च व्यापारिणः आत्मनः प्रत्याकर्षिताः। अनेन प्रकारेण ज्ञायते यत् कस्यापि क्षेत्रस्य सांस्कृतिकजीवनस्य तस्य इतिहासेन भूगोलेन च सह घनिष्ठः सम्बन्धः भवति।

विविधसंस्कृतीनां प्रभावः केवलं व्यतीतस्य दिवसस्य वार्ता नास्ति। अस्माकं वर्तमानजीवनस्य आधारः एव कार्यार्थं एकस्मात् स्थानात् अपरं स्थानं प्रति गमनम् अस्ति। प्रत्येकं कार्येण सह अस्माकं सांस्कृतिक-लोकाचारस्य जीवनयापनस्य च शैली शनैः शनैः तस्य नूतनस्य क्षेत्रस्य भागभूता जायते यत्र वयं प्राप्नुमः। तथैव स्वप्रतिवेशे वयं पृथक्-पृथक् समुदायस्य जनैः सह निवसामः। वयं स्वदैनन्दिनजीवने परस्परं मिलित्वा कार्यं कुर्मः तथा च अन्योऽन्येषां लोकाचारेषु परम्परासु च सहभागिनः भवामः।

विविधतायाम् एकता

भारतस्य विविधता अनेकता च तस्य शक्तेः श्रोतः इति स्वीकृतः। यदा भारते आङ्गल-शासनम् आसीत् तदा विभिन्न-धर्म-भाषा-क्षेत्रस्य महिलाः पुरुषाः च आङ्ग्लीयान् विरुध्य अयुध्यन्। भारतस्य स्वतन्त्रता-सङ्ग्रामे विभिन्न-परिवेशानां जनाः सम्मिलिताः आसन्। ते एकत्रीभूय आन्दोलनं कृतवन्तः, सम्भूय कारागारं गतवन्तः तथा च आङ्गलीयानां विभिन्नप्रकारेण विरोधं कृतवन्तः। आङ्ग्लीयाः चिन्तितवन्तः आसन् यत् ते भारतस्य जनेषु परस्परं सङ्घर्षम् उत्पादयितुं शक्नुवन्ति यतोहि तेषु महत्यः विविधताः अस्ति अपि च अनेन प्रकारेण तेषां शासनं चिरकालं यावत् चलिष्यति। परन्तु जनाः दर्शितवन्तः यत् ते परस्परं कियन्तः अपि विभिन्नता-सम्पन्नाः भवेयुः परन्तु आङ्ग्लीयैः सार्धं यः सङ्घर्षः वर्त्तते तस्मिन् ते सम्भूताः सन्ति।

रक्तमयानि दिनानि, अस्माकं न विस्मर्तव्यानि
स्वप्रसन्नतासु अश्रूणि, अस्माभिः निपातयितव्यानि।
सैयादः अस्माकं, चित्वा चित्वा पुष्पाणि त्रोटितानि

वासशून्ये स्थाने अस्मिन्, कश्चित् पुष्पगुच्छः विकासस्य गमनीयम्
गुलिकां खादित्वा अशेवहि जलियांबागे वयम्
शून्ये प्रेतभूमौ दीपकं प्रज्वाल्य गन्तव्यम्
हिन्दुमुस्लिमानां भवति अधुना होली
प्रवहन्ति एकस्मिन् वर्णे, वस्त्राञ्चलं आर्द्रीकृत्य गन्तव्यम्
केचन कारागारे सन्ति केचन च प्रेतभूमौ निपातिताः
बिन्दुद्वयं अश्रूणि तेषु निपात्य गमनीयम्
रक्तमयानि दिनानि अस्माकं....

भारतीय-जन-नाट्यसंघः(इप्टा)

इदं गीतं जलियाँवाला-बाग-हत्या-काण्डस्य अनन्तरम् अमृतसरे गीतम् आसीत्।एतस्मिन् हत्याकाण्डे कश्चित् ब्रिटिशजनरलः तेषां जनानाम् उपरि गुलिकाः चालितवान् आसीत् ये शान्तिपूर्वकं तत्र सभां कुर्वन्ति स्म तथा च शस्त्रविहीनाः आसन्। एतस्मिन् प्रकरणे बहवः जनाः मृतवन्तः अपि च आधिक्येन व्रणिताः जाताः। सिक्खजनाः हिन्दवः मुस्लिमाः महिलाः पुरुषाः अपि च अन्ये बहवः जनाः आसन् ये आङ्गलीयानां पक्षपात-पूर्णायाः नीतेः विरोधं कर्तुं तत्र समवेताः आसन्। इदं गीतं तेषाम् एव हुतात्मनां स्मरणार्थं गीयते स्म।

स्वतन्त्रता-सङ्ग्रामस्य काले प्रादुर्भूतानि गीतानि चिह्नानि च विविधतां प्रति अस्माकं ध्यानाकर्षणं कुर्वन्ति विश्वासं च उत्पादयन्ति। किं भवत्यः भारतीयस्य ध्वजस्य कथां जानन्ति? स्वतन्त्रता-सङ्ग्रामस्य काले एव भारतीयस्य ध्वजस्य परिकल्पना कृता आसीत् एतस्य ध्वजस्य प्रयोगं जनाः सम्पूर्णे भारते आङ्ग्लीयानां विरोधार्थं कृतवन्तः आसन्।

जवाहर-लाल-नेहरूद्वारा स्वपुस्तके "भारत की खोज" इत्यस्मिन् लिखितमस्ति यत् भारतीयैकता केनचित् बहिष्ठात् न आरोपिता अपितु "इयम् अतिगभीरा वर्तते यस्यां विभिन्नाः विश्वासाः



स्वतन्त्रतादिवसस्य उपलक्ष्ये भाषमाणः पंडितनेहरूः

प्रथाः च स्वीकृताः सन्ति। एतस्यां विविधताविषये ज्ञानं प्राप्यते अपि च प्रोत्साहनमपि क्रियते"। सः नेहरूः एव आसीत् यः भारतस्य विविधतायाः वर्णनं कुर्वन् "अनेकतायाम् एकतायाः" विचारं अस्मभ्यं दत्तवान्।

रविन्द्रनाथटैगोरद्वारा रचितमस्माकं राष्ट्रगानमपि भारतीयैकतायाः एव काचित् अभिव्यक्तिः अस्ति। राष्ट्रगानं कथम् एकतायाः वर्णनं करोति स्वशब्दैः लिखन्तु।

अभ्यासः

१. स्वक्षेत्रे आयोज्यमानाम् उत्सवानां सूचीं कुर्वन्तु। एतेषु के उत्सवाः सर्वैः समुदायैः आचर्यन्ते?
२. भवतां विचारेण भारतस्य समृद्धविविधसंस्कृतिः भवतां जीवनं कथं सम्यक् करोति।
३. भवताम् अनुसारं " अनेकतायाम् एकता" इत्यस्याः विचारः भारतस्य कृते कथम् उपयुक्तः अस्ति? भारत की खोज इति पुस्तकात् स्वीकृतेषु वाक्यांशेशु नेहरूः भारतस्य ऐक्यस्य विषये किं वक्तुमिच्छति?
४. जलियाँवाला-बाग-हत्या-काण्डस्य विषये लिखितस्य गीतस्य तां पङ्क्तिं चिन्वन्तु या भवताम् अनुसारं भारतस्य एकतां निश्चयेन प्रदर्शयति।
५. लद्दाखकेरलयोः इव भारतस्य किंचित् क्षेत्रं चिन्वन्तु तथा च अध्ययनं कुर्वन्तु यत् कथं तस्य क्षेत्रस्य विविधता ऐतिहासिक-भौगोलिक-कारकैः प्रभाविता अस्ति। किम् एतानि ऐतिहासिकानि भौगोलिकानि च कारकानि परस्परं सम्बद्धानि सन्ति? कथम्?

इति प्रथमोऽध्यायः

द्वितीयः अध्यायः

विविधता भेदभावश्च

गतपाठे भवन्तः विविधतायाः विषये पठितवन्तः कदाचित् ये जनाः अपरेभ्यः भिन्नाः भवन्ति तेषां परिहासः क्रियते। अथवा ते बहुषु गतिविधिषु तथा च समूहेषु न प्रवेशयन्ते। यदि अस्माकं मित्राणि अथवा अन्ये जनाः अस्माभिः सार्धम् अपि एतादृशं व्यवहारं कुर्युः तर्हि वयं दुःखम् अनुभवामः तेभ्यः कुप्यामः तथा च वयम् असहायाः इति अनुभवामः। किं भवन्तः कदाचित् चिन्तितवन्तः यत् इत्थं किमर्थं भवति?
अस्मिन् पाठे वयम् इदम् अवगन्तुं प्रयासं करिष्यामः यत् एतादृशाः अनुभवाः अस्माकं समाजेन सह तथा च अस्माकं परिवेशे विद्यमानानाम् असमानताभिः सह कथं युक्ताः सन्ति।

वयं के स्मः अपि च वयं कथं स्मः, इदं बहुषु तथ्येषु आश्रितं भवति वयं कथं वसामः, काः काः भाषाः वदामः किं खादामः, किं धरामः, कीदृशीः क्रीडाः क्रीडामः अपि च कान् उत्सवान् आचरामः, एतेषु उपर्युक्तेषु सर्वेषु अस्माकं भूगोलस्य इतिहासस्य च प्रभावः निपतति। यदि भवन्तः सङ्क्षेपेण एव निम्नलिखितानां बिन्दूनाम् उपरि अवधानम् करिष्यन्ति तर्हि अपि अनुभवं प्राप्स्यन्ति यत् भारतं कियान् विविधतासम्पन्नः देशः अस्ति।

संसारे अष्टौ मुख्याः धर्माः सन्ति। भारते षोडशशतात् अपि अधिकाः भाषाः भाष्यन्ते याः जनानां मातृभाषाः सन्ति। अत्र शताधिकानि नृत्यानि अपि क्रियन्ते।

एषा विविधता सदैव प्रसन्नतायाः कारणात् न निर्मिता भवति। वयं तैः जनैः सह सुरक्षिताः इति अनुभवामः ये अस्माभिः सदृशाः दृश्यन्ते वार्तां कुर्वन्ति वस्त्राणि धरन्ति तथा च अस्मद्दृशमेव तेषां चिन्तनं भवति। कदाचित् वयं यदा तादृशैः जनैः सह मिलामः ये अस्मभ्यं सर्वथा भिन्नाः भवन्ति तदा ते अस्मासु आश्चर्यं जनयन्ति तथा च अपरिचिताः इति अनुभूयन्ते। कदाचित् वयं ज्ञातुमेव न पारयामः यत्

ते अस्मभ्यं भिन्नाः किमर्थं सन्ति। जनाः आत्मनः भिन्नानां विषये विशिष्टप्रकारकस्य चिन्तनस्य निर्माणं कुर्वन्ति।

पूर्वाग्रहः

तानि कथनानि पश्यन्तु यानि भवन्तः इत्थम् अनुभूतवन्तः यत् एतानि ग्रामीणनगरीययोः परिवेशयोः कृते सम्यक् सन्ति तथा च येषु विषयेषु भवतां सहमतिः अस्ति तेषाम् उपरि चिह्नं कुर्वन्तु। किं भवतां मस्तिष्के ग्रामीणजनान् नगरीयान् जनान् च अधिकृत्य केचन पूर्वाग्रहाः सन्ति? जनानां मनसि एते पूर्वाग्रहाः किमर्थं भवन्ति? ये पूर्वाग्रहाः भवद्भिः स्वपरिवेशे अनुभूताः सन्ति तेषां काञ्चित् सूचीं कुर्वन्तु। एते पूर्वाग्रहाः जनानां व्यवहारं कथं प्रभावयन्ति?

एतेषु उपर्युक्तेषु कानिचन कथनानि सङ्केतयन्ति यत् ग्रामीणजनाः अज्ञानिनः अंधविश्वासिनः च भवन्ति अपरञ्च नगरीयाः जनाः प्रमादिनः चतुराः केवलं धनकारणाद् एव सम्बन्धं स्थापयन्ति इति तेषां विषये अवधारणा अस्ति। यदा वयं पूर्वतः एव कस्यचित् विषये काञ्चन अवधारणां निर्मामः तथा च ताम् अवधारणाम् स्वमनसि स्थापयामः तदा तस्याः नाम एव पूर्वाग्रहः इति भवति । अधिकतया एषा अवधारणा नकारात्मकी भवति । यथा कथनेषु प्रदत्तमस्ति-जनानां विषये एषा अवधारणा यत् एते प्रमादिनः चतुराः कृपणाः च सन्ति इत्यपि पूर्वाग्रहः अस्ति ।

यदा वयं कस्यचित् कार्यस्य विषये चिन्तयामः यत् एतत् अनया विधिना एव सम्यक्तया भवितुं शक्नोति अन्यः कश्चित् विधिः एव नास्ति तदा वयम् अन्येषां सम्मानं न कुर्मः उदाहरणार्थं यदि वयं चिन्तयामः यत् आङ्ग्लभाषा सर्वोत्तमा भाषा अस्ति तथा च अन्याः भाषाः महत्त्वपूर्णाः न सन्ति तदा एतत् दर्शनमस्माकं नकारात्मकं दर्शनमस्ति।परिणामतः वयं तेषां जनानां सम्मानं न कर्तुं शक्ष्यामः ये आङ्गलभाषाम् अतिरिच्य अन्याः भाषाः वदन्ति ।

ग्रामीणाः जनाः

- अर्धाधिकाः भारतीयाः ग्रामेषु निवसन्ति।
- ग्रामीणाः जनाः स्वस्वास्थ्यम् अधिकृत्य जागरूकाः न भवन्ति।
- ग्राम्यजनाः अविकसिताः भवन्ति तथा च ते कृषेः आधुनिकप्रौद्योगिक्याः प्रयोगं कर्तुं न इच्छन्ति।
- सस्यस्य रोपणस्य कर्तनस्य च काले ते १२ तः १४ होराः यावत् कार्यं कुर्वन्ति।
- ग्रामीणाः जनाः कार्यम् अन्वेष्टुं नगराणि प्रति गन्तुं बाध्याः सन्ति।
- नगरीयं जीवनं सरलं न भवति। अत्रत्याः जनाः दुष्टाः तथा प्रमादिनः भवन्ति।
- नगरेषु जनाः स्वपरिवारजनैः सह अधिकं कालं न यापयन्ति।
- नगरीयाः जनाः धनस्य चिन्तां कुर्वन्ति, जनानां चिन्तां न कुर्वन्ति।
- नगरीयजनानाम् उपरि विश्वासः न कर्तुं शक्यते ते भ्रष्टाचारिणः चतुराः च भवन्ति।
- नगरेषु निवासः महार्घः भवति। जनैः यत् अर्जनं क्रियते तस्य कश्चित् महान् भागः भाटकस्य तथा च आवागमनस्य कृते व्ययः भवति।

वयं बहूनां वस्तूनां विषये पूर्वाग्रहिणः भवितुं शक्नुमः यथा जनानां धार्मिकविश्वासाः तेषां चर्मणः वर्णः यत्क्षेत्रसम्बद्धाः ते भवन्ति यथा च वदन्ति यादृशानि वस्त्राणि च ते धरन्ति इत्यादीनां च विषये वयं पूर्वाग्रहिणः भवितुं शक्नुमः। प्रायः अन्येषां विषये धृताः अस्माकं ये पूर्वाग्रहाः भवन्ति ते तथा दृढाः भवन्ति यत् वयं तादृशैः जनैः सह मैत्रीं न कर्तुम् इच्छामः। एतस्मात् कारणात् कदाचित् अस्माकं व्यवहारः एतादृशः भवति यत् वयं तान् दुःखितान् कुर्मः।

बालिकाबालकयोः मध्ये भेदभावः

समाजे बालिकाबालकयोः मध्ये अनेकधा भेदभावः क्रियते। वयं सर्वे एतादृशं भेदभावं जानीमः। एकस्य बालस्य बालिकायाः च भवनस्य अभिप्रायः भवति? परस्परं बहवः जनाः वदिष्यन्ति, " वयं बालिकाबालकयोः इव जन्म प्राप्नुमः। अयं तु तथैव भवति। एतस्मिन् चिन्तनस्य का वार्ता अस्ति?" आगच्छन्तु, पश्यामः यत् अत्र किं यथार्थमस्ति?

अधोलिखित-कथनानां सूचीतः तालिकां पूरयन्तु। स्वस्य उत्तरस्य कारणेषु चर्चां कुर्वन्तु।

ते अतीव सुशीलाः सन्ति।

तेषां वार्तायाः शैली अतीव सौम्यः मधुरः च अस्ति।

ते शारीरिकरूपेण बलिष्ठाः सन्ति।

ते उद्दण्डाः सन्ति।

ते नृत्ये चित्रकलायां च निपुणाः सन्ति।

ते न रुदन्ति।

ते उपद्रविणः सन्ति।

ते क्रीडायां निपुणाः सन्ति।

ते पाककार्ये निपुणाः सन्ति।

ते भावुकाः सन्ति।

बालकः	बालिका
१	१
२	२
३	३
४	४
५	५

किं तस्याः मस्तिष्कं सम्यक् अस्ति?

केवलम् एतस्मात् कारणात् यतो हि मम पादौ स्खलतः अतः जनाः चिन्तयति यत् मम मस्तिष्कमपि स्खलति।

जनाः विविधाः वार्ताः कुर्वन्ति

अहं पादेन खञ्जः अस्मि, सम्भाषणकाले वाण्याः स्खलनं भवति एतदतिरिच्य अन्यदपि बहुकिमपि। कदाचिद् अहम् उदासीनः भवामि कदाचिच्च दुःखी भवामि। जनाः मम उपहासं कुर्वन्ति, एषा नूतना वार्ता नास्ति। यदि भवान् मम स्थाने अभविष्यत् तर्हि किम् अकरिष्यत्?

भवती अपराभ्यः कियती भिन्ना दृश्यते

अहं काचित् बालिका अस्मि। कुदृष्टिभ्यः अहं निलेतुम् इच्छामि।

यदि भवन्तः चिन्तयेयुः यत् ते रोदनं न कुर्वन्ति तर्हि एषः गुणः पुरुषैः बालकैः च सार्धं योज्यते यदा बाल्यकाले बालकः व्रणितः भवति तदा सामान्यरूपेण परिवारजनाः कथयन्ति यत् रोदनं मा कुरु" भवान् बालकः अस्ति। बालकाः पराक्रमशालिनः भवन्ति ते रोदनं न कुर्वन्ति। यथा यथा बालकाः यौवनावस्थां प्राप्नुवन्ति ते एतं विश्वासं द्रढीकुर्वन्ति यत् ते रोदनं न कुर्वन्ति।

उपरितनेषु चित्रेषु ये बालकाः सन्ति ते पूर्वं विकलाङ्गाः इति उच्यन्ते स्म। एतस्य शब्दस्य स्थाने तेषां कृते येषां शब्दानां प्रयोगः भवति ते इत्थं सन्ति- "विशिष्टावश्यकता-युक्ताः बालका"। तेषां विषये जनानां ये पूर्वाग्रहाः सन्ति ते अत्र प्रदत्ताः सन्ति सार्धमेव तेषां निजभावाः विचाराः च अपि अत्र प्रदत्ताः सन्ति। एते बालकाः तैः सह सम्बद्ध-रूढिवादि-धारणानां विषये किं कथयन्ति अपि च ते किमर्थं वक्तुमिच्छन्ति एतस्मिन् विषये चर्चां कुर्वन्तु। भवतां मतानुसारं किं विशिष्टावश्यकतावन्तः बालकाः सामान्य-विद्यालयेषु पाठनीयाः अथवा तेषां कृते पृथक्-विद्यालयाः भवितव्याः? स्वोत्तरस्य पक्षे तर्कान् यच्छन्तु।

स्थिति एतादृशीः अपि भवति यदि कस्यचित् बालकस्य पुरतः रोदनस्य स्थितिः अपि आगच्छेत् तदा अपि सः रोदनं न करोति आत्मनः उपरि च नियन्त्रणं करोति । बालकः मन्यते यत् रोदनं शक्तिहीनतायाः चिह्नमस्ति। यद्यपि बालकबालिकयोः कदाचित् रोदितुं मनः करोति विशेषतया यदा ते क्रोधिनः अथवा दुःखिनः स्युः। परन्तु यौवनावस्थां यावत् बालकाः शिक्ष्यन्ते यत् तैः रोदनं न करणीयम्। यदि कश्चित् युवकः रुद्यात् तदा सः अनुभवति यत् अपरे बालकाः तस्य उपहासं करिष्यन्ति। अतः सः अन्येषां पुरतः रोदनात् आत्मानं वारयति।

"ताः कोमलमृदुस्वभावाः च सन्ति" "ताः अतीव सुशीलाः सन्ति" – एतादृशानि कथनानि स्वीकृत्य तेषाम् उपरि चर्चां कुर्वन्तु यत् एतानि वाक्यानि कथं बालिकासु च चरितार्थानि क्रियन्ते किं बालिकासु एते गुणाः जन्मनः एव जायन्ते अथवा किं ताः एतादृशं व्यवहारं समाजतः शिक्षन्ते? भवतां तेषां बालिकानां विषये किं चिन्तनमस्ति याः कोमलमृदुस्वभावाः न भवन्ति तथा च उपद्रवं कुर्वन्ति।

वयं नैरन्तर्येण इत्थं शृणुमः यत् बालकाः एतादृशाः भवन्ति बालिकाः च एतादृश्यः भवन्ति समाजस्य एताः मान्यताः वयमपि अविचिन्त्य यथावत् मन्यामहे। वयं विश्वसिमः यत् अस्माकं व्यवहारः अपि एतादृशः एव भवेत्। वयं सर्वान् बालकान् सर्वाः बालिकाः च तासां छवेः अनुरूपमेव द्रष्टुमिच्छामः।

रूढिबद्धधारणानां निर्माणम्

यदा वयं सर्वान् जनान् एकस्यामेव धारणायां बद्धान् कुर्मः तदा सा एव **रूढिबद्धधारणा** इति उच्यते। बहुधा वयं केषाञ्चित् विशिष्ट-देश-धर्म-लिंगादीनां कारणतः कञ्चित् जनं "एषः कृपणः अस्ति" "एषः अपराधी अस्ति" अथवा "एषः मूर्खः अस्ति" इति मन्यामहे। इत्थम् एतस्मात् कारणात् भवति यतोहि अस्माभिः तेषां विषये एषा दृढा धारणा मनसि धृता अस्ति तस्मात् कारणात् एवं भवति। यदि देश-धर्मादिषु वयं एतादृशान् कृपणान् अपराधिनः मूर्खान् च जनान् प्राप्नुमः तर्हि केवलं एतस्मात् कारणात् यत् केचन जनाः तस्मिन् समूहे तादृशाः सन्ति सम्पूर्णस्य समूहस्य विषये एतादृशं चिन्तनं सम्यक् नास्ति। एतादृश्यः अवधारणाः अस्मान् एतस्मात् चिन्तनात् वारयति यत् प्रत्येकं जनः पृथक् अस्ति तस्य सामर्थ्यं गुणाः च पृथक् सन्ति। वयम् एतद् न द्रष्टुं पारयामः यत् तस्य जनस्य स्वस्य विशिष्टाः गुणाः क्षमताः च सन्ति याः अन्येभ्यः पृथक् सन्ति।

रूढिवादिधारणाः व्यापकसंख्यायां जनान् एकस्मिन्नेव आकारे निपातयन्ति। यथा मान्यता आसीत् वायुयानस्य संचालनं महिलाः न कर्तुं शक्नुवन्ति। एतासां धारणानां प्रभावः अस्मासु अपि भवति। बहुधा एताः धारणाः एतादृशेभ्यः कार्येभ्यः अस्मान् रुन्धन्ति यानि कर्तुम् अस्माकं सामर्थ्यं कदाचित् स्यात्।

असमानता भेदभावश्च

भेदभावः तदा भवति यदा जनाः पूर्वाग्रहाणाम् अथवा रुढिबद्धधारणानाम् आधारेण व्यवहारं कुर्वन्ति। यदि भवन्तः जनान् अपमानयितुं व्यवहरन्ति, यदि भवन्तः तान् जनान् केषुचित्

मुस्लिमानां विषये इयं सामान्यरूपेण रुढिबद्धधारणा अस्ति यत् ते बालिकानाम् अध्यापने रुचिमन्तः न भवन्ति अतः ते ताः बालिकाः विद्यालयं न प्रेषयन्ति। यद्यपि अध्ययनेभ्यः ज्ञायते यत् मुस्लिमानां निर्धनतात्र कारणमस्ति। निर्धनतायाः कारणाद् एव ते बालिकाः विद्यालयं न प्रेषयन्ति अथवा विद्यालयतः शीघ्रमेव निष्कासयन्ति। यत्र निर्धनानां कृते शिक्षायाः प्राप्तेः उत्तमाः प्रयासाः कृताः सन्ति तत्र मुस्लिमाः स्वबालिकाः विद्यालयं प्रेषितवन्तः। उदाहरणार्थं केरले प्रायः विद्यालयाः गृहस्य समीपे सन्ति सर्वकारीयस्य बसयानस्य सुविधा अपि तत्र सम्यक् अस्ति यस्मात् शिक्षकाः अपि विद्यालयं गन्तुं सारल्यं अनुभवन्ति। तत्र षष्ठी प्रतिशतं प्रायः महिलाशिक्षकाः सन्ति। एतानि सर्वाणि कारकानि निर्धनपरिवारस्य बालकानां विद्यालयं प्रति नयने साहाय्यं कृतवन्तः येषु मुस्लिमबालिकाः अपि सम्मिलिताः सन्ति। अपरेषु राज्येषु यत्र एतादृशाः प्रयासाः न कृताः तत्र निर्धनपरिवाराणां बालकाः विद्यालयं गन्तुं कष्टस्य अनुभवं कुर्वन्ति कामं ते मुस्लिमजनाः स्युः जनजातीयाः भवेयुः अथवा अनुसूचितजात्याः भवेयुः एतस्मात् स्पष्टीभवती यत् मुस्लिमबालिकानां विद्यालयतः अनुपस्थिते कारणं तासां धर्मःनास्ति परन्तु निर्धनताकारणमस्ति।

गतिविधिषु भागग्रहणात् वारयन्ति, कस्याश्चित् शिष्टवृत्तेः वारयन्ति, अथवा कस्मिंश्चित् ग्रामे ते वासं न कुर्युः ततः रुन्धन्ति अथवा कूपतः हस्तकूपतः च जलं पूरयितुम् आज्ञां न यच्छन्ति अथवा अन्यैः

यासां स्थालिकानां शरावानां च प्रयोगः क्रियते तेषु पात्रेषु तेषां कृते भोजनं जलं च न यच्छन्ति तर्हि एतस्य उपर्युक्तस्य चिन्तनस्य अभिप्रायः अस्ति यत् भवन्तः तैः सार्धं भेदभावं कुर्वन्ति।

भेदभावः विविधप्रकारेण भवितुं शक्नोति भवन्तः गतपाठं स्मरन्तु तत्र प्रथमः समीरः द्वितीयः समीरः च परस्परं भिन्नौ आस्ताम्। उदाहरणार्थं तयोः धर्मः भिन्नः आसीत्। अयं विविधतायाः एकः पक्षः अस्ति। परन्तु एषः भेदभावस्य कारणम् अपि भवितुं शक्नोति एतादृशं तदा भवति यदा जनाः अन्येषां धर्मसंस्कृतीः च स्वस्मात् पृथक् अनुत्कृष्टं च चिन्तयन्ति।

द्वयोः समीरयोः मध्ये एकम् अन्तरम् एतद् अपि आसीत् यत् तौ पृथक् पृथक् आर्थिक-पृष्ठभूमिभ्यः आस्ताम्। द्वितीयः समीरः निर्धनः आसीत्। यथा भवद्भिः पूर्वं पठितमस्ति। एषा भिन्नता विविधतायाः पक्षः नास्ति। इयं तु असमानता अस्ति। बहूनां जनानां पार्श्वे दैनन्दिनभोजनं वस्त्राणि गृह्यनित्योपयोगिनि वस्तूनि साधनानि धनानि च न भवन्ति। एतस्मात् कारणात्

तैः सार्धं चिकित्सालयेषु विद्यालयेषु कार्यालयादिषु च भेदभावः क्रियते।

केचन जनाः विविधतायाः असमानतायाः च उपरि आधारितयोः भेदभावयोः सम्मुखीकरणं कुर्वन्ति। एकस्तु एतस्मात् कारणात् यतो हि ते तस्य समुदायस्य सदस्याः सन्ति येषां संस्कृतिः मूल्यवती नास्ति इति मन्यन्ते। ततोऽपि अधिकं ते निर्धनाः सन्ति अपि च तेषां पार्श्वे स्वस्य आवश्यकताः पूरयितुं साधनानि न सन्ति तदा एतस्यामवस्थायामपि तैः सार्धं भेदभावः क्रियते। एतादृशस्य द्विविधस्य भेदभावस्य सम्मुखीकरणं अनेकाः जनजातीयाः जनाः धार्मिकसमूहाः विशिष्टक्षेत्रस्य च जनाः कर्तुं बाध्याः सन्ति।

भेदभावस्य साक्षात्कारे कृते सति

स्वस्य आजीविकार्थं जनाः पृथक्-पृथक्-कार्याणि कुर्वन्ति यथा पाठनं पात्रनिर्माणं मत्स्यग्रहणं काष्ठकारकर्म कृषिकार्यं वयनादिकं च कुर्वन्ति। परन्तु कानिचन कार्याणि अन्येषां कार्याणाम् अपेक्षया महत्त्वपूर्णानि मन्यन्ते। स्वच्छता, वस्त्रप्रक्षालनम्, केशकर्तनम्, अवकरस्य उत्थापनसदृशानि कार्याणि न्यूनमहत्त्वयुक्तानि इति

दलितः इति सः शब्दः अस्ति यः निम्नजातेः जनाः स्वपरिचयस्य रूपे प्रयोगं कुर्वन्ति। तेभ्यः अयं शब्दः **अस्पृश्य** इति शब्दात् अधिकं रोचते। दलितशब्दस्य तात्पर्यम् अस्ति- येषां दलनं कृतम्, ये पीडिताः सन्ति इति। दलितानाम् अनुसारेण अयं शब्दः दर्शयति यत् कथं सामाजिकैः पूर्वाग्रहैः भेदभावैः च दलितानां दमनं कृतम् आसीत्, कथं ते पीडिताः आसन्। सर्वकारः तादृशान् जनान् अनुसूचितजाति- इत्यस्मिन् वर्गे स्थापयति।

जातिगतभेदभावस्य कारणतः कस्यापि बालकस्य कक्षातः बहिः स्थापनं जातिगत-भेदभावस्य उदाहरणमस्ति।

मन्यन्ते। अतः ये जनाः एतानि कार्याणि कुर्वन्ति ते कुपुरुषाः अपवित्राः इति मन्यन्ते। अयं जातिव्यवस्थायाः कश्चित् अतिमहत्त्वपूर्णः पक्षः अस्ति। जातिव्यवस्थायां जनानां समूहाः कस्यचित् सोपानस्य क्रमेण स्थापिताः यस्मिन् एका जातिः अपरस्याः जात्याः उपरि अथवा अधः आसीत्। ये आत्मानं एतस्य सोपानस्य प्रथमे स्थाने स्थापितवन्तः ते आत्मानम् उच्चजातेः उत्कृष्टाः च वयम् इति उक्तवन्तः। ये समूहाः सोपानस्य अन्ते स्थापिताः सन्ति ते अस्पृश्याः अयोग्याः वा उक्ताः सन्ति। जातिप्रथायाः नियमाः निश्चिताः आसन्। एतेषाम् अस्पृश्यानां कृते प्रदत्तस्य कार्यस्य अतिरिक्तम् अन्यानि कार्याणि कर्तुम् स्वतन्त्रता न आसीत्। उदाहरणार्थं केषाञ्चित् समूहानां कृते केवलं अवकरोत्थापनस्य अपि च मृतपशूनां ग्रामतः अपसारणस्य एव आज्ञा आसीत्। ते उच्चजाति-सम्पन्न-जनानां गृहं प्रवेष्टुं कूपतः जलं

नेतुं मन्दिरं च प्रवेष्टुम् अधिकारिणः न आसन्। तेषां बालकाः विद्यालये उच्चजातीयैः बालकैः सह न उपवेष्टुं शक्नुवन्ति स्म। अनेन प्रकारेण उच्चजातेः जनेभ्यः ये अधिकाराः प्राप्ताः आसन् ते तान् निम्नजातिजनान् तेभ्यः अधिकारेभ्यः वञ्चितान् कृतवन्तः ।

अग्रिमे पृष्ठे वयं द्रक्ष्यामः यत् कथं भारतस्य कश्चित् प्रसिद्धः जनः भेदभावस्य सम्मुखीकरणं कर्तुं बाध्यः आसीत्। अयं भागः अस्माकम् अवबोधे साहाय्यं करिष्यति यत् कथं जातेः कारणात्

रूढिबद्धासु धारणासु भेदभावे च किम् अन्तरमस्ति? भवताम् अनुसारं येन जनेन सह भेदभावः भवति सः कथम् अनुभवति?

व्यापकसंख्यायां जनाः भेदभावेन ग्रस्ताः जाताः।

भारतस्य कश्चित् महान् नेता डा-अम्बेडकरः जातिव्यवस्थाधारितस्य भेदभावस्य विषये स्वानुभवानां विषये लिखितवान् अस्ति। एषः अनुभवः तेन १९०१ तमे वर्षे अनुभूतः यदा सः केवलं नववर्षीयः आसीत्। तदा सः महाराष्ट्रस्य कोरेग्रामं स्वभ्रातृभिः सह पित्रा सह मेलितुं गतवान् आसीत्।

सः उक्तवान् चिरकालं यावत् अस्माभिः प्रतीक्षा कृता परन्तु कश्चिदपि अस्मान् नेतुं न आगतवान्। होरायां व्यतीतायां सत्यां रेलस्थानकाधिकारी (स्टेशनमास्टर) अस्मान् प्रष्टुम् आगतवान्। सः अस्मभ्यम् अस्माकं चिटिकाः याचितवान् अस्माभिः ताः दर्शिताः। सः अस्मान् पृष्टवान् यत् भवन्तः अत्र किमर्थं स्थिताः सन्ति। अस्माभिः सः बोधितः यत् अस्माभिः कोरेग्रामं

डा. भीमरावाम्बेडकरः (१८९१-१९५६) भारतीयसंविधानस्य निर्माता दलितानां च महान् नेतृरूपेण ज्ञायते। अम्बेडकरः दलितसमुदायस्य अधिकारान् अभिलक्ष्य संङ्घर्षं कृतवान् आसीत्। तस्य जन्म महारजातौ अभवत् महारजातिः अस्पृश्या इति मन्यते स्म। महार-जनाः निर्धनाः भवन्ति स्म तेषां पार्श्वे कृषियोग्यभूमिः न भवति स्म, तेषां बालकैः अपि तदेव कार्यं करणीयं भवति स्म यत् कार्यं तेषाम् अभिभावकाः कुर्वन्ति स्म। तैः ग्रामाद् बहिः उषितव्यम् आसीत् ग्रामं अन्तरा ते न वसितुं शक्नुवन्ति स्म। अम्बेडकरः स्वजातौ प्रथमः जनः आसीत् यः स्नातकोपाधिं प्राप्तवान् अपि च अधिवक्ता भवितुं इग्लैंडदेशं गतवान्। सः दलितान् बालकान् विद्यालयं प्रेषयितुम् उक्तवान् प्रोत्साहितवान् च। दलिताः विभिन्नानि सर्वकारीयानि सेवाकार्याणि कुर्युः इति उक्तवान् यस्मात् च ते जातिव्यवस्थातः बहिः आगन्तुं शक्नुयुः।दलिताः मन्दिरमपि प्रविशेयुः एतदर्थं ये प्रयासाः क्रियन्ते स्म तत्र अम्बेडकरेण नेतृत्वं कृतम्। सः तस्य धर्मस्य अन्वेषणं करोति स्म यः धर्मः सर्वान् समानदृष्ट्या पश्येत्। अग्रे स्वजीवने सः बौद्धधर्मं स्वीकृतवान्। तस्य मन्तव्यम् आसीत् यत् दलिताः जातीयभेदभावस्य कुप्रथायाः च विरोधे सङ्घर्षं कुर्युः

तथा च तादृशस्य स माजस्य निर्माणं भवेत् यत्र सर्वेषां सम्मानं भवेत् न तु केवलं केषाञ्चित् जनानामेव।

गन्तव्यमासीत् परन्तु वयं पितुः तस्य सेवकस्य वा प्रतीक्षायाम् आस्म। परन्तु द्वयोः कश्चिदपि न आगतवान् तथा च वयं न जानीमः यत् कोरेग्रामं प्रति कथं गन्तव्यं भवति। अस्माभिः उत्तमानि वस्त्राणि धृतानि आसन् अतः अस्माकं भाषां वस्त्रं च दृष्ट्वा कश्चिदपि एतत् न अवगन्तुं शक्नोति स्म यत् वयं दलितबालकाः आस्म। निश्चयेन रेलस्थानकाधिकारी (स्टेशनमास्टर) अनुभूतवान् यत् वयं ब्राह्मणबालकाः स्मः सः अस्माकं समस्यां दृष्ट्वा चिन्तामग्नः जातः यथा हिन्दूषु भवत्येव रेलस्थानकाधिकारी अस्मान् पृष्टवान् यत् वयं कस्य बालकाः स्मः। तदा अविचिन्त्य एव अर्थात् सहजभावेन मम मुखात् निःसृतं यत् वयं महार-जातयः स्मः। *(मुम्बईप्रान्ते महारजातयः अस्पृश्याः इति मन्यन्ते स्म।)* रेलस्थानकाधिकारी सहसा आश्चर्यपुरस्सरं दृष्टवान् तस्य मुखमण्डले सहसा परिवर्तनं जातम्। अस्माभिः दृष्टं यत् एका विचित्रायाः घृणायाः भावना तस्य मनः आक्रान्तवती। सः यदा मम उत्तरं श्रुतवान् तदा एव सः स्वप्रकोष्ठं गतवान् वयं च तत्रैव स्थिताः आस्म। पंचदश-विंशति-कलाः व्यतीताः सूर्यः अस्तं प्रति गच्छति स्म। पिता न आगतवान् न च तस्य सेवकः एव अधुना रेलस्थानकाधिकारी अपि अस्मान् परित्यज्य गतवान्। वयम् अतीव भयभीताः आस्म। यात्रायाः आरम्भे यः उत्साहः प्रसन्नता च आसीत् तस्य स्थाने अधुना आधिक्येन उदासीनता आसीत्।

अर्धहोरानन्तरम् अधिकारी तत्र आगतवान् तदा सः पृष्टवान् यत् भवन्तः किं कर्तुं चिन्तयन्ति अस्माभिः उक्तं यत् यदि अस्मभ्यं भाटकस्योपरि कश्चित् शकटः लभेत तदा वयं कोरेग्रामं गन्तुं शक्नुमः ।

यदि कोरेग्रामः अतिदूरं न स्यात् तर्हि वयं शीघ्रम् इतः पादाभ्यां गन्तुम् इच्छामः। तत्र भाटकस्य अनेकानि शकटानि चलन्ति स्म। परन्तु अहं रेलस्थानकाधिकारिणः समक्षे यद् उक्तवान् आसम् यत् वयं महाराः स्मः तद्विषयकं ज्ञानं तस्य अभूत्। कोऽपि वाहनचालकः अस्पृश्यवर्गस्य यात्रिणः नीत्वा आत्मानं मालिन्य-युक्तं क्षुद्रतां च प्रति न नेतुम् इच्छति स्म। वयं द्विगुणितं भाटकं दातुम् अपि सज्जाः आस्म परन्तु अस्माभिः अनुभूतं यत् धनस्य+ वार्ता न आसीत् धनेन कार्यं न सेत्स्यति। स्थानकाधिकारी यः अस्माकं कृते वाहनस्य व्यवस्थां करोति स्म तथा च भाटकस्य विषये वाहनचालकान पृच्छति स्म सः तत्र तूष्णीम्भूय स्थितवान्। न ज्ञायते स्म यत् किं करवाम?

स्रोतः – डांबी-आर.अम्बेडकरः, राइटिंग-एंड-स्पीचेज-खण्ड-१२, सम्पादनम् – वंसतमूनः, बम्बई-शिक्षा-विभागः, महाराष्ट्रसर्वकारः।

कल्पनां कृत्वा पश्यन्तु यत् इदं कियत् कठिनं भविष्यति यदि जनाः एकस्मात् स्थानात् अपरस्थानं प्रति न गन्तुं पारयेयुः। एतद् कियत् अपमानजनकं दुःखप्रदं च भविष्यति यदि जनाः भवद्भ्यः दूरे तिष्ठेयुः भवन्तं न स्प्रष्टुम् इच्छेयुः अपि च भवते पानीयं जलं न यच्छेयुः। इयं लघ्वी घटना दर्शयति यत् वाहनद्वारा एकस्मात् स्थानात् अपरं स्थानं प्रति गमनस्य सौविध्यमपि एतेषां बालकानां पार्श्वे नासीत् यद्यपि धनं दातुं समर्थाः आसन्। रेलवेस्थानकस्य सर्वैः वाहनचालकैः बालकान् नेतुम् अस्वीकृतिः प्रकटिता। ते बालकैः सह भेदभावपूर्णं व्यवहारं कृतवन्तः।

अनया कथया पूर्णतः स्पष्टमस्ति यत् जात्याधारितः भेदभावः न केवलं दलितान् गतिविधीन् कर्तुं रुणद्धि अपितु एतादृशः व्यवहारः तेषां सम्मानस्य अपि हानिं करोति यः सम्मानः अपरेषां कृते सुलभः भवति।

समानतायाः कृते सङ्घर्षः

ब्रिटिश-शासनात् मोक्तुं यः सङ्घर्षः अस्माभिः कृतः आसीत् तस्मिन् समानतायाः



स्वाधिकारान् याचमानाः महिलाः

व्यवहाराय कृतः सङ्घर्षः अपि सम्मिलितः आसीत्। दलितजनैः महिलाभिः जनजातीय-जनैः कृषकैः च स्वजीवने यः असमानतायाः अनुभवः कृतः आसीत् तस्य विरोधे ते संङ्घर्षं कृतवन्तः। यथा पूर्वमपि चर्चा जाता बहवः दलिताः मन्दिरं प्रवेष्टुं संङ्घर्षं कृतवन्तः। महिलाः याचनां कृतवत्यः

*बालकाः धनं दातुं सज्जाः आसन् पुनरपि वाहनचालकाः तान् नेतुम् अस्वीकृतवन्तः। किमर्थम्?
*रेलस्थानके जनाः कथम् अंबेडकरेण तस्य भ्रातृभिः च सह भेदभावं कृतवन्तः?
* एषः महारः अस्ति इति ज्ञात्वा रेलस्थानकाधिकारिणः (स्टेशनमास्टर) या प्रतिक्रिया आसीत् तां दृष्ट्वा बाल्यकाले अंबेडकरः कथम् अनुभूतवान् स्यात्? स्वशब्देषु वर्णनं कुर्वन्तु।
* किं भवन्तः आत्मानं प्रति जनानां पूर्वाग्रहभावम् अनुभूतवन्तः? अथवा भवन्तः अन्यान् प्रति कस्यचित् भेदभावस्य व्यवहारं दृष्टवन्तः? तदा भवन्तः किम् अनुभूतवन्तः?

भारतीयसंविधानलेखक-समितेः केचन सदस्याः

यत् यथा पुरुषाणां पार्श्वे शिक्षायाः अधिकारः अस्ति तथैव तासां कृते अपि अधिकारः भवेत्। दलिताः आत्मानं भूस्वामिभ्यः तथा च तेषां द्वारा गृह्यमानस्य उच्चव्याजमात्रातः आत्मानं रक्षितुं संघर्षं कृतवन्तः।

१९४७ तमे वर्षे यदा भारतं स्वतन्त्रं जातं तदा अस्माकं नेतृभिः समाजे व्याप्तस्य अनेकप्रकारस्य असमानभावस्य विषये चिन्तनं कृतम् । संविधानस्य लेखकाः अपि एतस्मिन् विषये जानन्ति स्म यत् कथम् अस्माकं समाजे जनैः भेदभावः क्रियते अपि च जनाः तं विरुद्ध्य कथं संघर्षं कृतवन्तः । बहवः नेतारः एतेषां सङ्घर्षाणां भागभूताः आसन् यथा डा-अंबेडकरः। एतस्मात् कारणात् नेतारः एतादृशीं दृष्टिं स्थापितवन्तः यत् तया सर्वे जनाः समानाः भवेयुः। समानता मूलभूतं मूल्यमिति दृष्ट्या स्वीकृता या अस्मान् सर्वान् भारतीयान् परस्परं भारतीयरूपेण योजयति। प्रत्येकं जनस्य कृते समानाः अवसराः अधिकाराः च प्रदत्ताः सन्ति। अस्पृश्यता अपराधवत् दृश्यते तथा च एषा अधिनियम-व्यवस्थया समाप्तिं नीता अस्ति।

दलित-समुदायम् अतिरिच्य अन्ये अपि अनेके समुदायाः सन्ति यैः सार्धं भेदभावः क्रियते। किं भवन्तः भेदभावस्य अन्योदाहरणानां विषये चिन्तयितुं शक्नुवन्ति?

तेषु विषयेषु चर्चां कुर्वन्तु येषाम् माध्यमेन "विशेषावश्यकतावद्भिः" जनैः सह भेदभावः कर्तुं शक्यते।

जनाः स्वरुच्यानुगुणं कार्याणि चेतुं पूर्णतया स्वतन्त्राः सन्ति। वृत्तेः अवसराः सर्वेषां जनानां कृते उद्घटिताः सन्ति। एतदतिरिच्य संविधानेन सर्वकारस्य कृते एतत् दायित्वं प्रदत्तमस्ति यत् सर्वकारः निर्धनानां कृते तथा च ये जनाः मुख्यधारातः बहिष्कृताः सन्ति तेषां समुदायानां कृते समानतायाः अधिकाराः लभेरन् तथा च सर्वकारः


भारत का संविधान
उद्देशिका
हम, भारत के लोग, भारत को एक '[संपूर्ण प्रभुत्व-संपन्न समाजवादी पंथनिरपेक्ष लोकतंत्रात्मक गणराज्य] बनाने के लिए, तथा उसके समस्त नागरिकों को :
सामाजिक, आर्थिक और राजनैतिक न्याय,
विचार, अभिव्यक्ति, विश्वास, धर्म
और उपासना की स्वतंत्रता,
प्रतिष्ठा और अवसर की समता
प्राप्त कराने के लिए,
तथा उन सब में
व्यक्ति की गरिमा और '[राष्ट्र की एकता
और अखंडता] सुनिश्चित करने वाली बंधुता
बढ़ाने के लिए
दृढ़संकल्प होकर अपनी इस संविधान सभा में आज तारीख 26 नवंबर, 1949 ई. को एतद्द्वारा इस संविधान को अंगीकृत, अधिनियमित और आत्मार्पित करते हैं।
1. संविधान (बयालीसवां संशोधन) अधिनियम, 1976 की धारा 2 द्वारा (3.1.1977 से) "प्रभुत्व-संपन्न लोकतंत्रात्मक गणराज्य" के स्थान पर प्रतिस्थापित।
2. संविधान (बयालीसवां संशोधन) अधिनियम, 1976 की धारा 2 द्वारा (3.1.1977 से) "राष्ट्र की एकता" के स्थान पर प्रतिस्थापित।

संविधानस्य प्रथमं पृष्ठं यत्र स्पष्टतया लिखितम् अस्ति यत् सर्वे भारतीयाः समानप्रतिष्ठां समानावसरान् च प्राप्नुयुः ।

अधिकाराणां लाभं प्रापयितुं कार्याणि कुर्युः।

संविधानलेखकैः इदमपि कथितं यत् विविधतायाः सम्मानः स्यात् तथा च विविधता मूल्यवती अस्ति इत्येषा दृष्टिः स्थापनीया एतस्मात् समानतायाः निश्चये एतानि उपर्युक्तानि कारकाणि सहायकानि भविष्यन्ति। ते अनुभूतवन्तः यत् जनानां कृते तेषाम् उत्सवान् आयोजयितुं धर्मं पालयितुं स्वभाषां वक्तुं आत्मानं अभिव्यक्तुं च स्वतन्त्रता भवेत्। ते उक्तवन्तः यत् कश्चित् उत्सवः एका भाषा एकं पर्व च सर्वेषां कृते अनिवार्यः न भवेत् ते उक्तवन्तः यत् सर्वकारः सर्वान् धर्मान् समानरूपेण द्रक्ष्यति मंस्यते च। अतः भारतं धर्मनिरपेक्षदेशः अस्ति यत्र जनाः भेदभावं परित्यज्य स्वधर्मस्य पालनं कुर्वन्ति । एतदेव अस्माकम् एकतायाः महत्त्वपूर्णं कारकम् दृश्यते यत् वयं सम्भूय निवसामः तथा च परस्परं सम्मानं कुर्मः।

यद्यपि अस्माकं संविधाने एतेषां विचाराणाम् उपरि बलाघातः कृतः परन्तु अस्मिन् पाठे एतादृशी एव चर्चा यत् असमानता अद्यापि अस्ति। समानता तादृशं मूल्यवत् वस्तु अस्ति यस्य कृते अस्माभिः नैरन्तर्येण सङ्घर्षः करणीयः स्यात्। भारतीयानां कृते समानतायाः मूल्यं वास्तविकजीवनस्य भागभूतं स्यात् एतदर्थं जनानां सङ्घर्षाः तेषाम् आन्दोलनानि सर्वकारेण क्रियमाणानि कार्याणि च महत्त्वपूर्णानि सन्ति ।

अभ्यासः

१. निम्नलिखितकथनानां मेलनं कुर्वन्तु। रूढिबद्धधारणानां कृते कीदृशानि आह्वानानि सन्ति, एतस्मिन् विषये चर्चां कुर्वन्तु-

(क) द्वौ चिकित्सकौ भोजनं कुर्वन्तौ आस्ताम् तयोः एकः दूरवाण्या दूरवाणीं कृत्वा	१. श्वासरोगस्य पुरातनः रोगी अस्ति
(ख) येन बालकेन चित्रकलाप्रतियोगिता विजिता, सः मञ्चे	२. अन्तरिक्षयात्रीभवनस्य स्वप्नः अन्ततः पूर्तिम् अगात्।
(ग) संसारस्य सर्वेषु तीव्रतमेषु धावकेषु एकः	३. स्वपुत्र्या वार्ता कृता या तस्मिन् समये तदैव विद्यालयतः प्रत्यागता आसीत्।
(घ) सा बहुधनाढ्या नास्ति परन्तु तस्याः	४. पुरस्कारं प्राप्तुं केनचित् चक्रासन्देन गतवान्

२. बालिकाः माता-पित्रोः कृते भारभूताः सन्ति, इयं रूढिबद्धा धारणा कस्याश्चित् कन्यायाः जीवनं कथं प्रभावयति? तस्य पृथक्-पृथक् पञ्चप्रभावाणाम् उल्लेखं कुर्वन्तु।

३. भारतस्य संविधानं समानतायाः विषये किं कथयति? भवन्तः कस्मात् कारणात् अनुभवन्ति यत् जनेषु समानता अवश्यमेव भवितव्या?

४. कदाचित् जनाः अस्माकम् उपस्थितौ एव पूर्वाग्रहप्रेरितम् आचरणं कुर्वन्ति। एतस्याम् अवस्थायां वयं कस्यचित् विरोधकरणस्य स्थितौ न भवामः, यतोहि सम्मुखे किमपि कथने काठिन्यम् अनुभूयते। स्वकक्षां द्वयोः समूहयोः विभज्यताम् अपि च प्रत्येकं समूहः एतस्मिन् विषये चर्चां कुर्यात् यत् प्रदत्तपरिस्थितौ ते किं करिष्यन्ति?

(क) निर्धनतायाः कारणात् कस्मैचित् सहपाठिने भवतः मित्रं जुगुप्सते।

(ख) भवान् स्वपरिवारेण सह दूरदर्शनं पश्यति तत्र कश्चित् सदस्यः कस्मिंश्चित् धार्मिकसमुदाये पूर्वाग्रहग्रस्तटिप्पणीं करोति।

(ग) भवत्याः कक्षायाः बालकाः कयाचित् बालिकया सह भोजनं कर्तुम् अनङ्गीकुर्वन्ति यतोहि ते चिन्तयन्ति यत् सा मलिना अस्ति।

(घ) कस्यचित् समुदायविशेषस्य उच्चारणस्य परिहासं कुर्वन् कश्चित् भवन्तं हास्यकणिकां श्रावयति।

(ङ) बालकाः बालिकानां विषये टिप्पणीं कुर्वन्ति यत् ताः बालिकाः बालकानाम् इव न क्रीडितुं शक्नुवन्ति।

उपर्युक्त-परिस्थितिषु विभिन्नसमूहाः कीदृशस्य व्यवहारस्य विषये वार्तां कृतवन्तः सन्ति, एतस्मिन् विषये कक्षायां चर्चां कुर्वन्तु सार्धमेव एतेषां प्रकरणानाम् अथवा अभिप्रायाणाम् उपरि चर्चाकाले कक्षायां काः काः समस्याः आगन्तुं शक्नुवन्ति एतस्मिन् विषये अपि वार्तालापं कुर्वन्तु।

इति द्वितीयः अध्यायः

घट्टः – ii

सर्वकारः

स्थितिः असमीचीना नास्ति अवश्यं पार्श्वस्थे ग्रामे नलेन जलम् आगच्छत् स्यात्।

अहं तं लघ्वीं मालां रचयितुम् उक्तवान् आसम्... सः दुर्बलः-कृशः वृद्धः च जनः अस्ति तथा च एतावत्याः भारयुक्तायाः मालायाः भारं सः न सोढुम् शक्ष्यति।

लोकतन्त्रे कस्यचित् व्यङ्ग्यचित्रकारस्य कार्यम् अस्ति यत् स व्यङ्ग्यचित्राणां माध्यमेन स्वाधिकाराणां प्रयोगम् आलोचनां कर्तुं व्यङ्ग्यं कर्तुम् अपि च राजनेतॄणां दोषान् अन्वेष्टुं कुर्यात्....

- आर.के.लक्ष्मणः

तृतीयः अध्यायः

सर्वकारः किम् अस्ति?

भवन्तः सर्वकारशब्दस्य विषये अनेकधा श्रुतवन्तः भविष्यन्ति । अस्मिन् पाठे भवत्यः सर्वकारस्य विषये पठिष्यन्ति यत् सर्वकारः किं अस्ति? अयम् अस्माकं जीवने कियान् महत्वपूर्णः अस्ति। सः कीदृशं दायित्वं निर्वहति तथा च निर्णयान् कथं स्वीकरोति? विविधसर्वकाराणां विषये यथा लोकतान्त्रिकसर्वकारस्य राजतंत्रीयसर्वकारस्य च मध्ये किम् अन्तरम् अस्ति? आगच्छन्तु, पठित्वा जानीमः .....

सर्वकारात् कर्मकराणाम् अधिकाराणां रक्षायाः याचना

जलौघपीडितानां कृते सर्वकारस्य पक्षतः पुनर्वाससामग्री

अङ्गारविद्युद्विभागयोः पुनर्गठनस्य पक्षे अस्ति सर्वकारः

पलाण्डोः मूल्ये वृद्धिः–सर्वकारेण पलाण्डोः मुल्यं निर्धारितम्

सर्वोच्च-न्यायालयस्य कृते इतोऽपि पञ्च न्यायाधीशाः

सर्वकारेण १५००० इत्यतः अधिकाः ग्रामाः अनावृष्टिग्रस्ताः इति घोषिताः

उपरि प्रदत्तान् समाचारपत्रस्य मुख्यांशान् पश्यन्तु। एतेषु सर्वकारस्य येषां कार्याणां विषये चर्चा क्रियते तेषां सूचीं कुर्वन्तु।

१ २

३ ४

किं सर्वकारस्य कार्यं बहुविस्तृतं नास्ति? भवताम् अनुसारं सर्वकारः किमस्ति? कक्षायाम् एतस्मिन् विषये चर्चां कुर्वन्तु ।

प्रत्येकं देशस्य कृते विभिन्ननिर्णयान् स्वीकर्तुं कार्याणि च कर्तुं सर्वकारस्य आवश्यकता भवति। एते निर्णयाः बहु-विषय-सम्बन्धिताः भवितुं शक्नुवन्ति- यथा विद्यालयाः राजमार्गाः च कुत्र निर्मातव्याः, यदा किञ्चित् वस्तु महार्घं जायते तदा तस्य मूल्यं न्यूनं कथं स्यात् अथवा विद्युतः आपूर्त्यर्थं सा कथं वर्धेत। सर्वकारः बहु-सामाजिकविषयाणां

क्रियान्वयनं करोति उदाहरणार्थं सर्वकारः निर्धनानां साहाय्यं कर्तुं कार्यक्रमान् चालयति। एतदतिरिच्य सः अन्यानि महत्त्वपूर्णानि कार्याणि अपि करोति, यथा पत्रालय-सेवा-सञ्चालनं तथा च रेलसेवा-सञ्चालनम्।

सर्वकारस्य कर्तव्यं देशस्य सीमानां सुरक्षा तथा अपरैः देशैः सह शान्तिपूर्ण-सम्बन्ध-स्थापनमपि अस्ति 0। तस्य कर्तव्यम् इदमपि अस्ति यत् देशस्य सर्वे नागरिकाः पर्याप्तमात्रया भोजनं सम्यक् स्वास्थ्य-सौविध्यानि च प्राप्नुयुः यदा प्राकृतिकविपदः समायान्ति यथा सुनामीसमस्या अथवा भूकम्पनकारणात् समस्याः भवन्ति तस्मिन् काले मुख्यरूपेण सर्वकारः एव पीडितानां जनानां सहायतां करोति। यदि कुत्रचित् कश्चित् विवादः भवति अथवा कश्चित् अपराधं करोति तदा जनाः

कानिचन उदाहरणानि यानि सर्वकारस्य अङ्गभूतानि सन्ति- सर्वोच्चन्यायालयः, भारतपेट्रोलियमः, भारतीयरेलः

न्यायालयं गच्छन्ति न्यायालयः अपि सर्वकारस्य एव अङ्गभूतः अस्ति।

प्रायेण भवताम् एतत् सर्वं श्रुत्वा पठित्वा वा आश्चर्यं स्यात् यत् सर्वकारः एतावन्ति कार्याणि कथं कर्तुं पारयति तथा च सर्वकारस्य कृते एतानि कार्याणि किमर्थम् आवश्यकानि सन्ति। यदा जनाः सम्भूय तिष्ठन्ति अथवा सम्भूय कार्याणि कुर्वन्ति तदा कस्याश्चित् व्यवस्थायाः आवश्यकता भवति यस्याः आवश्यकनिर्णयाः स्वीक्रियेरन्।

किं भवन्तः सर्वकारस्य एतदृशानां कार्याणां कानिचन उदाहरणानि दातुं शक्नुवन्ति येषां चर्चा उपरि न कृता अस्ति?

१

२

३

केषाञ्चित् निर्णयाणाम् आवश्यकता भवति ये सर्वेषाम् उपरि क्रियान्वयिताः भवेयुः। उदाहरणार्थं संसाधनानां नियन्त्रणस्य आवश्यकता भवति

यतोहि जनाः सुरक्षिताः अनुभवेयुः। जनानां कृते सर्वकारः बहुविधानि कार्याणि करोति। सः नियमान् रचयति निर्णयान् च स्वीकरोति तथा च स्वसीमायां ये जनाः वसन्ति तेषाम् उपरि तान् नियमान् क्रियान्वयितान् करोति।

सर्वकारस्य स्तराः

अधुना भवन्तः ज्ञातवन्तः यत् सर्वकारः केषां केषां पृथक् पृथक् कार्याणां कृते उत्तरदायी अस्ति तर्हि किं भवत्यः चिन्तयितुं शक्नुवन्ति यत् सर्वकारः एतेषां सर्वेषां कार्याणां कृते व्यवस्थां कथं करोति? वस्तुतः सर्वकारः भिन्नेषु भिन्नेषु स्तरेषु कार्यं करोति- स्थानीये स्तरेण राज्यस्तरेण अपि च राष्ट्रीयस्तरेण। स्थानीयस्तरस्य अभिप्रायः भवतां ग्राम-नगरोपनगराभ्यां च अस्ति। राज्यस्तरेणाभिप्रायः अस्ति यः सम्पूर्णस्य राज्यस्य विषये उत्तरदायी स्यात् यथा हरियाणायाः असमस्य च सर्वकारः सम्पूर्णे राज्ये कार्यं करोति। मानचित्राणि पश्यन्तु। राष्ट्रियस्तरस्य सर्वकारस्य सम्बन्धः सम्पूर्णदेशेन भवति। एतस्मिन् पुस्तके भवत्यः अग्रे पठिष्यन्ति यत् स्थानीयसर्वकारः कथं कार्यं करोति तथा च अग्रिमासु कक्षासु राज्यस्तरेण राष्ट्रियस्तरेण च सर्वकारस्य कार्याणां विषये पठिष्यन्ति ज्ञास्यन्ति च।



सूचना- आन्ध्रप्रदेशराज्यस्य पुनर्गठनानन्तरं जूनमासस्य द्वितीये दिङ्नाके तेलंगाना भारतस्य २९तमं राज्यं जातम्।

सूचना- आन्ध्रप्रदेशराज्यस्य पुनर्गठनानन्तरं जूनमासस्य द्वितीये दिङ्नाके तेलंगाना भारतस्य २९तमं राज्यं जातम्।

सर्वकारः अधिनियमः च

सर्वकारः अधिनियमं रचयति अपि च देशे विद्यमानैः सर्वैः जनैः ते पालनीयाः भवन्ति। केवलम् एषः एव उपायः अस्ति येन सर्वकारः कार्यं कर्तुं शक्नोति। यथा सर्वकारस्य पार्श्वे अधिनियम-निर्माणस्य सामर्थ्यं भवति तथैव एषा शक्तिः अपि भवति यत् जनाः अधिनियमान् पालयितुं बाध्याः भवेयुः। उदाहरणार्थं यानचालकस्य पार्श्वे चालन-स्वीकृतिपत्रं स्यात्। यदि कश्चित् प्रमाणपत्रेण विना वाहनं चालयति तथा च सः आरक्षकैः गृह्यते तदा तेन कारगारस्य दण्डः स्वीकरणीयः भवति अथवा दण्डशुल्कः दातव्यः भवति।

कञ्चित् अधिनियमम् अधिकृत्य विचारयन्तु यत् जनानां कृते तस्य पालनं किमर्थम् आवश्यकम् अस्ति

सर्वकारः यादृशं क्रियान्वयनं कर्तुं शक्नोति तदतिरिच्य जनाः अनुभवन्ति यत् कस्यचित् अधिनियमस्य अनुपालनं सम्यक्प्रकारेण न भवति तदा ते अपि कानिचन कार्याणि कर्तुं शक्नुवन्ति। उदाहरणार्थं यदि जनः अनुभवेत् यत् तस्य धर्मस्य जातेः च कारणात् तस्य कस्यचित् उद्योगे चयनं न जातं तर्हि सः न्यायालयं गन्तुं शक्नोति तथा च तत्र वक्तुं शक्नोति यत् अधिनियमस्य पालनं न भवति। तदा न्यायालयः आदिक्ष्यति यत् कीदृशस्य समाधानस्य आवश्यकता अस्ति।

सर्वकारस्य प्रकाराः

सर्वकाराय निर्णयस्वीकरणस्य सामर्थ्यं तथा च अधिनियमान् पालयितुम् अर्थात् जनाः नियमान् पालयितुं बाध्याः भवेयुः एतादृशीं शक्तिं कः ददाति?

एतस्य प्रश्नस्य उत्तरम् एतस्मिन् विषये आश्रितम् अस्ति यत् तस्मिन् देशे कीदृशः सर्वकारः अस्ति।

लोकतन्त्रे तु जनाः एव सर्वकाराय एतादृशीं शक्तिं ददति। जनाः एतादृशं व्यवहारं निर्वाचनस्य माध्यमेन कुर्वन्ति। ते स्वस्य रुच्यनुगुणं नेतुः चयनं कृत्वा तस्मै मतदानं कुर्वन्ति एकदा चयनानन्तरम् एते जनाः सर्वकारस्य निर्माणं कुर्वन्ति । लोकतन्त्रे सर्वकारेण ये निर्णयाः स्वीक्रियन्ते अथवा यानि कार्याणि क्रियन्ते तेषाम् आधारः कः इति जनानां पुरतः वक्तव्यं भवति तथा च स्वस्य पक्षः अपि उपस्थापनीयः भवति।

कश्चित् अपरप्रकारकः सर्वकारः भवति सः राजतन्त्रीयः सर्वकारः इति उच्यते। एतस्मिन् राज्ञः राज्ञ्याः च समीपे निर्णयस्वीकरणस्य सर्वकारस्य सञ्चालनस्य च शक्तिः भवति राज्ञः पार्श्वे परामर्शदातृणां कश्चित् समूहः भवति येन समूहेन सः



लोकतन्त्रे जनानां सहभागिता तेषां निर्णयानां स्वीकरणे महत्त्वपूर्णा अस्ति ये तान् प्रभावयन्ति। किं भवन्तः तेभ्यः सहमताः सन्ति? स्वस्य उत्तरस्य कारणद्वयं लिखन्तु।

- भवतां क्षेत्रे यादृशी शासनव्यवस्था अस्ति तस्य स्थाने भवत्यः कीदृशीं शासनव्यवस्थाम् एषिष्यन्ति? अपि च किमर्थम्?
- अधोलिखित-कथनेषु ये दोषाः सन्ति तान् परिष्कृत्य लिखन्तु।
- राजतन्त्रे देशस्य नागरिकाणां कृते मुक्तता भवति ते इच्छानुसारं नेतुः चयनं कर्तुं शक्नुवन्ति।
- लोकतन्त्रे कस्यचित् राज्ञः पार्श्वे देशस्य उपरि शासनं कर्तुं सम्पूर्णा शक्तिः भवति।
- राजतन्त्रे राज्ञा राज्ञ्या च ये निर्णयाः स्वीकृताः तेषु निर्णयेषु जनाः प्रश्नान् कर्तुं शक्नुवन्ति।

विविधेषु विषयेषु चर्चां करोति। अन्तिमनिर्णयस्य शक्तिः राज्ञः पार्श्वे एव भवति लोकतन्त्रवत् राजतन्त्रे अपि राज्ञा राज्ञ्या च निर्णस्य कः आधारः इति विषये चर्चा न करणीया भवति न च स्वकीयानां निर्णयानां विषये स्वपक्षः उपस्थापनीयः भवति।

लोकतान्त्रिकसर्वकारः

भारतं किञ्चित् लोकतन्त्रम् अस्ति। एतां लोकतान्त्रिकव्यवस्थां प्राप्तुम् अस्माभिः दीर्घकालिकः सङ्घर्षः कृतः। संसारे अन्ये अपि बहवः देशाः सन्ति यत्र जनैः लोकतन्त्रम् आनेतुं सङ्घर्षाः कृताः सन्ति। उपर्युक्तमस्ति यत् लोकतन्त्रस्य मुख्यविषयः अयम् अस्ति यत् जनानां पार्श्वे स्वनेतुः चयनस्य शक्तिः भवति। अतः एकस्मिन् अर्थे लोकतन्त्रं जनानामेव शासनं भवति।

लोकतन्त्रे मूलभूतविचारः अयम् अस्ति यत् जनाः नियमनिर्माणे सहभागिनः भूत्वा स्वयमेव शासनं कुर्युः। अद्यत्वे लोकतान्त्रिकसर्वकारः प्रायः प्रतिनिधिः लोकतन्त्रः उच्यते। प्रतिनिधि-लोकतन्त्रे जनाः प्रत्यक्षतः भागं न स्वीकुर्वन्ति अपितु निर्वाचनस्य प्रक्रियया स्वप्रतिनिधीन् चिन्वन्ति। एते प्रतिनिधयः मिलित्वा सम्पूर्ण-

मतदानकाले मतदातुः अङ्गुल्याः उपरि मश्याः चिह्नं क्रियते येन सः केवलं एकवारमेव मतदानं कर्तुं शक्नुयात्- ग्रामीणमतदान-केन्द्रस्य दृश्यम्।

जनतायै निर्णयान् स्वीकुर्वन्ति। अद्यत्वे कश्चिदपि सर्वकारः आत्मानं तावत्पर्यन्तं

लोकतान्त्रिकम् इति न वक्तुं शक्नोति यावत्पर्यन्तं सर्वेषां वयस्कनागरिकाणां कृते मतदानस्य अधिकारं न दद्यात्।

परन्तु सर्वकालतः एतादृशी व्यवस्था नासीत् किं भवत्यः विश्वसितुं शक्नुवन्ति यत् तादृशः अपि कालः आसीत् यदा लोकतान्त्रिक-सर्वकाराः महिलानां निर्धनानां च कृते निर्वाचने भागग्रहणात् वारयन्ति स्म? स्वस्य आरम्भिके काले सर्वकाराः केवलं तेषां जनानां कृते एव मतदानस्य अधिकारं यच्छन्ति स्म ये शिक्षिताः भवन्ति स्म अपि च येषां पार्श्वे स्वसम्पत्तिः भवति स्म। एतस्य अभिप्रायः आसीत् यत् अशिक्षितानां निर्धनानां महिलानां च कृते मतदानस्य अधिकारः नासीत्। एतस्यां स्थितौ देशाः तेषां नियमानाम् आश्रयेण एव चलन्ति स्म यान् नियमान् एते अङ्गुल्यधिष्ठिताः जनाः एव निर्मान्ति स्म।

भारते स्वतन्त्रतातः पूर्वं अल्पतराणां जनानां कृते एव मतदानस्य अधिकारः आसीत्। एतस्मात् कारणात् जनाः सम्भूय एतस्य अधिकारस्य विषये चर्चां याचनां च कृतवन्तः। गान्धिसहिताः अन्ये नेतारः एतस्य अन्यायपूर्णस्य व्यवहारस्य विरोधं कृतवन्तः। ते अपि दृढतया स्वयाचनां स्थापितवन्तः। १९३१ तमे वर्षे "यंग-इण्डिया-पत्रिकायां लिखन् गान्धिमहोदयः उक्तवान् आसीत्" यत् एतादृशं विचारं न सोढुं शक्नोमि यत् यस्य जनस्य पार्श्वे सम्पत्तिः अस्ति सः मतदानं कर्तुं शक्नोति परन्तु यः जनः यस्य पार्श्वे चरित्रमस्ति परन्तु सम्पत्तिः नास्ति शिक्षा वा नास्ति सः मतदानं न कर्तुं शक्नोति अथवा यः आदिनं दृढपरिश्रमं कृत्वा सत्यतया कार्यं करोति सः मतदानं न कर्तुं शक्नोति यतो हि तस्य दोषः एषः अस्ति यत् सः निर्धनः अस्ति....।"

संसारे कुत्रापि सर्वकारैः स्वेच्छया स्वशक्तिः जनैः सह न विभाजिता। सम्पूर्णे यूरोपे अमेरिकायां च महिलाः निर्धनाः च सर्वकारस्य कार्येषु सहभागितां ग्रहीतुं सङ्घर्षं कृतवन्तः।

महिलाभिः मताधिकारस्य कृते कृतसङ्घर्षेण प्रथम-विश्वयुद्धस्य काले इतोऽपि दृढता दर्शिता एतस्य आन्दोलनस्य नाम महिला-मताधिकारान्दोलनम् अस्ति तथा च आङ्ग्लभाषायाम् एतत् "सफ्रेज मूवमेंट" इति उच्यते। 'सफ्रेज' इत्यस्य आङ्ग्लशब्दस्य अर्थः भवति मतदानस्य अधिकारः। युद्धकाले बहवः पुरुषाः युद्धे संलग्नाः आसन् अतः महिलाः तानि कार्याणि कर्तुम् आहूताः यानि कार्याणि पूर्वं पुरुषाः कुर्वन्ति स्म यदा महिलाः विभिन्नानि कार्याणि कर्तुं तेषां योद्धृणां व्यवस्थां च कर्तुम् आरब्धवत्यः तदा जनाः एदद् कथयित्वा महान्तम् आश्चर्यं प्रकटितवन्तः यत् ते किमर्थं महिलानां विषये एतादृशीः रुढिवद्द्धाः धारणाः स्वमनसि स्थापितवन्तः आसन् यत् महिलाः एतादृशानि कार्याणि न कर्तुं शक्नुवन्ति। अनेन प्रकारेण महिलाः अपि निर्णयान् स्वीकर्तुं शक्नुवत्यः महिलाधिकारान्दोलनस्य सर्वाभिः माहिलाभिः स्वसखी-भावसम्पन्न-महिलाभिः च महिलानां मतदानस्य अधिकारस्य चर्चा कृता। तासां याचनायाः उपरि चिन्तनं स्यात् एतदर्थं ताः लौहशृङ्खलाभिः आत्मनः बन्धनं कृत्वा प्रदर्शनं कृतवत्यः। एतासु बह्व्यः क्रान्तिकारिण्यः महिलाः कारागारमपि गतवत्यः तथा च अनशनव्रतमपि पालितवत्यः। अमेरिकायां महिलाः मतदानस्य अधिकारं १९२० तमे वर्षे प्राप्तवत्यः अपि च इंग्लैडदेशस्य महिलाः इमम् अधिकारं कानिचनवर्षानन्तरं १९२८ तमे वर्षे प्राप्तवत्यः।

३३ पृष्ठे ३४ पृष्ठे च मानचित्राणि पश्यतु। तानि भारतस्य राज्यानि केन्द्रशासितप्रदेशान् अपि च जनपदान् दर्शयन्ति। एतैः मानचित्रैः विभिन्नसंसाधनैः च निम्नलिखितायाः सूचनायाः विषये जानन्तु।

- भारतस्य प्रतिवेशिदेशानां नामानि
- स्वराज्यस्य अथवा केन्द्रशासितप्रदेशस्य तथा च तेषां प्रतिवेशिनां नामानि
- स्वजनपस्य तस्य च प्रतिवेशिजनपदानां नामानि
- स्वजनपदात् राष्ट्रियराजधान्याः कृते गमनशीलः मार्गः

अधोलिखिततालिकायां प्रदत्तकथनानाम् उपरि दृष्टिपातं कुर्वन्तु। किं भवत्यः परिचेतुं शक्नुवन्ति यत् ते सर्वकारस्य केन स्तरेण सम्बन्धिताः सन्ति? तेषां पुरतः चिह्नं कुर्वन्तु।

	स्थानीयः	राज्यम्	राष्ट्रियः
भारतसर्वकारस्य रूसदेशेन सह मैत्री-सम्बन्ध-स्थापनस्य निर्णयः	०	०	०
पश्चिमबंगालसर्वकारस्य सर्वेषु सर्वकारीयेषु विद्यालयेषु अष्टमकक्षायां परिषदः परीक्षां स्वीकर्तुं निर्णयः	०	०	०
डिब्रूगढं कन्याकुमारीं चान्तरा नूतनरेलसेवाः प्रारम्भस्य निर्णयः	०	०	०
ग्रामे कस्यचित् सार्वजनिककूपस्य स्थानचयननिर्णयः	०	०	०
पटनायां बालकानां कृते बृहदुद्यान-निर्माणस्य निर्णयः	०	०	०
हरियाणासर्वकारस्य सर्वेषां कृषकाणां कृते निःशुल्करूपेण विद्युद्दानस्य निर्णयः	०	०	०
१००० रुप्यकाणां नूतनमुद्राप्रारम्भस्य निर्णयः	०	०	०

अभ्यासः

१. भवत्यः "सर्वकार" इति शब्दात् किम् अवगच्छन्ति? एकां सूचीं कुर्वन्तु यत् केन प्रकारेण सर्वकारः भवतीनां जीवनं प्रभावयति।
२. सर्वकाराय अधिनियमस्य रूपेण सर्वेषां कृते नियम-निर्माणस्य का आवश्यकता अस्ति?
३. लोकतान्त्रिक-सर्वकारस्य आवश्यकलक्षणानि कानि सन्ति?
४. महिला-मताधिकारान्दोलनं किम् अस्ति? तस्य उपलब्धिः का आसीत्?
५. गान्धिनः दृढविश्वासः आसीत् यत् भारते प्रत्येकं वयस्कस्य कृते मतदानस्य अधिकारः लभेत। परन्तु बहवः जनाः तस्य विचारेभ्यः सहमताः न सन्ति। बहवः जनाः अनुभवन्ति यत् ये जनाः अशिक्षिताः निर्धनाः च जनाः सन्ति तेषां कृते मतदानस्य अधिकारः न स्यात्। भवतीनां कः विचारः अस्ति? किं भवन्तः अनुभवन्ति यत् इदं भेदभावस्य रूपं भविष्यति?

चतुर्थः अध्यायः

लोकतान्त्रिक-सर्वकारस्य मुख्यतत्त्वानि

अस्मिन् पाठे भवत्यः लोकतान्त्रिक-सर्वकारस्य कार्याणि प्रभावयितुं केषाञ्चित् मुख्यतथ्यानां विषये पठिष्यन्ति। एतस्मिन् जनानां सहभागिता समस्यानां समाधानं समानतायाः न्यायस्य च विचाराः सम्मिलिताः सन्ति। एतानि सर्वाणि लोकतान्त्रिक-व्यवस्थां सफलीकुर्वन्ति। आगच्छन्तु एतां व्यवस्थां ज्ञातुं दक्षिणाफ्रीकायाः निवासिन्याः मायायाः कथां पठामः।



दक्षिणाफ्रीका कश्चित् तादृशः देशः अस्ति यत्र अनेक-प्रजातीनां जनाः निवसन्ति – श्वेताः अश्वेताः अपि च येषां त्वचः वर्णः श्यामः अस्ति यथा भारतीयाः एतादृशाः सर्वे जनाः तत्र निवसन्ति।

जोहांसबर्गस्य निवासिनी दक्षिणाफ्रीकायाः च बालिका माया-नायडू एकस्मिन् दिने स्वपुरातन-पेटिकानां स्वच्छताकार्ये स्वमातुः साहाय्यं करोति स्म। सा स्वच्छताकाले एकां सञ्चिकां प्राप्तवती तत्र समाचारपत्रस्य कर्तितांशैः चित्रैः च सा मञ्जूषा पूरिता आसीत्। तस्यां मञ्जूषायां कस्यचित् पञ्चदशवर्षस्य बालकस्य बहूनि चित्राणि आसन्। माया यदा स्वमातरं तस्य बालकस्य विषये पृष्टवती त तदा सा ज्ञातवती यत् तस्य नाम आसीत् – तदा सा ज्ञातवती यत् तस्य नाम आसीत्-हेक्टरपीटरसनः। तम् आरक्षकाः गुलिकाप्रहारेण मारितवन्तः आसन्। माया बहुदुःखम् अनुभूतवती। सा पृष्टवती – "किमर्थम्?"

मायायाः अम्बा तां बोधितवती यत् दक्षिणाफ्रीकापूर्वं वर्णभेदाधिनियमेन शासितम् आसीत्। रंगभेदस्य अभिप्रायः अस्ति त्वचः वर्णस्य आधारेण भेदभावः। दक्षिणाफ्रीकायाः प्रजातयः अनेन वर्णभेदेन एव पृथक्-पृथक्-समूहेषु विभक्ताः आसन्। तत्रत्यस्य अधिनियमस्य अनुसारं श्वेताश्वेत-भारतीयाः अन्याः प्रजातयः च परस्परं सम्बन्धं

निर्मातुम् स्वतन्त्राः न आसन् अर्थात् तासां कृते तादृशी आज्ञा न आसीत्। विभिन्न-प्रजातीनां जनाः न तु परस्परं मिलित्वा वसितुं शक्नुवन्ति स्म न च सामान्यसुविधानां प्रयोगं कर्तुं शक्नुवन्ति स्म। माया एतद्वचनं श्रुत्वा न विश्वसिति स्म। वर्णभेदाधिनियमस्य अन्तर्गतं यादृशं जीवनम् आसीत् तस्मिन् विषये ज्ञापयन्त्याः मायायाः अम्बायाः ध्वनिः क्रोधपूर्णः आसीत्। सा उक्तवती यत् श्वेतानाम् अश्वेतानां च जनानां चिकित्सालयाः पृथक्-पृथक् भवन्ति स्म तथा च चिकित्सालस्य

वाहनानि अपि पृथक्-पृथक् भवन्ति स्म। श्वेतजनानां कृते यानि चिकित्सा-वाहनानि भवन्ति स्म तानि सौविध्य-पूर्णानि भवन्ति स्म परन्तु अश्वेतजनानां कृते यानि वाहनानि भवन्ति स्म तेषु सौविध्यानि न उपलभ्यन्ते स्म। तयोः श्वेताश्वेतयोः कृते रेलबससुविधाः च अपि पृथक्-पृथक् भवन्ति स्म। तथा च बसस्थानकानि अपि पृथक्-पृथक् भवन्ति स्म।

अश्वेतजनानां कृते मतदानस्य आज्ञा नासीत् देशस्य सर्वोत्तमा भूमिः श्वेतजनानां कृते आसीत् परन्तु अश्वेतजनानां कृते कृष्यर्थं निःकृष्टाः भूमिः भवति स्म। एतस्मात् ज्ञायते यत् अश्वेतजनाः भारतीयाः च श्वेतजनसमाः न मन्यन्ते स्म। तैः सार्धं भेदभावः क्रियते स्म।

दक्षिण-पश्चिमभागे किञ्चित् नगरमासीत् सोवेटो, यत्र केवलम् अश्वेतजनाः एव निवसन्ति स्म। हेक्टरपीटरसनः तत्रैव निवसति स्म। तत्रत्याः श्वेतजनाः 'अफ्रीकान्स-भाषां वदन्ति स्म। हेक्टरस्य विद्यालस्य च अन्येषां विद्यार्थिनाम् उपरि एतां भाषां शिक्षितुं बलाघातः क्रियते स्म यद्यपि ते स्वभाषां 'जूलू"इत्येतां शिक्षितुम् इच्छन्ति स्म। हेक्टरः स्वसहपाठिभिः सह मिलित्वा 'अफ्रीकान्स-भाषाशिक्षणस्य विरोधं करोति स्म। दक्षिणाफ्रीकायाः आरक्षकाः विरोधकर्तॄन् क्रूरतया ताडितवन्तः अपि च तेषाम् उपरि गुलिकाप्रहारं कृतवन्तः। तदा गुलिकया हेक्टरः मृतवान्। इयं घटना जूनमासस्य १६दिनांके १९७६तमे वर्षे घटिता।

अफ्रीकीराष्ट्रिय-कांग्रेसस्य विख्यात-नेता नेल्सनमंडेला वर्णभेदस्य विरोधे चिरकालं यावत् संघर्षं कृतवान्। अन्ततः १९९४ तमे वर्षे सः साफल्यम् अवाप्तवान् तथा च दक्षिणाफ्रीका लोकतान्त्रिकदेशः अभवत्। तदारभ्य तत्र सर्वे प्रजातीनां जनाः समानरूपेण मन्यन्ते।

अश्वेतजनाः कथं भेदभावस्य सम्मुखीकरणं कुर्वन्ति स्म, एतस्य सूचीं कुर्वन्तु।

१

२

३

४

५

हेक्टरः तस्य मित्राणि च कं विषयम् अधिकृत्य संघर्षं कुर्वन्ति स्म?

किं सर्वैः जनैः सह समतायाः व्यवहारः आवश्यकः अस्ति? किमर्थम्?

आगच्छन्तु अधुना अवगमनस्य प्रयासं कुर्मः यत् सर्वकारस्य लोकतान्त्रिक-भवनस्य अस्माकं कृते कः अभिप्रायः अस्ति।

सहभागिता

अस्माकं देशे नियमितरूपेण निर्वाचनानि किमर्थं भवन्ति? गतपाठे भवत्यः पठितवत्यः यत् लोकतन्त्रे

कानिचन वार्त्तापत्राणि पश्यन्तु अपि च तेषु प्रदत्त-निर्वाचन-वार्त्तानाम् उपरि चर्चां कुर्वन्तु। कस्यचित् निर्धारितसमयस्य पश्चात् निर्वाचनानि भविष्यन्ति निर्वाचनानां का आवश्यकता अस्ति?

जनाः निर्णयान् स्वीकुर्वन्ति। निर्वाचनेषु मतदानं कृत्वा ते स्वप्रतिनिधीः चिन्वन्ति। एते प्रतिनिधयः एव जनानां पक्षतः निर्णयान् स्वीकुर्वन्ति। एतत् मत्वा कार्यं क्रियते यत् प्रतिनिधयः निर्णय-ग्रहण-काले जनानाम् आवश्यकताः याचनाः च मनसि निधाय निर्णयान् स्वीकुर्वन्ति । सर्वे सर्वकाराः कस्यचित् निश्चितकालाय चीयन्ते भारते एषः अवधिः पञ्च वर्षाणां कृते वर्तते। एकदा यदा सर्वकारस्य चयनं

अत्र कस्मिंश्चित् विषये सहमतिः अथवा असहमतिः प्रकटीक्रियते? सम्पादकस्य नाम्ना पत्रम्

स्थितिः असम्यक् नास्ति। अवश्यं पार्श्वस्थे ग्रामे नलात् जलम् आगच्छत् स्यात्

'सर्वकारः जलौघपीडितानां कृते क्षतिपूर्तिराशिम् अवश्यमेव दद्यात्।

क्रियान्वयनम्

अयं चिन्तायाः विषयः अस्ति यत् भारते व्याघ्राणां संख्या सततं न्यूनीभवति। वनचौराः तेषाम् आखेटं कृत्वा तान् मारयन्ति। एतत् कार्यं ते तेषां चर्मणः कृते कुर्वन्ति सर्वकारः एतं विषयं गभीरतया न स्वीकृतवान्। सर्वकारेण एतस्मिन् विषये शीघ्रं क्रियान्वयनं करणीयं वनचौराः शीघ्रं निगडिताः स्युः तथा च व्याघ्राणां सुरक्षार्थं ये अधिनियमाः रचिताः सन्ति तेषां क्रियान्वयनं स्यात्। यदि इत्थं न भविष्यति तर्हि आगामिदशवर्षेषु व्याघ्रः विलुप्तप्राणी भविष्यति।

सोहनपालः, गुवाहाटी, असमः

भित्तिचित्राणाम् उपरि प्रतिबन्धः स्यात्

भित्त्याः उपरि टङ्कितानि चित्राणि कस्यापि नगरस्य सौन्दर्यं नाशयन्ति कदाचित् चित्राणि महत्त्वपूर्ण-स्थानेषु साइनफलके च संश्लिष्यन्ते। राजमार्गस्य मानचित्रेषु अपि ते संश्लिष्यन्ते। सर्वे राजनैतिक-दलानि एतेषां चित्राणां प्रयोगे सहपरामर्शं कृत्वा प्रतिबन्धं स्थापयन्तु।

महेश-कपासी देहली

भवति तदा एतत् पञ्च वर्षाणि यावत् सत्तायां तिष्ठति। सर्वकारस्य पुनः सत्तायाम् आगमनं तदा सम्भवम् अस्ति यदा जनाः पुनः तस्य चयनं कुर्युः। निर्वाचनस्य समयः जनानां कृते सः समयः भवति यदा ते लोकतन्त्रे स्वशक्तेः अनुभवं कुर्वन्ति। अनेन प्रकारेण नियमित-निर्वाचनस्य कारणात् जनानां सर्वकारस्य उपरि नियंत्रणं तिष्ठति।

सहभागितायाः अन्ये उपायाः

निर्वाचनानि एकदा पञ्च वर्षाणां कृते भवन्ति। मतदानम् अतिरिच्य लोक-तान्त्रिक-सर्वकारस्य निर्णयेषु नीतिषु च जनानां भाग-ग्रहणस्य इतोऽपि अनेके उपायाः सन्ति। जनाः सर्वकारस्य कार्येषु रुचिं स्वीकृत्य तथा च तस्य आलोचनां कृत्वा अपि स्वसहभागितां निर्वहन्ति।

अगस्तमासे २००५ तमे वर्षे यदा केनचित् विशिष्टेन सर्वकारेण विद्युत्शुल्कं वर्धितम् आसीत् तदा जनाः स्वकीयं विरोधं दृढतया व्यक्तीकृतवन्तः। जनाः प्रदर्शनानि कृतवन्तः अपि च हस्ताक्षराभियानानि चालितवन्तः।

सर्वकारः स्वनिर्णयस्य रक्षणार्थं तर्कान् उपस्थापितवान्, जनान् बोधयितुं प्रयासं कृतवान्, परन्तु अन्ततः सः जनानां याचनां अङ्गीकर्तुं बाध्यः जातः अपि च विद्युतः वर्धितमूल्यं न्यूनीकृतवान्। सर्वकारः स्वनिर्णयं परिवर्तितुं बाध्यः जातः यतो हि सः सामान्यजनतां प्रति दायित्ववान् अस्ति।

एतादृशाः बहवः उपायाः सन्ति यैः जनाः स्वविचारं व्यक्तीकर्तुं शक्नुवन्ति तथा च सर्वकारं बोधयितुं शक्नुवन्ति यत् तेन कीदृशं क्रियान्वयनं करणीयं भवति। एतेषु उपायेषु प्रदर्शनानि पथसञ्चलनं हस्ताक्षराभियानं मार्गावरोधादयः च सम्मिलिताः सन्ति एतैः माध्यमैः ये निर्णयाः सम्यक् न सन्ति न्यायसङ्गताः च न सन्ति, ते पुरतः आनीयन्ते।

वार्त्तापत्राणि पत्रिकाः तथा च दूरदर्शनम् अपि जनता-सम्बद्ध-विषयाणाम् उपरि तथा च सर्वकारस्य कर्तव्यानां विषये चर्चयितुं महत्त्वपूर्णां भूमिकां निर्वहति।

यत्र एतत् सत्यम् अस्ति यत् लोकतन्त्रं जनेभ्यः सहभागितायाः अवसरं ददाति तत्रैव इदमपि सत्यमस्ति यत् सर्वेषां वर्गाणां जनाः एतादृशम् अवसरं न प्राप्नुवन्ति। जनेभ्यः सहभागितायाः कश्चित् अन्यः उपायः अयम् अपि अस्ति यत् ते आन्दोलनं कुर्युः। तत्र ते सर्वकारस्य या कार्यशैली अस्ति तस्मिन् विषये चर्चां कुर्युः यत् सा उत्तमा लाभप्रदा च अस्ति उत नास्ति।

दलितानाम् आदिवासिनाम् अल्पसंख्यकानां महिलानां च सहभागिता प्रायः एतेषाम् आन्दोलनानां माध्यमेन एव भवति।

यदि देशस्य जनाः जागरूकाः सन्ति अपि च एतस्मिन् विषये रुचिमन्तः सन्ति यत् देशः कथं चाल्यते तर्हि तस्य देशस्य सर्वकारस्य लोकतान्त्रिक-स्वरूपम् इतोऽपि दृढं भवति । अग्रिमे काले यदि अस्माकं नगरतः उपनगरतः ग्रामतः वीथीतः वा काचन पदयात्रा गच्छति तथा च वयं तां यात्रां गच्छन्तीं पश्यामः तर्हि क्षणं यावत् तत्र स्थित्वा ज्ञातुम् एषिष्यामः यत् पदयात्रा कस्मात् कारणात् क्रियते। तत्र भागग्रहीतारः जनाः के सन्ति अपि च ते कस्मिन् विषये प्रदर्शनं कुर्वन्ति । एतस्मात् वयं सरलतया ज्ञास्यामः यत् अस्माकं सर्वकारः कथं कार्यं करोति ।

विवादानां समाधानम्

भवत्यः मायायाः कथायां पठितवत्यः यत् कथं विवादानां समस्यानां वा समाधानार्थं कदाचित्

मायायाः कथां पुनः पठन्तु। किं भवन्तः अनुभवन्ति यत् आरक्षकैः हेक्टरस्य या हत्या कृता तस्याः निरोधः भवितुं शक्नोति स्म? कथम्?

जनैः हिंसायाः प्रयोगः क्रियते। एतादृशम् एतस्मात् कारणात् भवति यत् कश्चित् समूहः चिन्तयति यत् अपरः समूहः विरोधं न कुर्यात् तं वारयितुं बलप्रयोगः उचितः अस्ति।

विवादः तदा प्रादुर्भवति यदा विभिन्नानां संस्कृतीनां धर्माणां क्षेत्राणां तथा च आर्थिक-पृष्ठभूमीनां जनाः परस्परं सामञ्जस्यं न स्थापयितुं पारयन्ति। एतादृशं तदा अपि भवति यदा केचन जनाः अनुभवन्ति यत्

भारतीयसंविधाने आधारभूताः नियमाः अधिनियमाः च प्रदत्ताः सन्ति एते अधिनियमाः सर्वकारस्य जनानां च कृते सन्ति।सर्वैः एते पालनीयाः भवन्ति। विवादानां समाधानं एतेषाम् अधिनियमानाम आधारेण एव भवति।

तैः सार्धं भेदभावः क्रियते। जनाः स्वविवादान् समापयितुं हिंसात्मकोपायानाम् अपि प्रयोगं कुर्वन्ति यतः अन्येषु जनेषु भयस्य असुरक्षायाः च भावना प्रसरति। सर्वकारस्य इदं दायित्वं भवति यत् सः विवादानां शमनं कुर्यात्।

आगच्छन्तु, इदानीं वयं स्वसमाजस्य केषाञ्चित् विवादानां विषये पठामः तथा च अवगच्छाम यत् सर्वकारः एतेषां समाधानाय कीदृशं दायित्वं निर्वहति।

धार्मिक-पदयात्रा उत्सवाः च कदाचित् समस्यायाः कारणभूताः भवन्ति। उदाहरणार्थं धार्मिकपदयात्रा केन मार्गेण गच्छेत इदमेव कदाचित् विवादस्य कारणं जायते। कदाचित् हिंसायाः प्रादुर्भावस्य भयं जायते। कदाचित् पदयात्रा-कर्तारः उत्तेजिताः भवन्ति। कदाचित् जनाः पदयात्रा-प्रदर्शक-दलस्य उपरि पाषाण-खण्ड-क्षेपणस्य तं वारयितुं च प्रयत्नं कर्तुं शक्नुवन्ति। सर्वकारः, विशेषतया आरक्षकाः एतेषु अवसरेषु अतिमहत्त्व-पूर्णस्य कर्तव्यस्य निर्वहणं कुर्वन्ति। आरक्षकाणाम् इदं दायित्वं भवति यत् ते सुनिश्चितं कुर्युः यत् परस्परम् दलयोः मध्ये संघर्षः न स्यात् एतादृशी स्थितिः न उत्पद्येत हिंसायाः प्रादुर्भावः न स्यात्। आरक्षकाः सर्व-पक्षवतः जनान् एकस्मिन् स्थाने उपावेश्य वार्तालापं कारयन्ति यस्मात् च विवादस्य समाधानं भवेत्।



गतत्रिंशद्वर्षेभ्यः द्वयोः राज्ययोः मध्ये विवादस्य विषये सत्यपि कावेरी-शान्तभावेन प्रवहति।

नद्यः अपि वहुधा विवादस्य कारणभूताः जायन्ते। काश्चन नद्यः एकस्मात् अधिकेभ्यः राज्येभ्यः भूत्वा प्रवहन्ति। येभ्यः राज्येभ्यः नदी प्रवहति तेषां मध्ये नद्यः जलस्य वण्टनं विवादस्य कारणं जायते। उदाहरणार्थं भवत्यः कर्णाटकं तमिलनाडुं च अन्तरा कावेरीनद्यः जलम् अधिकृत्य जायमानस्य विवादस्य विषये श्रुतवत्यः स्युः। कर्नाटकस्य कृष्णाराजा-सागर-जलबन्धे(बांध) सङ्ग्रहीतं जलं बहुषु जनपदेषु सेचनार्थम् उपयुज्यते। अनेन जलेन बेंगलूरुनगरस्य जलावश्यकताः अपि पूर्यन्ते। तमिलनाडोः मेटूरजलबन्धके पूरितेन अनेन नद्यः जलेन राज्यस्य नदीमुख-पुलिन-भागस्य सेचनकार्यं भवति।

द्वौ अपि जलबन्धकौ एकस्यामेव नद्यां निर्मितौ स्तः। कर्णाटकस्य कृष्णाराजा-सागर-जलबन्धकः कावेरीनद्याः उपरिभागे वर्तते अपि च तमिलनाडुः मेटूरजलबन्धकः नद्याः अधोभागे स्थितः अस्ति। मेटूरजलबन्धके तदैव जलं पूरितं भवति यदा कृष्णाराजा-सागरबन्धतः जलस्य त्यागः स्यात् द्वयोः राज्ययोः कृते स्वजनेभ्यः पर्याप्तमात्रया जलस्य उपलब्धता स्यात् परन्तु तत् जलं न लभ्यते।

मायायाः कथायां सर्वकारः किम् एतस्य विचारस्य समर्थनं कृतवान् आसीत् यत् सर्वे जनाः समानाः सन्ति? डा.-अम्बेडकरस्य कथायां किम् अस्पृश्यतायाः व्यवहारतः समानतायाः विचारः आहतः जातः।

एतस्मात् विवादः जायते। तदा राष्ट्रियसर्वकारः द्वयोः मध्ये हस्तक्षेपं करोति किंचित् उपायं च करोति यस्मात् द्वयोः राज्ययोः कृते जलस्य सम्यक् वण्टनं स्यात्।

समानता न्यायः च

लोकतान्त्रिक-सर्वकारस्य मुख्यविचारेषु एकः अस्ति तस्य न्यायं समानतां च प्रति वचनबद्धता। न्यायः समानता च अन्योऽन्येभ्यः पृथक् न कर्तुं शक्यते।

अस्पृश्यतायाः प्रथायाः उपरि अधुना सर्वकारेण अधिनियमद्वारा प्रतिबन्धः स्थापितः अस्ति। चिरकालं यावत् दलिताः शिक्षातः यातायातसेवातः स्वास्थ्यसेवातः च वञ्चिताः आसन्। पूर्वम् एतादृशी स्थितिः आसीत् यत् ते सार्वजनिकमन्दिराणि अपि प्रवेष्टुं न शक्नुवन्ति स्म। डा.अम्बेडकरः यस्य विषये भवत्यः प्रथमे पाठे पठितवत्यः अपि च अन्ये जनाः अनुभूतवन्तः यत् एषा प्रथा अमानवीया अस्ति। न्यायः तदा प्राप्तुं शक्यते यदा सर्वैः जनैः सार्धं समानतायाः व्यवहारः भवेत्। सर्वकारः अपि समानतायाः न्यायस्य च आवश्यकतां परिचिनोति तथा च तेषां समूहानां कृते विशेषप्रावधानं करोति ये समाजे अधुना अपि समानदृष्ट्या न दृश्यन्ते। यथा अस्माकं समाजे एषा सामान्यप्रवृत्तिः अस्ति यत् जनाः बालकानां पालन-पोषणं बालिकानाम् अपेक्षया आधिक्येन कुर्वन्ति। एतस्य अभिप्रायः अस्ति यत् समाजः बालिकानां कृते तावत् महत्त्वं न ददाति यावत् बालकेभ्यः ददाति। इयं धारणा अनुचिता अन्यायपूर्णा च अस्ति। एतां दूरीकर्तुं सर्वकारेण केचन प्रयासाः कृताः सन्ति। सर्वकारेण कानिचन विशिष्टानि प्रावधानानि कृतानि सन्ति यतः बालिकाः आत्मभिः सार्धं जायमानेभ्यः अन्यायेभ्यः मुक्तिं प्राप्स्यन्ति। उदाहरणार्थं सर्वकारि-विद्यालये महाविद्यालये च बालिकानां शुल्कं समाप्तम् अस्ति अथवा बालकानाम् अपेक्षया न्यूनम् अस्ति।

* भवताम् अनुसारं बालिकाः विद्यालयं गन्तुं न्यूनशुल्क-प्रावधानेन कथं साहाय्यस्य अनुभवं करिष्यन्ति?
* किं भवन्तः केनापि सह जायमानं भेदभावं दृष्टवन्तः? उदाहरणं दत्वा बोधयन्तु यत्
  * एतस्याम् अवस्थायां भवन्तः तेषां कीदृशं साहाय्यं कृतवन्तः?
  * किम् अन्ये जनाः अपि भवतां तेन कार्येण सहमताः आसन्?
  * ये जनाः भेदभावं कुर्वन्ति स्म तान् भवन्तः कथं बोधितवन्तः?

अभ्यासः

१. अद्य दक्षिणाफ्रीकायां मायायाः जीवनं कथम् अभविष्यत्?
२. कैः विभिन्नैः उपायैः जनाः सर्वकारीयप्रक्रियासु भागं गृह्णन्ति?
३. विभिन्नानां विवादानां प्रकरणानां च निराकरणार्थं सर्वकारस्य आवश्यकता किमर्थं भवति?
४. सर्वैः जनैः सह समानतायाः व्यवहारः भवेत् एतं सुनिश्चेतुं सर्वकारः कीदृशं प्रयासं करोति?
५. एकदा पुनः पाठं पठित्वा लोकतान्त्रिक-सर्वकारस्य मुख्यतत्त्वानाम् सूचीं कुर्वन्तु। उदाहरणार्थं सर्वे जनाः समानाः सन्ति।

इति चतुर्थाध्यायः

तृतीयः घट्टः

स्थानीयसर्वकारः

प्रशासनं च

पञ्चमः अध्यायः

पञ्चसभाराज्यम्

जनाः यदा स्वप्रतिनिधीन् चिन्वन्ति तदनन्तरं किं भवति? ग्रामीणक्षेत्रेषु चितप्रतिनिधिभिः निर्णयाः कथं स्वीक्रियन्ते? यत्र वयं ग्रामसभां द्रक्ष्यामः, यस्यां जनाः प्रत्यक्षरूपेण भागं गृह्णन्ति अपि च स्वप्रतिनिधिभ्यः कार्यविवरणं याचन्ते।



अद्यतनं दिनं बहुविशिष्टम् अस्ति। सर्वे जनाः शीघ्रं शीघ्रं ग्रामसभां गच्छन्ति। किं भवन्तः जानन्ति किमर्थं? यतोहि पंचायतस्य निर्वाचनानन्तरम् अद्य ग्रामसभायाः उपवेशनं भवति। हरदास-ग्रामस्य जनाः इदं ज्ञातुम् अतीव उत्सुकाः सन्ति यत् नूतन-ग्राम-पञ्चसभा तेषां कृते कां योजनां कृतवती अस्ति।

ग्रामसभा कस्याश्चित् पञ्चसभायाः (पञ्चायत) क्षेत्रे निवासिनः सर्वेषां वयस्कानां सभा भवति । भवितुं शक्नोति यत् तस्मिन् केवलम् एकः ग्रामः स्यात् अथवा ततः अपि अधिकः । यथा अस्मिन् उदाहरणे प्रदत्तम् अस्ति । अनेकेषु राज्येषु प्रत्येकं ग्रामस्य ग्रामसभायाः उपवेशनं पृथक् पृथक् भवति । कोऽपि जनः यस्य आयुः अष्टादश वर्षं ततः अधिकं वा अस्ति, यस्मै मतदानस्य अधिकारः अस्ति तथा च यस्य नाम ग्रामस्य मतदानसूच्यां स्यात्, सः ग्रामसभायाः सदस्यः भवति ।

ग्रामसभा

ग्रामसभायाः उपवेशनस्य आरम्भे सरपंचः पंचः च राजमार्गस्य परिष्कार-निमित्तं जायमानस्य व्ययस्य विवरणं दत्तवान्। अयं राजमार्गः ग्रामं मुख्यमार्गेण योजयति। तदनन्तरं जलस्य न्यूनतायाः विषये चर्चा प्रारब्धा।

ग्रामस्य निवासिनी तिज्या वक्तुम् आरब्धवती, "हरदासग्रामे जलस्य न्यूनतायाः समस्या बाहुल्येन वर्धिता अस्ति। हैंडपम्पानां

एका पञ्चसभा बहुषु लघुषु क्षेत्रेषु विभक्ता भवति। प्रत्येकं वार्ड इति स्वकीयम् एकं प्रतिनिधिं चिनोति। यः वार्डपञ्च नाम्ना ज्ञायते। अनेन सह पञ्चायतक्षेत्रस्य जनाः मिलित्वा सरपञ्चं चिन्वन्ति, यः पञ्चायतस्य मुख्यः भवति। वार्डपञ्चः सरपञ्चः इति उभौ मिलित्वा ग्रामपञ्चसभायाः गठनं पञ्चवर्षाणां कृते कुर्वन्ति।

ग्रामपञ्चसभायाः कश्चन सचिवः भवति यः ग्रामसभायाः अपि सचिवः भवति। सचिवस्य निर्वाचनं न भवति। तस्य नियुक्तिः सर्वकारेण क्रियते। सचिवस्य कार्यम् अस्ति ग्रामसभा एवं ग्रामपञ्चसभायाः समितेः आह्वानम् तथा च या कापि चर्चा निर्णयः वा भवेत् तस्य सञ्चयीकरणम्।

जलस्तरः भूमेः अतीव नीचैः गतः अस्ति। काठिन्येन अतिन्यूनं जलम् हैंडपम्पेषु आगच्छति। महिलाभिः किलोमीटर-त्रय-दूरात् सुरुनद्याः जलम् आनेतव्यं भवति"।

केनचित् सदस्येन परामर्शः दत्तः यत् सुरुनद्याः जलं नलिकया आनीय ग्रामे कस्मिंश्चित् बृहति जलागारे पूरयामः तस्मात् जलस्यापूर्तिः वर्धिष्यते। परन्तु अपरे जनाः अनुभूतवन्तः यत् इयं महार्घप्रक्रिया भवितुं शक्नोति। ते उक्तवन्तः यत् अस्य वर्षस्य कृते हैंडपम्पम् अर्थात् जलयन्त्रकूपं भूमेः गहनतलं प्रति नयामः अपि च कूपान् शोधयामः।

तिज्या उक्तवती, "एतावता तु कार्यं न चलिष्यति! अस्माभिः काचित् सदृढा व्यवस्था करणीया भविष्यति यतो हि प्रत्येकं वर्षे जलस्तरः न्यूनीभवति। यावत् जलं भूमौ प्रविशति ततोऽपि अधिकं वयं प्रयोगं कुर्मः"।

ग्रामसभायाः अपरः कश्चित् सदस्यः अनवरः सर्वान् बोधितवान् यत् सः महाराष्ट्रस्य एकस्मिन् ग्रामे जलसंरक्षणस्य नूतनान् उपायान् दृष्टवान् अस्ति सः तस्मिन् ग्रामे स्वभ्रात्रा सह मेलितुं गतवान् आसीत्। सः जलसंवर्धन-विकासकार्यक्रमः (वाटर-शेड)इति उच्यते। सः श्रुतवान् आसीत् यत् सर्वकारेण एतस्य कृते धनराशिः अपि प्रदत्तः आसीत्। तस्य भ्रातुः ग्रामे जनाः पादपानां रोपणं कृतवन्तः आसन्, क्षुद्रनदेषु जलबन्धकान् अर्थात् लघु-जल-बन्धकान् निर्मितवन्तः आसन् अपि च जलागाराणां निर्माणं कृतवन्तः आसन्।

*ग्रामसभा का भवति?

*ग्रामसभायाः उपवेशने अधुनापर्यन्तं कासां कासां समस्यानाम् उपरि चर्चा अभवत्? तासां कीदृशानि समाधानानि उक्तानि न्ति।

अनवरस्य एषः विचारः सर्वेभ्यः अरोचत अपि च सर्वैः एतस्मिन् विषये ज्ञातुं पंचायतम् उक्तवन्तः।

ग्रामसभायां चर्चार्थम् अग्रिमः विषयः निर्धनतारेखायाः आसीत्, अधस्तने भागे ये जनाः सन्ति तेषां सूचिनिर्माण-काले अन्येषां जनानां स्वीकृति-प्रकटन-कार्यक्रमः। यथैव सूच्याम् अङ्कित-नामानि पठितुम् आरब्धानि, जनानां मध्ये आन्तरिकी चर्चा अजायत। नटवरः सद्यः एव वर्णयुक्तं दूरदर्शनयन्त्रं क्रीतवान् अस्ति अपि च तस्य पुत्रः तस्य कृते नूतनं द्विचक्रिकायानम् अपि प्रेषितवान् अस्ति। सः निर्धनतारेखाम् अधः कथं भवितुं शक्नोति? सूरजमलः स्वसमीपे उपविष्टं जनं शनैः उक्तवान्।



सरोजः सुखीबाई उक्तवान् "बिरज्वः नाम अस्यां सूच्यां कथम् आगतम्? तस्य पार्श्वे तु एतावती भूमिः अस्ति। एतस्यां सूच्यां तु केवलं निर्धनैः जनैः भवितव्यम्। ओमप्रकाशः कश्चित् श्रमिकः अस्ति तस्य पार्श्वे किंचिदपि भूमिः नास्ति सः काठिन्येन स्वकीयं निर्वाहं करोति परन्तु तस्य नाम एतस्यां सूच्यां नास्ति"। सुखीबाई उक्तवती यत् "भवन्तः तु जानन्ति एव नटवरः बिरजूः च अमीरचंदस्य मित्रे स्तः। अधुना अमीरचन्दं कश्चित् किमपि न वक्तुं शक्नोति? अमीरचंदः पूर्वं ग्रामस्य भूस्वामी आसीत् अपि च अधुना अपि सः महत्याः भूम्याः स्वामी अस्ति। परन्तु अस्माभिः ओमप्रकाशस्य नाम सूच्यां योजनीयम् एव"।

सरपंचः दृष्टवान् यत् जनानां मध्ये मन्दध्वनिना वार्तालापः भवति स्म। सः उक्तवान् यत्

ग्रामपंचायत्तः सम्पूर्णस्य ग्रामस्य हितार्थं निष्पक्षरूपेण कार्यं कर्तुं शक्नुयात् एतस्मिन् ग्रामसभायाः महत्त्वपूर्णम् योगदानं भवति। ग्रामसभायाः उपवेशने ग्रामपंचायत्तः स्वयोजनाः जनानां पुरतः उपस्थापयति। ग्रामसभा पंचायत्तं स्वैच्छिककार्यात् निरोद्धुं शक्नोति। सार्धमेव धनस्य दुरुपयोगः अपि च अनुचितकार्यं न भवेत् एतस्य निरीक्षणम् अपि करोति। अनेन प्रकारेण ग्रामसभा चितप्रतिनिधीनाम् उपरि दृष्टिं स्थापयति अपि च ते दायित्ववन्तः जागरूकाः च सदैव भवेयुः तन्निमित्तं महत्त्वपूर्णं कर्तव्यनिर्वहणं करोति।

यदि कश्चित् किमपि वक्तुमिच्छति तर्हि सः वदेत्। सरोजः सूरजमलं वक्तुं बाध्यं कर्तुम् इष्टवान् यत् सः नटवरस्य बिरज्वः च विषये किमपि पृच्छेत्। परन्तु सूरजमलः तूष्णीम्भूय स्थितवान्। अमीरचंदः ग्रामसभायाम् उपविष्टः सन् सर्वान् पश्यति स्म। सरोजः उत्थाय उक्तवान् यत् ओमप्रकाशस्य नाम सूच्यां स्यात्। अपरे जनाः अपि अवोचन् यत् ओमप्रकाशस्य परिवारः अतीव निर्धनः अस्ति। ग्रामणीः पृष्टवान् यत् तस्य नाम सूच्यां किमर्थं नासीत्। येन शिक्षकेण निर्धनतारेखाविषयकं सर्वेक्षणं कृतम् आसीत् तेन ज्ञापितं यत् सः ओमप्रकाशस्य गृहं बहुधा गतवान् परन्तु सर्वदा तस्य गृहे तालकम् आसीत्। सः प्रायः कुत्रचित् कार्यम् अन्वेष्टुं गतवान् आसीत्। प्रधानः निर्दिष्टवान् यत् ओमप्रकाशस्य पारिवारिकायस्य आकलनं भवेत् अपि च सः सर्वकारद्वारा निर्धारितराशितः न्यूनः अस्ति तर्हि तस्य नाम अपि सूच्यां सम्मिलितः भवेत्।

---

* *ग्रामसभायां निर्धनतारेखायाः अधोभागे आगन्तॄणां परिवाराणां या सूची निर्धारिता जायते स्म, किं तस्यां काऽपि समस्या आसीत्? यदि आसीत् तर्हि सा समस्या का आसीत्?*

* *सरोजः सूरजमलेन सह वक्तुं उक्तवान् पुनः अपि सः किमर्थम् तूष्णीम् अभूत्?*

* *किं भवत्यः अन्याः एतादृशीः घटनाः दृष्टवत्यः यत्र जनाः आत्मनः कृते अपि न वक्तुं शक्नुवन्ति? भवतीनाम् अनुसारम् एतादृशं किमर्थं भवति? मनुष्यः कस्मात् हेतोः न वदति?*

ग्रामपंचायत्तः

ग्राम-पंचायत्तस्य नियमितरूपेण उपवेशनं

महाराष्ट्रस्य द्वौ ग्रामप्रधानौ यौ २००५तमे वर्षे स्वपंचायत्ते उल्लेखनीयानि कार्याणि कर्तुं निर्मल-ग्राम-पुरस्कारेण सम्मानितौ।

भवति। तस्य मुख्यकार्यं तस्य क्षेत्रे ये ग्रामाः सन्ति तेषु विकास-कार्यक्रमाणां क्रियान्वयनं कारणीयं भवति। यथा भवद्भिः ज्ञातं ग्रामसभा एव पंचायत्तस्य कार्यस्य कृते स्वीकृतिं ददाति तदा पंचायत्तः स्वकार्यं कर्तुं पारयति।

केषुचित् राज्येषु ग्रामसभाः कार्यं कारयितुं समितीनां निर्माणं करोति उदाहरणार्थं निर्माणसमितिः। मन्यतां यत् ग्रामे किञ्चित् सामुदायिकभवनं निर्मापयितव्यम् तर्हि एतत् कार्यं निर्माणसमितिः करिष्यति। एतासु समितिषु केचन सदस्याः ग्रामसभायाः भवन्ति अपि च केचन पंचायत्तस्य। एतौ द्वौ मिलित्वा ग्रामस्य विकासार्थं कार्यं कुर्वन्ति। पश्यामः यत् हरदास-ग्राम-

ग्राम-पञ्चायत्तस्य कार्याणि

- राजमार्गाणां नलिकानां विद्यालयानां भवनानां जलस्य स्रोतसां तथा च अन्य-सार्वजनिकोपयोगस्य भवनानां निर्माणं तेषां संरक्षणम् च।
- स्थानीय-करस्थापनम् अपि च तस्य एकत्रीकरणं ग्राम्यजनानां कृते आजीविकादान-सम्बद्धानां योजनानां क्रियान्वयनम्।

ग्राम-पंचायत्तस्य आयस्य स्रोतांसि

- गृह्यकरात् विपणिकरात् च प्राप्यमाणः राशिः।
- विभिन्न-सर्वकारि-विभागैः क्रियान्वयित-योजनानां राशिः यः मण्डलात् मण्डलपंचायत्तः च आगच्छति।
- समुदायस्य कार्यार्थं लभमानः दानराशिः।

पञ्चायत्तेन कानि कानि कार्याणि कृतानि । हरदासग्रामस्य ग्रामसभया जलसमस्यां समाधातुं के के विकल्पाः प्रदत्ताः आसन् किं तान् भवन्तः स्मरन्ति ? यदा हरदासग्रामपंचायत्तस्य उपवेशनम् अभवत् केचन प्रमुखाः एतं विषयं पुनः चर्चार्थम् उपस्थापितवन्तः। एतस्मिन् उपवेशने पञ्चप्रमुखाः प्रमुखाः सचिवाः च उपस्थिताः आसन्। पंचायत्तस्य सदस्याः आदौ एकस्य कूपस्य गाभीर्यार्थं द्वयोः हस्तकूप-यन्त्रयोः शोधनार्थं च विचारितवन्तः यस्मात् ग्रामवासिनः जलरहिताः न तिष्ठेयुः। पञ्चप्रमुखेन परामृष्टं यत् यतोहि पंचायत्तस्य पार्श्वे हस्तनल-कूपयन्त्रस्य निरीक्षणार्थं किञ्चित् धनम् अस्ति तर्हि तदेव धनम् एतस्मिन् कार्ये योजयितुं शक्यते। एतस्मिन् विचारे सर्वे सदस्याः सहमतिं प्रकटितवन्तः तथा च सचिवः तेषां निर्णयं सञ्चिकायाम् उल्लिखितवान्।

तदनन्तरं सर्वे सदस्याः मिलित्वा समस्यायाः स्थायि-समाधानार्थं विचारणां कृतवन्तः। ते जानन्ति स्म यत् अग्रिमायाः ग्रामसभायाः उपवेशने ग्रामसभासदस्याः पुनः प्रश्नान् प्रक्ष्यन्ति। केचन प्रमुखाः शङ्कां कुर्वन्तः पृष्टवन्तः यत् किं जल-संरक्षणेन जलस्य स्तरे किमपि विशिष्टम् अन्तरम्

जलसंवर्धनविकास

कार्यक्रमे केवलं द्वयोः वर्षयोः एषा ऊषरभूमिः हरितिमायुक्तक्षेत्ररूपेण परिवर्तिता ।

हरदास-ग्राम-पंचायत्ते के के निर्णयाः स्वीकृताः?
किं भवन्तः अनुभवन्ति यत् एते निर्णयाः आवश्यकाः आसन्? किमर्थम्?
उपर्युक्तविवरणे प्रश्नं रचयतु यं जनाः अग्रिमे ग्रामसभायाः उपवेशने पंचायत्तं प्रष्टुं शक्नुवन्ति।



आगमिष्यति। एतस्मिन् विषये महती चर्चा अभूत्। अन्ततोगत्वा एषः निर्णयः अभवत् यत् ग्रामपंचायत्तः खण्ड-विकासाधिकारिणा सह वार्तालापं कृत्वा एतस्याः योजनायाः विषये अधिकां सूचनां सङ्ग्रहीकरिष्यति।

पञ्चायत्तस्य स्तरत्रयम्

हरदासग्रामस्य ग्रामसभायाः पंचायत्तस्य च विषये पठनानन्तरं भवन्तः ज्ञातवन्तः स्युः यत् पंचायत्ती-राजव्यवस्था काचित् एतादृशी प्रक्रिया अस्ति यया जनाः स्वसर्वकारस्य कार्यक्रमेषु भागं गृह्णन्ति पंचायत्ती-राजव्यवस्था लोकतान्त्रिक-सर्वकारस्य प्रथमं सोपानम् अस्ति। ग्रामपंचायत्तः ग्रामसभां प्रति उत्तरदायिनी भवति यतोहि ग्रामसभायाः जनाः एव तां चिन्वन्ति।

पंचायत्ती-राज-व्यवस्थायां जनानां सहभागिता द्वयोः इतोऽपि स्तरयोः भवति। ग्राम-पंचायत्तानन्तरम् अपरः स्तरः विकासखण्डस्य भवति। एषः जनपदपंचायत्तः अथवा पंचायत्तसमितिः उच्यते। एकस्यां ग्रामसमित्यां अनेके ग्रामपंचायत्ताः भवन्ति। पंचायत्तसमित्तेः उपरि जिलापंचायत्तः अथवा जिलापरिषद् भवति। एषः तृतीयः स्तरः भवति। जिलापरिषद् जनस्तरेण विकास-परियोजनाः परिकल्पयति। पंचायत्तसमित्तेः साहाय्येन मण्डलपरिषद् सर्वेषु पंचायत्तेषु आवण्टितराशेः वितरणस्य व्यवस्थां करोति।

संविधाने प्रदत्तनिर्देशानाम् आधारेण देशस्य प्रत्येकं राज्यं देश-सम्बद्धाधिनियमान् रचितवत् अस्ति। अतः पंचायत्त-सम्बन्ध्यधिनियमः प्रत्येकं राज्ये किञ्चित् पृथक् भवितुं शक्नुवन्ति। एतस्य पृष्ठे मुख्यः विचारः अयम् एव अस्ति यत् स्वग्रामस्य व्यवस्थायां जनानां सहभागिता वर्धेत अपि च ते स्वाभ्यर्थनाम् प्रस्तौतुम् अधिकाधिकाः अवसराः लभेरन्।

स्वाध्यापिकां निवेदयन्तु यत् सा कञ्चित् चितप्रतिनिधिं यथा प्रमुखं पंचप्रमुखं जनपद-परिषदः सदस्यं कक्षाम् आमन्त्रयेत् तेषां कार्याणां दायित्वानां च विषये वार्तालापं कुर्यात्।

अभ्यासः

१. हरदासग्रामस्य जनाः कासां समस्यानां सम्मुखीकरणं कुर्वन्ति स्म? ते स्वसमस्याः अपाकर्तुं किं कृतवन्तः?

२. भवतां विचारेण ग्रामसभायाः किं महत्त्वम् अस्ति? किं भवन्तः अनुभवन्ति यत्सर्वैः जनैः ग्रामसभायाः उपवेशने भागः ग्रहीतव्यः? किमर्थम्?

३. स्वक्षेत्रे अथवा स्वपार्श्वस्थे ग्रामे पंचायत्तद्वारा कृतस्य कस्यचित् एकस्य ग्रामस्य उदाहरणं स्वीकुर्वन्तु अपि च स्वस्य विषये निम्नलिखितानि तथ्यानि जानन्तु-

(क) इदं कार्यं किमर्थं कृतम्?

(ख) धनं कुतः आगतम्?

(ग) कार्यं पूर्णं जातम् अथवा न जातम्?

४. ग्रामसभा-ग्रामपञ्चायत्तयोः मध्ये किम् अन्तरम् अस्ति?

५. अधोलिखितं समाचारं पठन्तु अपि च प्रदत्तानां प्रश्नानाम् उत्तराणि यच्छन्तु-

चौफुला-शिरूरः राजमार्गे कश्चित् ग्रामः अस्ति निमोनः। अपरेषां ग्रामाणाम् इव गतबहुभ्यः मासेभ्यः एतस्मिन् ग्रामे पेयजलस्य महती समस्या अस्ति। ग्रामवासिनः स्वावश्यकतानां कृते जलवाहक-ट्रक-यानानाम् उपरि आश्रिताः सन्ति। एतस्य् ग्रामस्य ग्रामवासिनं महादेवलाडं(३५) सप्त जनाः मिलित्वा डण्डेन लोहदण्डेन च ताडितवन्तः। एतस्याः घटनायाः ज्ञानं तदा अभूत् यदा केचन जनाः अचेतनं लाडं चिकित्सार्थं चिकित्सालयं नीतवन्तः। पुलिसप्राथमिक्यां लाडः लेखितवान् यत् तस्योपरि आक्रमणं तदा अभूत् यदा सः जलवाहक-ट्रकयानात् जलं ग्राम्यजलागारे पूरयति स्म। जलागारः निमोन-ग्राम-पंचायत्तस्य जलापूर्तियोजनायाः अन्तर्गतं निर्मितः आसीत् यतः जलस्य समानरूपेण वितरणं स्यात्। परन्तु लाडस्य आरोपः आसीत् यत् उच्चजातेः जनाः एतस्य विरोधं कुर्वन्ति स्म। ते जल-वाहक-ट्रकयानस्य उपरि दलित-जातीनाम् अधिकारः नास्ति इति मन्यन्ते स्म।

इंडियन-एक्सप्रेस इत्यस्य कश्चित् समाचारः, १मईमासः २००४

(क) लाडः किमर्थं ताडितः आसीत्?

(ख) किं भवन्तः अनुभवन्ति यत् अयं कश्चन भेदभावस्य विषयः अस्ति? किमर्थम्?

६. जलसंरक्षणस्य तस्य लाभस्य च विषये इतोऽपि सूचनाः एकत्रीकुर्वन्तु।

इति पञ्चमोऽध्यायः

षष्ठोऽध्यायः

ग्रामस्य प्रशासनम्

भारते षड्लक्षाधिकाः जनाः सन्ति। तेषां जल-विद्युत-राजमार्गादीनां याः आवश्यकताः सन्ति तासाम् आपूर्तिः सरलं कार्यं नास्ति। एतदतिरिच्य भूमेः अभिलेखानां संरक्षणं करणीयं भवति। एतेषां सर्वेषां कार्याणां व्यवस्थार्थं ग्रामस्य प्रशासनिक-संरचना भवति। अस्मिन् पाठे वयं द्वयोः ग्रामीण-प्रशासनिकाधिकारिणोः कार्यस्य विषये किंचित् विस्तरेण पठिष्यामः।



ग्रामे कलहः

मोहनः कश्चित् कृषकः अस्ति। तस्य परिवारस्य पार्श्वे काचित् कृषियोग्या भूमिः अस्ति यस्यां सः बहुभ्यः वर्षेभ्यः कृषिं करोति। तस्य क्षेत्रेण सहैव संलग्नः रघोः क्षेत्रम् अस्ति। द्वयोः क्षेत्रे कयाचित् लघ्व्या क्षेत्रसीमया पृथक् भवतः।

एकस्मिन् प्रातः मोहनः दृष्टवान् यत् रघुः क्षेत्रसीमां किंचित् अग्रे वर्धितवान् आसीत् एवं कृत्वा सः मोहनस्य काञ्चित् भूमिं स्वक्षेत्रे मेलितवान् अपि च स्वक्षेत्रस्य आकारं सः वर्धितवान्। मोहनः कोपान्वितः जातः परन्तु सः किञ्चित् भयक्रान्तः अपि आसीत् रघोः परिवारस्य पार्श्वे बहुभूमिः आसीत् अपि च एतदतिरिच्य तस्य ज्येष्ठपितृव्यः ग्रामस्य पञ्चप्रमुखः आसीत्। पुनरपि मोहनः साहसपुरस्सरं रघोः गृहं प्राप्तवान्। द्वयोः मध्ये वाक्कलहः जातः। रघुः तु स्वदोषम् एव न स्वीकृतवान् यत् सः क्षेत्रसीमाम् अग्रे वर्धितवान् आसीत्। किञ्चित् कालानन्तरं तत्र कलहः प्रारब्धः।

रघुः स्वस्य एकं श्रमिकम् आहूतवान्। द्वौ मिलित्वा मोहनाय क्रुध्यतः स्म। पुनः ते मोहनस्य ताडनम् आरब्धवन्तः। कोलाहलं श्रुत्वा प्रतिवेशिनः बहिः आगताः। ते दृष्टवन्तः यत् मोहनस्य ताडनं भवति। मध्ये आगत्य ते मोहनस्य रक्षणं कृतवन्तः। मोहनस्य शिरसि हस्तयोः च अनेके व्रणाः जाताः। केनचित् प्रतिवेशिना तस्य प्रारम्भिक-चिकित्सा कृता। मोहनस्य कश्चित् मित्रं यः पत्रालये कार्यं करोति स्म परामर्शं दत्तवान् यत् मोहनः आरक्षकालयं गत्वा तत्र प्राथमिकीं लेखयेत्। परन्तु केचन जनाः एतस्य कार्यस्य विरोधं कुर्वन्ति स्म। ते अनुभवन्ति यत् आधिक्येन धनव्ययः भविष्यति अपि च परिणामः किञ्चित् अपि न आगमिष्यति। केचन जनाः उक्तवन्तः यत् रघोः परिवारजनाः तु पूर्वमेव आरक्षकालयं प्राप्तवन्तः भविष्यन्ति। चिरकालस्य विचार-विमर्शानन्तरम् इदं

निश्चितं यत् येषां प्रतिवेशिनां समक्षे मोहनस्य ताडनम् अभवत् अथवा एषा घटना घटिता मोहनः तान् सर्वान् स्वीकृत्य आरक्षकालयं गमिष्यति।

आरक्षकालयस्य क्षेत्रम्

आरक्षकालस्य मार्गे कश्चित् प्रतिवेशी पृष्टवान्, किं वयं किंचित् अधिकं धनव्ययं कृत्वा नगरस्य महान्तं आरक्षकालयं गच्छेम? मोहनः बोधितवान् यत् धनस्य वार्ता नास्ति। वयम् एतस्मिन् आरक्षकालये एव स्वप्राथमिकीं लेखयितुं शक्नुमः यतोहि अस्माकं ग्रामः एतस्मिन् कार्यक्षेत्रे एव आगच्छति।

प्रत्येकम् आरक्षकालस्य कश्चित् कार्यक्षेत्रं भवति यत् तस्य नियन्त्रणे भवति। जनाः तस्मिन् क्षेत्रे जातानां चौर्य-दुर्घटना-ताडन-कलहादीनां च प्राथमिकीं तस्मिन् आरक्षकालये एव लेखयितुं शक्नुवन्ति। इदं तत्रत्यस्य आरक्षकाधीशस्य दायित्वं भवति यत् सः जनेभ्यः घटनायाः विषये जानीयात् निरीक्षणं च कुर्यात् अपि च स्वक्षेत्रस्य अन्तर्विषयेषु क्रियान्वयनं कुर्यात्।

- यदि भवतः गृहे चौर्यं भवति तर्हि भवन्तः कम् आरक्षकालयं गत्वा स्वदूषणं लेखयितुं शक्ष्यन्ति?
- रघु-मोहनयोर्मध्ये कम् विषयम् अधिकृत्य विवादः अभवत्?
- मोहनः कस्मात् कारणात् रघुना सह कलह-समये बिभेति स्म?
- केचन जनाः उक्तवन्तः यत् मोहनेन आरक्षकालये प्राथमिकी लेखनीया अपरञ्च केचन जनाः उक्तवन्तः यत् एतत् कार्यं समीचीनं नास्ति। जनाः स्वपरामर्शस्य पक्षे कान् कान् तर्कान् दत्तवन्तः।



आरक्षकालये जायमानं कार्यम्

यदा सर्वे जनाः आरक्षकालयं प्राप्तवन्तः तदा मोहनः आरक्षकाधीशस्य पार्श्वे गतवान् अपि च तस्य पुरतः सर्वं विषयम् उपस्थापितवान्। सः एतद् अपि उक्तवान् यत् सः लिखितरूपेण स्वदूषणं दातुम् इच्छति। आरक्षकालयाधीशः दुर्व्यवहार-पुरस्सरम् क्तवान् यत्तस्य पार्श्वे लघुदूषणानां निरीक्षणाय समयः न अस्ति। मोहनः स्वव्रणान् अपि दर्शितवान् परन्तु आरक्षकालय-प्रमुखस्य उपरि कोऽपि प्रभावः न जातः। मोहनः आश्चर्यचकितः आसीत् यत् तस्य दूषणं वस्तुतः किमर्थं न लिख्यते स्म।

मोहनः बहिः गतवान् अपि च सः तस्य प्रतिवेशिनः आहूय आनीतवान्। प्रतिवेशिनः आरक्षकालय-प्रमुखं बोधितवन्तः यत् मोहनः तेषां समक्षे ताडितः। यदि ते तस्य रक्षणं न अकरिष्यन्

आरक्षकालये यत्किमपि जातं तत् कस्यचित् नाटकस्य रूपेण दर्शयन्तु। पुनः इदं बोधयतु यत् मोहनस्य आरक्षकालय-प्रमुखस्य प्रतिवेशिनां च दायित्वं निर्वहन्तः भवन्तः कथम् अनुभूतवन्तः? किं आरक्षकालय-प्रमुखः एतस्याः स्थितेः समाधानं केनचित् अन्येन उपायेन कर्तुं शक्नोति

तदा तस्य शरीरे इतोऽपि गभीरव्रणाः अभविष्यन्। तस्य प्राथमिकी योजिता भवेत् एतदर्थं ते प्रतिवेशिनः दृढतया उक्तवन्तः। अन्ततः आरक्षकालय-प्रमुखः सिद्धः जातः। सः मोहनं स्वदूषणं लिखित्वा दातुम् उक्तवान्। आरक्षकालय-प्रमुखः संकल्पं नीतवान् यत् अग्रिमे प्रातः कश्चित् सैनिकः घटनायाः निरीक्षणार्थं तस्य गृहम् गमिष्यति।

राजस्वविभागस्य कार्यम्

भवन्तः पठितवन्तः यत् रघुमोहनयोः मध्ये क्षेत्रस्य सीमाम् अधिकृत्य महान् कलहः जातः। किम् एतादृशः कश्चित् उपायः नासीत् यस्मात् तौ स्वविषयस्य शान्तिपूर्ण-रूपेण समाधानं कर्तुं शक्नुयाताम्। किं केचन एतादृशाः अभिलेखाः अथवा कीर्तिमानाः भवन्ति येभ्यः एतत् ज्ञानं भवेत् यत् ग्रामे कस्य पार्श्वे का भूमिः अस्ति? आगच्छन्तु, जानीमः यत् इदं कार्यं कथं क्रियते।

भूमेः मापनं अपि च तस्य विवरण-संरक्षण-कार्यं भूविवरण-स्थापकाधिकारिणः (पटवारी) मुख्यकार्यं भवति। भिन्नेषु भिन्नेषु राज्येषु सः पृथक्-पृथक् नाम्नः ज्ञायते- कुत्रचित् पटवारी कुत्रचित् लेखपालः कुत्रचित् कर्मचारी कुत्रचित् ग्रामीणाधिकारी कुत्रचित् च कानूनगो इति उच्यते। वयम् अत्र भूमेः विवरणस्थापकस्य कर्मचारिणः कृते पटवारी इति शब्दस्य प्रयोगं कुर्मः। प्रत्येकं पटवारी केषाञ्चित् ग्रामाणां कृते उत्तरदायी भवति अग्रिमे पृष्ठे प्रदत्तमान-चित्रानुसारं अपि च तस्य अनुसारं निर्मितसंचिकायाः विवरणं पश्यन्तु। अयं पटवारिद्वारा स्थापित-ग्रामस्य जनानां भूमेः विवरणस्य कश्चित भागः अस्ति।

सामान्यरूपेण पटवारिणां पार्श्वे क्षेत्रमापनस्य पृथक्-पृथक् उपायाः भवन्ति। बहुषु स्थानेषु कस्याश्चित् लम्बतरायाः लौहस्य शृङ्खलायाः प्रयोगं कुर्वन्तु। सः जरीबः इति उच्यते। उपरि प्रदत्तायां कथायां पटवारी मोहनस्य रघोः च क्षेत्राणि मापयित्वा इदं द्रष्टुं शक्नोति स्म यत् सः ग्रामस्य मानचित्रेण समतां भजते न वा । यदि तत् क्षेत्रं



यदि भवन्तः ग्रामीणक्षेत्रे निवसन्ति तदा जानन्तु – भवतां क्षेत्रस्य पटवारी कति ग्रामाणां कृते भूमेः अभिलेखान् स्थापयति? ग्रामवासिनः पटवारिणा सह कथं सम्पर्कं साधयन्ति?

मानचित्रेण समतां न भजते तदा सः ज्ञातुं शक्नोति यत् क्षेत्रसीमां अग्रे कृत्वा क्षेत्रस्य सीमा परिवर्तिता अस्ति।

सूचनां ददाति। इदं कार्यं सः स्वस्य विवरणानाम् आधारेण करोति।

नं	क्षेत्र-हैक्टेयर-मध्ये	भूस्वामिनः नाम, पितुः/पतेः नाम, पत्रसङ्केतः	यदि बटाई इत्यस्मिन् अस्ति तर्हि अपरस्य नाम तथा च बटाई इत्यस्य भागः	अस्मिन् वर्षे कर्षितभूमिः सस्यानि	क्षेत्रं	अन्यस स्यानि	परतीभूमिः सुविधाः
१	२	३	४	५	६	७	८
१	०७५	मोहनः,वल्दः राजारामः ग्रामः अमरापुरा भूस्वामी	न	सोयाबीन	०.७५ हेक्टेयरः		
२	३.००	रघुरामः वल्दः रतनलालः ग्रामः अमरपुरा भूस्वामी	न	सोयाबीनः,गेंहूँ सिंचितभूमिः	२.७५ हेक्टेयरः	१.७५	०.२५
३	६.००	मध्यप्रदेशसर्वकारीयः घासस्य क्षेत्रम्	नैव	-			

पटवारी कृषकेभ्यः भूमिकरम् अपि एकत्रीकरोति अपि च सर्वकारं स्वक्षेत्रे जायमानां सस्यानां विषये खसराख्यस्य अस्मिन् विवरणसञ्चिकायां पटवारी अधोलिखित-भूमेः मानचित्रस्य अनुसारं सूचनाः पूरितवान् अस्ति। एतस्मात् ज्ञायते यत् भूमेः कः खण्डः कस्य नाम्नः अस्ति। एतत् विवरणं तथा च मानचित्रं पश्यन्तु तथा च रघुमोहनयोः भूमेः सम्बन्धित-प्रश्नानाम् उत्तराणि यच्छन्तु।

अस्मिन् वर्षे कर्षिता भूमिः

(क) मोहनस्य क्षेत्रस्य दक्षिणे या भूमिः अस्ति सा कस्य अस्ति?

(ख) रघुमोहनयोः भूमेः मध्यस्थायाः सीमायाः उपरि चिह्नं योजयतु।



(ग) क्षेत्रसङ्ख्यात्रयं कः प्रयोक्तुं शक्नोति?



(घ) क्षेत्रसङ्ख्याद्वित्रिभ्यां सम्बन्धिता काः सूचनाः वयं प्राप्तुं शक्नुमः?

अतः आवश्यकम् अस्ति यत् सः तानि यथाकालं परिष्कुर्यात्। कृषकाः बहुधा सस्यस्य परिवर्तनं कुर्वन्ति किञ्चित् पृथक् प्ररोहन्ति अथवा कश्चित् कुत्रचित् कूपं खनति। एतेषां सर्वेषां विवरणस्थापनं सर्वकारस्य राजस्वविभागस्य भवति। एतस्य विभागस्य वरिष्ठजनाः एतस्य कार्यस्य निरीक्षणं कुर्वन्ति।

भारतस्य सर्वाणि राज्यानि मण्डलेषु विभक्तानि सन्ति। भूसम्बद्ध-विषयाणां व्यवस्थार्थम् एतानि मण्डलानि इतोऽपि लघुखण्डेषु विभक्तानि सन्ति। मण्डलस्य उपखण्डाः बहुभिः नामभिः ज्ञायन्ते यथा उपमण्डलं तालुकेत्यादिः। सर्वोच्चतमः मण्डलाधिकारी भवति तथा च तस्य अधः उपमण्डलाधिकरी भवति एतैः विभिन्नानां सदस्यानां समाधानं करणीयं भवति। एते पटवारी इत्यस्य कार्यस्य निरीक्षणं कुर्वन्ति अपि च सुनिश्चितं कुर्वन्ति यत् विवरणानि सम्यक्प्रकारेण स्थापितानि स्युः अपि च राजस्वस्य एकत्रीकरणं स्यात्। ते इदं कार्यम् अपि पश्यन्ति यत् कृषकाः सरलतया स्वविवरणम् आवश्यतायां सत्यां प्राप्तुं शक्नुयुः। ते विद्यार्थिभ्यः आवश्यकतायां सत्यां जाति-प्रमाण-पत्रादिकम् अपि यच्छन्ति। उपमण्डलाधिकरणः कार्यालये भूसम्बद्धविवादानां श्रवणं भवति।

कश्चित् नूतनः अधिनियमः

(हिन्द्वधिनियम-धारा, २००५)

कृषकाः प्रायः स्वक्षेत्रस्य मानचित्रस्य विवरणस्य च आवश्यकताम् अनुभवन्ति। एतदर्थं तैः किञ्चित् शुल्कं देयं भवति। कृषकाणां पार्श्वे एतस्य विवरणं प्राप्तुम् अधिकारः अस्ति। यद्यपि कदाचित् ते स्वक्षेत्राणां विवरणं सरलतया न प्राप्नुवन्ति। जनैः एतं प्राप्तुं बह्वीनां समस्यानां सम्मुखीकरणं करणीयं भवति। बहुषु राज्येषु एतानि सर्वाणि विवरणानि सङ्गणकयन्त्रे स्थापयित्वा पंचायत्तस्य कार्यालये स्थाप्यन्ते यतः तानि सरलतया जनानां कृते उपलब्धाः स्युः अपि च नूतनानां योजनानाम् अनुसारं नियमितरूपेण समीचीनतराणि भवेयुः।

भवन्तः किम् अनुभवन्ति यत् कृषकाणां कृते एतस्य विवरणस्य आवश्यकता कदा भवति? अधोलिखिताः स्थितीः पठन्तु अपि च तान् विषयान् परिचिन्वन्तु येषु भूमेः विवरणानि आवश्यकानि भवन्ति। इदम् अपि बोधयन्तु यत् तानि किमर्थम् आवश्यकानि भवन्ति?

- एकः कृषकः अपरकृषकात् भूमिं क्रेतुम् इच्छति।
- एकः कृषकः स्वसस्यम् इतरकृषकं विक्रेतुम् इच्छति।
- कश्चित् कृषकः स्वभूमौ कूपं खनितुं वित्तकोशतः ऋणम् इच्छति।
- कश्चित् कृषकः स्वक्षेत्राणां कृते उर्वरकं क्रेतुम् इच्छति।
- कश्चित कषकः स्वभमिं स्वपत्रपत्र्यादिष च वण्टयितम इच्छति।

यदा वयं तेषां कृषकाणां विषये चिन्तयामः येषां पार्श्वे भूमिः अस्ति तर्हि सामान्यरूपेण अस्माकं दृष्टौ पुरुषाः भवन्ति। महिलानां वैयक्तित्वं केवलं कृषिकार्ये कस्यचित् सहायकस्य केवलं मन्यते तासां विषये भूमेः स्वामिनीरूपेण कदाचित् अपि न चिन्त्यते। अद्यपर्यन्तं केषुचित् राज्येषु हिन्दुमहिलानां कृते परिवारस्य भूमेः भागः न लभते स्म। पितुः मृत्योः अनन्तरं भूमिः पुत्रेषु वण्ट्यते स्म। सद्य एव एषः अधिनियमः परिवर्तितः अस्ति। नूतनस्य अधिनियमस्य अनुसारं पुत्राणां पुत्रीणां तस्य मातुः च कृते भूमेः समानः भागः लभते। अयम् अधिनियमः सर्वेषु राज्येषु केन्द्रशासितप्रदेशेषु च क्रियान्वयितः भविष्यति।

एतस्मिन् अधिनियमे व्यापकसङ्ख्यायां महिलाः लाभान्विताः भविष्यन्ति। उदाहरणार्थं सुधा कस्यचित् कृषकपरिवारस्य ज्येष्ठतमा पुत्री अस्ति। सा विवाहिता अस्ति अपि च पार्श्वस्थे ग्रामे

कस्याश्चित् पुत्र्याः अभिलाषः

न्यासरूपेण प्राप्तम् इदं गृहम्
पिता अपि स्वपितुः इदं गृहं लप्स्यते
मम भ्राता अपि मम पितुः
परन्तु अहं मम माता च आवयोः किम्?
बोधिता अहं
पितुः गृहे भागस्य वार्तां महिलाः न कुर्वन्ति
परन्तु अहं स्वकीयं गृहम् इच्छामि
सर्वतः मम स्वगृहं
न इच्छाम्यहं दाने कौशेयं सुवर्णं च

अन्यसार्वजनिकसेवाः – कश्चित् सर्वेक्षणम्

अस्मिन् पाठे वयं सर्वकारस्य केषाञ्चित् प्रशासनिक-कार्याणां विषये पठितवन्तः, विशेषतया ग्रामीणक्षेत्रस्य सन्दर्भे। प्रथमम् उदाहरणम् अधिनियम-व्यवस्था-स्थापनस्य विषये आसीत् अपि च अपरः भूमेः अभिलेखानां व्यवस्थायाः विषये। प्रथमे सन्दर्भे अस्माभिः आरक्षकाणां भूमिकायाः परीक्षणं कृतम् अपि च अपरस्मिन् पटवारी-महोदयस्य कर्त्तव्यस्य विषये। एतेषां कार्यस्य विभागस्य अन्यजनैः निरीक्षणं क्रियते यथा पुलिसाधीक्षकः अथवा उपमण्डलाधिकारी। अस्माभिः इदमपि दृष्टं यत् एतेषां सौविध्यानां प्रयोगं जनाः कथं कुर्वन्ति अपि च तेषां पुरतः कीदृश्यः समस्याः समायान्ति। एतासां सेवानाम् उपयोगः अधिनियमानाम् अनुसारं भवेत्। भवद्भिः सम्भवतः सर्वकारस्य अन्यैः विभागैः प्रदत्ताः सार्वजनिकाः सेवाः दृष्टाः भविष्यन्ति।

स्वस्य ग्रामस्य क्षेत्रस्य च कृते दीयमानानां सार्वजनिक-सेवानां काञ्चित् सूचीं कुर्वन्तु- दुग्धोत्पादक-समितिः, अन्नापणः, वित्तकोशः, आरक्षकालयः, बीजोर्वरकयोः कृते कृषकसमितिः, पत्रालयः, आंगनवाटिका, सर्वकारिविद्यालयः, प्राथमिक-स्वास्थ्यकेन्द्रम्, चिकित्सालयादिः।

तिसृणां सार्वजनिकसेवानां विषये सूचनाः एकत्रीकुर्वन्तु अपि च स्वाध्यापिकया सार्धं चर्चां कुर्वन्तु यत् एतासां कार्यप्रणाल्यां कथं परिष्कारः कर्तुं शक्यते। भवतां कृते किञ्चित् उदाहरणम् अग्रे प्रदत्तम् अस्ति।

निवसति।

स्वस्य पितुः मृत्योः अनन्तरं सुधा प्रायः कृषेः कार्ये मातुः साहाय्यार्थम् आगच्छति। तस्याः माता पटवारीमहोदयम् उक्तवती यत् भूमौ अधुना पुत्रेण सह तस्याः द्वयोः पुत्र्योः च अपि नाम विवरणे आगच्छेत् ।

सुधायाः माता महता आत्मविश्वासेन कनिष्ठपुत्रस्य पुत्र्याः च साहाय्येन कृषेः कार्यं करोति। सुधा अपि निश्चिन्ता अस्ति यत् आवश्यकतायां सत्यां सा स्वभूभागस्य भूम्या स्वजीवन-निर्वहणं कर्तुं शक्नोति।

सार्वजनिकसभा	भवन्तः तेषां कार्यस्य विषये किं दृष्टवन्तः?	नियन्त्रणे आगम्यमानानि क्षेत्राणि	एतस्य सौविध्यस्य लाभं प्राप्तुं तैः किं करणीयम् अस्ति	ये इदं सर्वं प्रददति तेषां समस्याः	जनानां समस्याः	किं परिष्काराः कर्तुं शक्यन्ते?
अन्नस्य आपणः	अयम् आपणः उद्घटितः आसीत्। त्रयः जनाः आगतवन्तः तेषां पार्श्वे पीतवर्णस्य पत्राणि आसन्। सर्वे तण्डुलान् शर्करां च क्रीतवन्तः, मृत्तैलं न प्राप्तम्।	इदं द्वयोः ग्रामयोः कृते अस्ति।	भवतः कृते अन्नपत्रस्य आवश्यकता अस्ति,इदम् उपमण्डलाधिकारिणः कार्यालये निर्मीयते।	मृत्तैलस्य आपूर्तिः पूर्णा नास्ति।	तण्डुलाः बहु असमीचीनाः आगच्छन्ति। मृत्तैलं तु कदाचित् अपि न लभते।	शोभनाः तण्डुलाः आगच्छेयुः । मृत्तैलं लभ्येत । अन्नस्य आपणः प्रतिदिनम् उद्घटेत्।
स्वास्थ्यकेन्द्रम्						
दुग्धोत्पादकसमितिः						

अभ्यासः

१. आरक्षकाणां किं कार्यं भवति?
२. भूलेखाधिकारिणः कार्यद्वयं वदन्तु।
३. उपमण्डलाधिकारिणः किं कार्यं भवति?
४. "कस्याश्चित् पुत्र्याः अभिलाषः" इति कवितायां कस्य विषयस्य उत्थापनस्य प्रयासः कृतः अस्ति? किं भवन्तः एनं विषयं महत्त्वपूर्णम् इति अनुभवन्ति? किमर्थम्?
५. गतपाठे भवन्तः पंचायत्तस्य विषये पठितवन्तः। पंचायत्तस्य भूलेखाधिकारिणः च कार्यं परस्परं कथं सम्बद्धम् अस्ति?
६. कञ्चित् आरक्षकालयं गच्छन्तु अपि च जानन्तु यत् यातायात-नियन्त्रयितुम् अपराधं वारयितुम् अधिनियमव्यवस्थां च निर्मातुं आरक्षकाः किं कुर्वन्ति,विशेषतया उत्सवानाम् अथवा सार्वजनिकसमारोहानां काले।
७. एकस्मिन् मण्डले सर्वेषाम् आरक्षकालयानां प्रमुखः कः भवति? जानन्तु।
८. चर्चां कुर्वन्तु यत् नूतनस्य अधिनियमस्य अन्तर्गतं महिलाः कथं लाभान्विताः भविष्यन्ति।
९. भवतां प्रतिवेशे किं काचित् एतादृशी महिला अस्ति यस्याः नाम्नि भू-सम्पती स्याताम्? यदि अस्ति, तर्हि सा तां सम्पत्तिं कथं प्राप्तवती अस्ति?

इति षष्ठोऽध्यायः

अध्यायः – ७

नगरस्य प्रशासनम्

कस्यचित् ग्रामस्य अपेक्षया नगरं दीर्घतमं प्रथितं च भवति। नगरस्य वीथयः प्रथिताः भवन्ति, अत्रत्यासु विपणिषु जनसम्मर्दः अधिकः भवति। जलस्य विद्युतः च सुविधाः भवन्ति चिकित्सालयाः भवन्ति। अत्र बहूनि वाहनानि भवन्ति अपि च यातायात-नियन्त्रणस्य आवश्यकता भवति। किं भवद्भिः कदाचित् चिन्तितं यत् इदं सर्वं एतावता सुव्यवस्थित-रूपेण कथं चलति, का संस्था एतस्य सर्वस्य कृते उत्तरदायिनी भवति? कथं निर्णयाः स्वीक्रियन्ते? कथं योजनाः निर्मीयन्ते? के जनाः सन्ति ये एतत् सर्वं कार्यं कुर्वन्ति? आगच्छन्तु, उत्तरम् अन्वेष्टुं प्रयासं कुर्मः।



रविवासरस्य काचित् आलस्यपूर्णः मध्याह्नः आसीत् यदा माला तस्याः च सहयोगिनः शङ्करः जहांगीरः रेहाना च वीथ्यां क्रिकेट्क्रीडां क्रीडन्ति स्म। शङ्करः बहुशोभनम् ओवर इत्येतं क्षिप्तवान् आसीत् तथा च रेहाना आउट इति भवितुं शक्नोति स्म परन्तु कथमपि दैवयोगेन रक्षिता। रेहाना आउट इति न जायते स्म तस्मात् शंकरः हतोत्साहितः भवति स्म। अतः सः अनया आशया यत् सा कैचाउट् इति भविष्यति कश्चित् लघुकन्दुकक्षेपः कृतः। परन्तु तदा अपि विपरीतम् एव जातं सा वेगेन बल्लां भ्रामितवती तस्मात् कन्दुकः एतावान् उपरि गतः यत् वीथिदीपः एव भग्नः। रेहाना क्रन्दितवती" अरे! इदं मया किं विहितम्?" तदा शंकरः झटिति उक्तवान् यत् "भो वयम् एतं नियमं कर्तुं विस्मृतवन्तः यत् यदि भवत्याः कन्दुकेन वीथेः दण्डदीपः त्रोटिष्यति तर्हि भवती आउट इति भविष्यति। त्रयः एव तदा शंकरं उक्तवन्तः यत् सः विकेट इत्यस्य चिन्तां त्यजेत् यतोहि यद् अभूत् तस्मिन् विषये ते अधिकाः चिन्तिताः दुःखिनः च आसन्।

गतसप्ताहे तस्मात् निर्मलायाः मातृस्वसुः वातायनं त्रुटितम् आसीत् यस्य परिवर्तनार्थं सः स्वकोशतः धनं दत्तवान् आसीत्। किं अधुना कोशव्ययतः धनं दातव्यं भविष्यति? अपि च एते धनं कस्मै दास्यन्ति? वीथेः दण्डदीपस्य परिवर्तनं कः करोति?

मालायाः गृहं समीपतमम् आसीत्। भागचतुष्टयं कृत्वा मालायाः गृहं गतवन्तः अपि च तस्याः मातुः पुरतः सर्वं निवेदितवन्तः। सर्वं श्रुत्वा मालायाः अम्बा उक्तवती यत् सा एतस्मिन् विषये विशेषतया तु न जानाति परन्तु इदमेव जानामि स्म यत् एतत् नगरनिगमस्य दायित्वं भवति। सा बोधितवती "यास्मीन-खालातः प्रष्टव्यम्, सा अधुना एव नगरनिगमतः सेवानिवृत्ता अस्ति। गच्छन्तु, तां पृच्छन्तु तथा च माला, भवती शीघ्रं गृहं प्रत्यागच्छतु।

यास्मीनखाला तस्याम् एव वीथ्यां निवसति स्म अपि च मालायाः अम्बया सार्धं तस्याः सम्यक् मैत्री आसीत्। चत्वारः धावित्वा खालायाः गृहं प्राप्तवन्तः अपि च यथा एव सा द्वारम् उद्घाटितवती ते सर्वं वृत्तान्तं श्रावयितुम् आरब्धवन्तः। तेषां प्रश्नान् श्रुत्वा यास्मीनखाला उच्चैः हसितवती अपि च उक्तवती "कश्चित् एकाकी जनः नास्ति यस्मै भवन्तः धनं यच्छेयुः। काचित् महती संस्था भवति या निगरनिगमः इति उच्यते। इयं राजमार्गेषु प्रकाशस्य व्यवस्थां अवकरस्य एकत्री-करणस्य तस्य च अपसारणस्य व्यवस्थां जलव्यवस्थां राजमार्गेषु विपणिषु च स्वच्छतायाः च व्यवस्थां करोति।

माला उक्तवती "आम्-आम्, अहं नगरनिगमस्य विषये श्रुतवती। अहं नगरे फलकानि दृष्टवती यानि नगर-निगम-द्वारा जनान् सन्निपातस्य विषये सूचयन्ति तदर्थं ते तत्र योजयन्ते"।



खाला उक्तवती "भवती सर्वथा सम्यक् वदति। नगरनिगमस्य कार्यम् एतस्य विषयस्य सुनिश्चितीकरणम् अपि अस्ति यत् नगरे रोगाः प्रसृताः न भवेयुः। अयं विद्यालयान् स्थापयति तथा च तेषां सञ्चालनं करोति। नगरे औषधालयानां चिकित्सालयानां च सञ्चालनं करोति। अयम् उद्यानानां वाटिकानाम् च अपि संरक्षणं करोति। सा अग्रे उक्तवती "अस्माकं पुणेनगरं अतीव महन्नगरम् अस्ति अपि च अत्र नगरप्रशासनस्य चालयित्रे प्रशासनाय नगरनिगमम् इति कथयामः। उपनगरेषु एषा नगरपालिका इति उच्यते।

किं भवत्यः नगरपालिकायाः कार्याणां सूचीनिर्माणे शंकरस्य साहाय्यं कर्तुं शक्नुवन्ति-

१.

२.

३.

४.

निगमपार्षदः अपि च प्रशासनिक-कर्मचारी

"यास्मीनखाला अहम् औत्सुक्यान्वितः अस्मि यत् एतं निर्णयं कः स्वीकरोति यत् उद्यानस्य निर्माणं कुत्र स्यात्? यदा भवती नगरनिगमे कार्यं करोति स्म तदा किं एतादृशाः रोचकाः निर्णयाः अपि स्वीकर्तव्याः भवन्ति स्म? रेहाना पृष्टवती।

खाला उत्तरितवती "न रेहाना, अहं तु निगमस्य लेखाविभागे लेखाकारः आसम् केवलं जनानां मासिकायस्य विवरणं स्थापयामि स्म। यतोहि नगरस्य आकारः बृहद् भवति अतः नगरनिगमेन अनेके निर्णयाः स्वीकर्तव्याः भवन्ति। अनेन एव प्रकारेण नगरस्य स्वच्छतार्थं बहुकार्यं करणीयं भवति। अधिकतराः निगमपार्षदाःएव एतान् निर्णयान् स्वीकुर्वन्ति यत् चिकित्सालयाः उद्यानानि च कुत्र निर्मास्यन्ते।

नगरं पृथक्-पृथक्विभागेषु विभज्यते अपि च प्रत्येकं वार्डतः कस्यचित् पार्षदस्य निर्वाचनं भवति। नगरनिगमस्य केचन निर्णयाः एतादृशाः भवन्ति यत् ते सम्पूर्णं नगरं प्रभावयन्ति एतादृशाः जटिलाः निर्णयाः पार्षदसमूहेन स्वीक्रियन्ते। केचन पार्षदाः मिलित्वा समितीनां निर्माणं कुर्वन्ति याः विभिन्नेषु विषयेषु विचार-विमर्शं कृत्वा निर्णयान् स्वीकुर्वन्ति- उदाहरणार्थं कश्चित् बसस्थानं सम्यक् करणीयम् अस्ति अथवा कस्यचित् सम्मर्दयुक्तायाः विपणेः अवकरः अधिक-नियमित-रूपेण स्वच्छी-करणीयः अस्ति अथवा पुनः नगरस्य मुख्य-नलिकायाः स्वच्छता भवितव्या। पार्षदानां समितयः एव जलस्य अवकर-निस्सारणस्य राजमार्गेषु प्रकाशादिकस्य च व्यवस्थां कुर्वन्ति।

निम्नलिखितवाक्यानां रिक्तस्थानानि पूरयन्तु-

*पंचायत्तस्य चितसदस्यान्_____ कथयन्ति।

*नगरं विभिन्नेषु_____ विभक्तं भवति।

*नगरनिगमस्य चितसदस्याः _____उच्यन्ते।

*पार्षदानां समूहाः तेषु विषयेषु कार्यं कुर्वन्ति ये_____प्रभावयन्ति।

*पंचायत्तस्य नगरपालिकायाः च निर्वाचनानि प्रत्येकं _____वर्षे भवन्ति।

*पार्षदाः यदि निर्णयान् स्वीकुर्वन्ति तर्हि आयुक्तस्य नेतृत्वे कार्यालयस्य प्रशासनिक-कर्मचारिणः तान् निर्णयान्_____।

यदा कस्यचित् वार्डस्य आन्तरिकी समस्या भवति तर्हि वार्डस्य जनाः पार्षदेन सह सम्पर्कं कर्तुं शक्नुवन्ति। उदाहरणार्थं विद्युतः भयकंरतन्त्र्यः लम्बमानाः भूत्वा भूमौ स्पृशेयुः तर्हि स्थानीयपार्षदः विद्युतविभागस्य अधिकारिभिः सह वार्तां कर्तुं साहाय्यं कर्तुं शक्नुवन्ति।

यत्र पार्षदानां समितयः अपि च पार्षदाः विभिन्नेषु विषयेषु निर्णय-स्वीकरणस्य कार्यं कुर्वन्ति। तत्र एव तान् निर्णयान् क्रियान्वयितुं आयुक्ताः प्रशासनिक-कर्मचारिणः च कार्यं कुर्वन्ति। आयुक्तानां प्रशासनिक-

कर्मचारिणां च सर्वकारद्वारा नियुक्तिः भवति परन्तु पार्षदाः निर्वाचिताः भवन्ति।

"तर्हि नगरनिगमे एते निर्णयाः कथं स्वीक्रियन्ते?" रेहाना पृष्टवती। सा कदाचित् चिन्तनधारां न अवरुणद्धि।

बालकानां प्रश्नैः मोदमाना यास्मीनखाला उत्तरितवती "सर्वेषां वार्डानां पार्षदाः मिलन्ति अपि च सर्वेषां सम्मिलितपरामर्शेन कश्चित् व्ययपत्रं निर्मीयते। तेन एव व्ययविवरण-पत्रस्य अनुसारं धनं व्ययीक्रियते। पार्षदाः एतं प्रयासं कुर्वन्ति यत् तेषां वार्डस्य विशिष्टाः आवश्यकताः परिषदः समक्षे उपस्थापयितुं शक्नुयुः। पुनः एते निर्णयाः प्रशासनिक-कर्मचारिभिः क्रियान्वयन्ते।"खाला बहुप्रसन्ना आसीत् यतोहि केनचित विशिष्टजनेन तु तस्याः कार्यस्य विषये पृष्टं नासीत्। बालकानां प्रश्नाः तस्याः निजानुभवं वण्टयितुम् अवसरं दत्तवन्तः।

नगरनिगमः धनं कुतः प्राप्नोति?

एतावन्ति कार्याणि कर्तुं बहु अधिकं धनम् आवश्यकम्। निगमः एतं राशिं पृथक्-पृथक् उपायैः एकत्रीकरोति। एतस्य राशेः महान् भागः जनैः प्रदत्तकरात् आगच्छति। करः सः राशिः भवति यं जनाः सर्वकारद्वारा प्रदत्तसौविध्यानां कृते सर्वकाराय यच्छन्ति।

येषां जनानां स्वगृहाणि भवन्ति तैः सम्पत्तिकरः दातव्यः भवति अपि च सार्धमेव जलस्य अन्यसौविध्यानां कृते अपि करः दातव्यः भवति। यावत् बृहद् गृहं भवति तावदेव तस्य करः अपि भवति। निगमस्य पार्श्वे यावत् धनम् आगच्छति तस्मिन् संपत्तिकरे केवलं २०-२५प्रतिशतं धनम् एव आगच्छति।

शिक्षायाः उपरि अपि करः योज्यते। यदि भवन्तः कस्यचित् आपणस्य उपाहार-मन्दिरस्य वा स्वामिनः सन्ति तर्हि तैः अपि करः दातव्यः भवति। अग्रिमे काले यदा भवन्तः चलचित्रगृहं चलचित्रं द्रष्टुं गमिष्यन्ति तदा तत्र चिटिकां ध्यानेन पश्यन्तु अस्माभिः मनोरंजनार्थम् अपि करः दातव्यः भवति। अनेन प्रकारेण धनिकाः करं यच्छन्ति तत्रैव जनसङ्ख्यायाः कश्चित् महान् भागः सामान्यकरान् आधिक्येन यच्छन्ति।

शंकरः औत्सुक्येन पृष्टवान् "अस्माकं नगरं तु एतावत् विशालम् अस्ति। एतस्य निरीक्षणाय बहूनां जनानाम् आवश्यकता स्यात्। खाले! तर्हि तु नगरनिगमे बहवः कर्मचारिणः भवेयुः"? सः अधुना यावत् क्रिकेटस्य क्रीडाविषये स्वस्य च अपूर्णस्य ओवरस्य विषये सर्वथा विस्मृतः आसीत्।

"वस्तुतः नगरे कार्यं पृथक्-पृथक्-विभागेषु वण्ट्यते। यथा जलविभागः भवति अवकरनिदानस्य विभागः उद्यानरक्षकविभागः राजमार्ग व्यवस्थाविभागादयः भवन्ति। अहं नगरनिगमस्य स्वच्छताविभागे आसम् तस्य एव लेखाविभागे अहं कार्यं करोमि स्म"। खाला महता धैर्येण बोधयति स्म। पुनः बालकानां भक्षणार्थं पाकशालातः मांसम् आनेतुं गतवती।

जहाँगीरः पाकशालायां उत्थाय एव शीघ्रं स्वभक्ष्यं भक्षितवान् पुनः उच्चस्वरेण ततः एव उक्तवान् "यास्मीनखाला नगरनिगमः यम् अवकरं एकत्रीकरोति सः कुत्र नीयते? अवशिष्टाः बालकाः अधुना खादन्ति स्म। यास्मीनखाला उक्तवती "एतस्य प्रश्नस्य उत्तरं बहुरोचकम् अस्ति। यथा भवन्तः जानन्ति अवकरः प्रायः प्रत्येकं वीथ्याम् एव विकीर्णं भवति। पूर्वम् अस्माकं प्रतिवेशस्य अपि एतादृशी एव

स्थितिः आसीत् परितः अवकरः विकीर्णः भवति स्म। यदि अवकरम् एकत्रीकृत्य तस्य अपसारणं न भवेत् तर्हि मक्षिकाः तस्मिन् उपविशन्ति भ्रमन्ति च तथा च समीपस्थानां कुक्कुराणां मूषकानां च आगमनं तत्र भवति। जनाः एतस्य असौरभेण रुग्णाः अपि जायन्ते। कश्चित् इतोऽपि अशोभनीयं तथ्यम् इदम् आसीत् यत् बालकाः वीथ्यां क्रिकेटं क्रीडितुं त्यक्तवन्तः आसन् यतोहि तेषां गृह्यजनाः भयक्रान्ताः तिष्ठन्ति स्म यत् वीथ्यां चिरकालं यावत् बालकाः समयं यापयिष्यन्ति चेत् ते कदाचित् रुग्णाः भवेयुः।

पुनर्चक्रणं कश्चित् नूतनः विषयः नास्ति। चित्रे दृश्यमानस्य जनस्य इव केचन जनाः चिरकालात् कर्गदस्य काचस्य प्लास्टिकस्य धातोः च पुनर्चक्रणं कुर्वन्ति। गृह्यप्लास्टिकस्य पुनर्चक्रणे अवकरचेता मुख्यकर्तव्यं निर्वहति।

जनानां विरोधः

यास्मीनखाला स्वकथनम् अजस्रं कथितवती "ग्रामस्य महिलाः एतेभ्यः सर्वेभ्यः बहुरुष्टाः आसन्। ताः परामर्शं स्वीकर्तुं मम समीपे अपि आगतवत्यः। अहं ताः उक्तवती यत् अहं विभागस्य केनचित् अधिकारिणा एतस्मिन् विषये वार्तायाः प्रयत्नं करिष्यामि। परन्तु अहम् अपि निश्चितरूपेण इमां वार्तां न कथयितुं शक्नोमि स्म यत् एतस्मिन् कियान् कालः लगिष्यति। एतस्मिन् गङ्गाबाई बोधितवती यत् अस्माभिः स्ववार्डस्य पार्षदस्य समीपम् एतां समस्यां नीत्वा गन्तव्यं स्यात् वस्तुतः मतदानं कृत्वा अस्माभिः सः चितः अस्ति। तस्य पुरतः अस्माभिः विरोधप्रदर्शनं करणीयम्।

गङ्गाबाई महिलानां कञ्चित् लघुसमूहं एकत्रीकृतवती अपि च पार्षदस्य गृहं प्राप्तवती। सर्वाः महिलाः गृहस्य पुरतः बहिः वा उद्घोषान् आरब्धवत्यः तदा पार्षदः गृहात् बहिः आगतः तथा च सः तासां समस्यानां विषये पृष्टवान्।गङ्गाबाई स्वग्रामटिकायाः दुर्दशायाः विषये उक्तवती। पार्षदः ताभ्यः महिलाभ्यः वचनं दत्तवान् यत् सः अग्रिमे दिने ताभिः सह निगमायुक्तेन सह मेलितुं गमिष्यति। सहैव स्वग्रामटिकायाः सर्वैः वयस्कैः एकस्मिन् पत्रके हस्ताक्षराणि कारयितुम् उक्तवान्। प्रार्थना इयम् आसीत् यत् तेषां ग्रामटिकातः अवकरनिस्तारणस्य नियमितव्यस्था भवेत्। सः परामर्शं दत्तवान् यत् श्वः आयुक्तेन मेलनार्थं गमनसमये

स्थानीयस्वच्छतायाः अभियन्तारम् अपि अस्माभिः सह नयनम् उचितं भविष्यति। अनेन लाभोऽयं भविष्यति यत् सः वक्तुं शक्नोति यत् स्थितिः कियती असमीचीना अस्ति।

तस्मिन् दिने सम्पूर्णे सायंकाले बालकाःप्रतिगृहं गतवन्तः यस्मात् प्रार्थनापत्रे अधिकाधिक-रूपेण परिवारजनानां हस्ताक्षराणि भवेयुः। अग्रिमे प्रातःकाले व्यापकसङ्ख्यायां महिलाः पार्षदेन स्वच्छताभियन्त्रा च सह नगरनिगमस्य कार्यालयं गतवत्यः। आयुक्तः सम्पूर्णेन समूहेन सह मिलितवान् परन्तु सः व्याजम् आरब्धवान् यत् नगरनिगमस्य पार्श्वे पर्याप्तसङ्ख्यायां ट्रकयानानि उपलब्धानि न सन्ति। गंगाबाई झटिति उक्तवती परन्तु इत्थम् अनुभूयते यत् भवतः पार्श्वे धनाढ्यक्षेत्रेभ्यः अवकरम् उत्थापयितुं पर्याप्तट्रकयानानि सन्ति।

जहाँगीरः झटिति उक्तवान् अनेन तु आयुक्तः निःशब्दः एव जातः स्यात्।

"अन्यत् किम्! सः शीघ्रं प्रबन्धार्थम् उक्तवान्"। "यास्मीनखाला बोधितवती "गंगाबाई-महोदया आयुक्ताय पूर्वसूचनां दत्तवती यत् यदि द्वयोः दिनयोः आभ्यन्तरे कार्यं न अभवत् तर्हि नगरनिगमस्य पुरतः व्यापकसङ्ख्यायां महिलाः प्रदर्शनं करिष्यन्ति।

"तर्हि किं वीथीनां स्वच्छता जाता? रेहाना झटिति पृष्टवती, या कदाचित् विषयम् अपूर्णं न त्यजति स्म।

खालायाः सेवानिवृत्तेः अनन्तरं किं किं परिवर्तितम् अस्ति?

यास्मीनखाला बालकान् यं विषयं न उक्तवती सः अयम् अस्ति यत् सद्यतनकाले धनं रक्षितुं बहुषु नगरनिगमेषु अवकरस्य उत्थापनस्य कार्यं अनुबन्धस्य उपरि अनुबन्ध-ग्रहीतृणां पार्श्वे दत्तम् अस्ति। एतत् निजकरणम् इति उच्यते। एतस्य अभिप्रायः अस्ति यत् यानि कार्याणि पूर्वं सर्वकारि-कर्मचारिणः कुर्वन्ति स्म तानि कार्याणि अधुना निजसमूहाः कुर्वन्ति।निज-समूह-प्रमुखः यान् श्रमिकान् कार्ये नियोजयति तेभ्यः न्यूनतमं धनं यच्छति। तेषां श्रमिकाणां वृत्तिः अस्थायिनी भवति। अवकरस्य उत्थापनस्य कार्यं बहुभयंकरम् अपि भवति। प्रायः तेषां पार्श्वे स्वसुरक्षायाः साधनानि न भवन्ति। यदि कार्यकरणसमये ते व्रणिताः भवेयुः तर्हि तेषां पालनाय कश्चित् अपि न भवति।

द्वे दिने यावत् किञ्चित् अपि कार्यं नाभूत्। यदा केनचित् महता समूहेन विरोधप्रदर्शनं कृतं उच्चैः उद्घोषाः उच्चारिताः तदा कार्यं सिद्धम्। अधुना ग्रामटिकायाः स्वच्छताकार्यं नियमितरूपेण जायते।

गङ्गाबाई कं विषयम् अधिकृत्य विरोधं करोति स्म?
भवतीनां चिन्तनस्य अनुसारं गङ्गाबाई पार्षदस्य समीपं गन्तुं किमर्थं चिन्तितवती?
यदा आयुक्तेन इदं कथितं यत् नगरे ट्रकयानानां सङ्ख्या पर्याप्तमात्रया नास्ति तदा गंगाबाई किम् उक्तवती?

एतस्याः घटनायाः सुखदः अन्तः तथा जातः यथा बम्बइया-चलचित्रगृहस्य भवति, माला उक्तवती। सा आत्मानं **नेतृत्वकर्त्र्याः गंगाबाई-महोदयायाः इव अहम्** अस्मि इति स्वप्नं पश्यति स्म। सर्वे बालकाः गंगाबाई-महोदयायाः कथां श्रुत्वा आनन्दिताः जाताः। ते कथाश्रवणे

अभ्यस्ताः तु आसन् एव। ग्रामटिकायां गंगाबाई-वर्यायाः बहुसम्मानः आसीत् अपि च जनाः तां बहु मन्यन्ते स्म परन्तु तस्य कारणं ते अधुना ज्ञातवन्तः।

बालाः खालायाः धन्यवादं कृतवन्तः अपि च गन्तुं सज्जाः जाताः। गमनकाले रेहाना उक्तवती खाला केवलं कश्चित् अन्तिमः प्रश्नः इतोऽपि अस्ति गृहे अधुना यौ द्वौ अवकर-कण्डोलौ स्तः तदपि किं गंगाबाईमान्यायाः परामर्शः आसीत्? खाला हसितवती। उक्तवती" भोः नैव नैव! इदं तु नगरनिगमेन एव परामर्शः दत्तः आसीत् यत् वयं खाद्य-वस्तूनि अपि च गलितानि वस्तूनि अवकरकण्डोले एव स्थापयेम अपि च प्लास्टिक-काच-सदृदृशानि अविलय-शीलानि वस्तूनि अन्यस्मिन् अवकरकण्डोले पातयेयम यदा वयं स्वस्य अवकरस्य चयनं कुर्मः तर्हि निगमजनानां कार्यं किञ्चित् सरलं भवति।

बालाः एतावतां प्रश्नानाम् उत्तरदानाय खालायाः पुनः धन्यवादं कृतवन्तः अपि च मन्दं वीथिं प्रति गतवन्तः। बहुविलम्बः जातः आसीत् अपि च तैः शीघ्रातिशीघ्रं गृहं प्राप्तव्यम् आसीत्। अद्य सर्वकालस्य अपेक्षया वीथ्याम् अधिकं तमः आसीत्। ते उपरि भागं प्रति दृष्टवन्तः पुनः हसन्तः परस्परं दृष्टवन्तः अपि च पुनः खालायाः गृहं प्रति धावितवन्तः

अभ्यासः

1. बालाः यास्मीनखालायाः गृहं किमर्थं गतवन्तः?

१९९४तमे सूरतनगरे भयङ्कर-प्लेग-रोगः प्रसृतः आसीत्। सूरतं भारतस्य सर्वेषु मलिननगरेषु किञ्चित् आसीत्। जनाः गृहाणां उपहार-गृहाणां च अपि अवकरं पार्श्वस्थासु नालिकासु अथवा राजमार्गे एव क्षिपन्ति स्म। एतस्मात् कारणात् स्वच्छताकर्मचारिणः अवकरम् उत्थापयितुं तथा च प्रबन्धनं कर्तुं महत्कष्टम् अनुभवन्ति स्म। ततोऽपि अधिकं नगरनिगमः नियमितरूपेण स्वकार्यं न करोति स्म यतः स्थितिः इतोऽपि असमीचीना जाता आसीत्।

प्लेगरोगः वायोः प्रसरति। ये जनाः प्लेगरोगग्रस्ताः भवन्ति ते अन्येभ्यः स्वस्थजनेभ्यः पृथक्करणीयाः भवन्ति। सूरतनगरे तस्मिन् वर्षे बहवः जनाः प्राणान् त्यक्तवन्तः। प्रायः त्रिलक्षाधिकाः जनाः नगरं त्यक्तुं बाध्याः जाताः। प्लेगस्य भयात् इदम् अनिवार्यम् अभवत् यत् नगरनिगमः सावधानं कार्यं कुर्यात्। सम्पूर्णस्य नगरस्य सम्यक् प्रकारेण स्वच्छता जाता। अद्यतने काले चण्डीगढस्य पश्चात् भारतस्य स्वच्छेषु नगरेषु द्वितीयं स्थानं सूरतस्य एव अस्ति।

किं भवत्यः जानन्ति यत् भवतीनां ग्रामटिकायां कदा कतिधा च अवकरः अपसार्यते? किं भवन्तः अनुभवन्ति यत सर्वास ग्रामटिकास तावता एव अवकरः उत्थाप्यते? यदि नैव, तर्हि किम? चर्चां कर्वन्त।

किं भवन्तः जानन्ति यत् सर्वकारः भवतां करदानेन एव राजमार्गाणां सेतूनां उद्यानानां च निर्माणं वीथिषु च विद्युतादिकस्य च व्यवस्थां करोति? स्वपरिवारे एतस्मिन् विषये वार्तालापं कुर्वन्तु अपि च करेभ्यः प्राप्यमानानां लाभानां सूचीं कुर्वन्तु।

१ २ ३

2. नगरनिगमस्य कार्याणि नगरनिवासिनां जीवनं कथं प्रभावयन्ति? एतादृशानां चतुर्णाम् उपायानां विषये लिखन्तु।
3. नगरनिगमपार्षदः कः भवति?
4. गंगाबाई किं कृतवती अपि च किमर्थं कृतवती?
5. चर्चां कुर्वन्तु –

   उपरि-तनयोः द्वयोः चित्रयोः भवद्भिः अवकरस्य एकत्रीकरणस्य अपि च तस्य अपसारणस्य अथवा प्रबन्धनस्य च विभिन्नविधीः दृष्टाः।

(क) भवतां विचारेण कः विधिः अवकरप्रबन्धकस्य कृते सुरक्षितः अस्ति?

(ख) प्रथमे चित्रे अवकरचयस्य यः उपायः दर्शितः अस्ति तस्मिन् का आपत्तिः अस्ति?

(ग) किं भवत्यः चिन्तयन्ति यत् ये जनाः नगरनिगमेषु कार्यं कुर्वन्ति तेषां पार्श्वे स्वावकर-प्रबन्धस्य व्यवस्थित-सौविध्यानि किमर्थं न सन्ति?

6. नगरनिगमः स्वकार्यस्य कृते धनं कुतः प्राप्नोति?
7. नगरे बहवः जनाः गृह्यप्रेष्यवत् कार्यं कुर्वन्ति अपि च अन्येषां गृहाणि स्वच्छीकुर्वन्ति।

   तेन एव प्रकारेण बहवः जनाः नगरनिगमस्य कृते कार्यं कुर्वन्ति अपि च नगरं स्वच्छं स्थापयन्ति। एतदतिरिच्य येषु निवासेषु ते निवसन्ति तत्र महती असमीचीनता भवति। एतस्य कारणम् अस्ति यत् एतेषु निवासेषु जलस्य स्वच्छतायाः च सुविधाः विरलतया एव भवति। नगरनिगमः प्रायः एतस्य कृते एतान् निवासिनः एव दोषिणः इति मन्यन्ते यत् यस्यां भूमौ एते निर्धनाः स्वगृहं निर्मान्ति सा भूमिः एतेषां न भवति न तु एते सर्वकाराय करं यच्छन्ति । परन्तु मध्यमवर्गस्य निवासक्षेत्रेषु उद्यानानाम् वीथीनां प्रकाशाय नियमितावकरप्रबन्धस्य कृते च यं व्ययं नगरनिगमः

करोति तस्य तोलनायां तत्रत्यनिवासिनः जनाः अत्यल्पं करं यच्छन्ति। पाठे अपि भवन्तः पठितवन्तः यत् नगरनिगमः सम्पत् तिकरात् केवलं २५-३०प्रतिशतम् एव आयं प्राप्नोति।

किं भवन्तः अनुभवन्ति यत् निगमेन निवासानां स्वच्छतार्थं अधिकः व्ययः करणीयः? इदं किमर्थं महत्त्वपूर्णम् अस्ति? अपि च किमर्थम् आवश्यकम् अस्ति यत् नगरे नगरनिगमः याः सुविधाः धनिकानां कृते उपलब्धयति सा एव निर्धनानां कृते अपि लभेत?

इति सप्तमोऽध्यायः

चतुर्थः घट्टः

आजीविकाः

अष्टमः अध्यायः

ग्रामीणक्षेत्रे आजीविकाः

प्रथमे पाठे अस्माभिः स्वजीवने विद्यमानानाम् अनेकासां विविधतानाम् उपरि दृष्टिपातः कृतः। अस्माभिः एतस्मिन् विषये अपि विचारितं यत् विभिन्नेषु क्षेत्रेषु वासकारणात् तत्रत्यानां जनानां कार्येषु व्यवसायेषु च कथं प्रभावः जायते । तत्र विद्यमानाः पादपाः वृक्षाः च तत्रत्यानि सस्यानि अथवा अन्यानि वस्तूनि कथं तेषां कृते महत्त्वपूर्णानि भवन्ति। अस्मिन् पाठे वयं इदं द्रक्ष्यामः यत् ग्रामे जनाः कैः विभिन्नैः उपायैः स्वाजीविकाः चालयन्ति। गतद्वयोः पाठयोः इव अत्रापि वयम् एतस्य निरीक्षणं करिष्यामः यत् किं जनानां पार्श्वे आजीविकायाः चालनस्य समानाः अवसराः उपलब्धाः सन्ति अथवा न सन्ति। तेषां जीवनस्य परिस्थितयः परस्परं कियतीं साम्यतां भजन्ते अपि च ते कासां समस्यानां सम्मुखीकरणं कुर्वन्ति एतस्मिन् विषये अपि वयं ज्ञास्यामः।



- उपरिप्रदत्तचित्रेषु जनाः यत् कार्यं कुर्वन्तः दृश्यन्ते, तस्य कार्यस्य वर्णनं कुर्वन्तु।
- कृषिसम्बद्धकार्याणि पृथक्कुर्वन्तु अपि च यानि कार्याणि कृषिसम्बद्धानि सन्ति तेषां पृथक्सूचीं कुर्वन्तु।
- भवद्भिः ग्रामीणक्षेत्रेषु जनाः अनेकविधानि कार्याणि कुर्वन्तः दृष्टाः। तेषु केषाञ्चित् जनानां चित्रं निर्माय तेषां विषये लिखन्तु।

कलपट्टु-ग्रामः

तमिल-नाडु-प्रान्ते समुद्रतटस्य समीपे कश्चित् ग्रामः अस्ति कलपट्टुः । अत्र जनाः बहुविधानि कार्याणि कुर्वन्ति। अपरेषां ग्रामानाम् इव अत्र अपि कृषेः अतिरिक्तानि बहूनि कार्याणि भवन्ति यथा कण्डोल-पात्र-घटेष्टका-शकटादीनाम् निर्माणम्।

कलपट्टुग्रामे केचन जनाः परिचारिका-शिक्षक-रजक-तन्तुवाय-नापित-द्विचक्रिका-यान्त्रिकादि-रूपेण स्वसेवाः यच्छन्ति। अत्र केचन आपणिकाः व्यापारिणः च अपि सन्ति। या मुख्यवीथिः अस्ति सा विपणिवत् दृश्यते। तत्र भवन्तः विभिन्नान् लघ्वापणान् द्रक्ष्यन्ति यथा चाय-शाक-वस्त्रापणाः अपि च आपणद्वयं बीजोर्वरकयोः इति। आपणचतुष्टयं चायस्य अर्थात् उष्णपेयस्य सन्ति यत्र च "टिफिन' अर्थात् पाथेयपात्र-भोजनम् अपि लभते। अत्र पाथेयपात्रस्य अभिप्रायः अस्ति खाद्यस्य वस्तूनि यथा प्रातः इडली-दोसः उपमा वा लभते अपि च सांयकालस्य खाद्ये बडा-बौंडा-मैसूरपाकाः लभन्ते। चायापणस्य समीपे एकस्मिन् कोणे कस्यचित् लौहकारस्य परिवारः निवसति। तस्य गृहे एव लौहनिर्मितवस्तूनां कार्यं भवति। पार्श्वे एव द्विचक्रिका-दोष-निराकरणस्य कश्चित् आपणः अस्ति। तत्र द्विचक्रिका भाटकस्य उपरि अपि लभते। ग्रामे रजकस्य परिवारद्वयं वस्त्रप्रक्षालनस्य कार्यं कृत्वा स्वाजीविकाः चालयति। केचन जनाः पार्श्वस्थं नगरं गत्वा गृहनिर्माणस्य यात्रिवाहन-चालनस्य च कार्यं कुर्वन्ति।

ग्रामः लघ्वीभिः उपत्यकाभिः आवृत्तः अस्ति। सिंचितभूमौ मुख्यतः धान्यस्य कृषिः भवति। अधिकतराः परिवाराः कृषिकर्मणा स्वाजीविकाः अर्जयन्ति। अत्र आम्रस्य नारिकेलस्य च बहवः वृक्षाः सन्ति। कार्पास-इक्षु-कदलीसस्यानि प्ररोह्यन्ते। आगच्छन्तु कैश्चित् जनैः सह मिलामः ये कलपट्टोः क्षेत्रेषु कार्यं कुर्वन्ति अपि च पश्यामः यत् वयं तेषाम् आजीविकायाः विषये किं शिक्षितुं शक्नुमः।

धान्यस्य रोपणं श्रमसाध्यं कार्यं भवति।

तुलसी

वयं सर्वे अत्र रामलिंगमस्य भूमौ कार्यं कुर्मः। तस्य परिवारस्य पार्श्वे कलपट्टुग्रामे विंशत्येकडपरिमितं धान्यस्य क्षेत्राणि सन्ति। विवाहात् पूर्वम् अपि अहं स्वमातुः गृहे धान्यस्य क्षेत्रेषु एव श्रमं करोमि स्म। अत्र अहं प्रातः ८.३०तः सांयं सार्धचतुर्वादनं यावत् कार्यं करोमि। रामलिङ्गमस्य पत्नी करुथम्मा कार्यस्य निरीक्षणं करोति।

वर्षे केचन एव अवसराः भवन्ति यदा अहं नियमित-रूपेण पारिश्रमिकं प्राप्नोमि। अयम् अवसरः तेषु अवसरेषु कश्चन अस्ति। अहं धानस्य रोपणं करोमि। यदा धान्यस्य सस्यं किञ्चित् वर्धिष्यते तर्हि रामलिंगमः अस्मान् सस्यानाम् अवाञ्छित-तृण-चयनाय (निराई) अपि च पश्चात् सस्य-कर्तनाय आह्वास्यति।

यदा अहम् अल्पवया आसम् तदा कृषेः कार्यं सरलतया करोमि स्म। परन्तु अधुना यथा यथा वयः वर्धते अहं नमनं कृत्वा कार्यकरणे अपि च चिरकालं यावत् जले पादयोः ब्रूडने कष्टम् अनुभवामि। रामलिंगमः एकस्य दिनस्य ४०रुप्यकाणि पारिश्रमिकं ददाति। मम ग्रामस्य पारिश्रमिकस्य अपेक्षया एतद् किञ्चित् न्यूनम् अस्ति। पुनरपि अहं श्रमार्थम् अत्र आगच्छामि। रामलिंगमे अहं विश्वसिमि यत् कार्ये आपतिते सति सः माम् एव आह्वास्यति। अन्येषां जनानाम् इव सः अल्प-पारिश्रम-श्रमिकान् समीपस्थेषु ग्रामेषु न अन्वेषयति।

मम पतिः रमनः अपि कश्चित् श्रमिकः अस्ति। अस्माकं पार्श्वे काचिदपि भूमिः नास्ति। वर्षस्य एतेषु मासेषु सः क्षेत्रेषु कृमीनाम् उपरि औषध-प्रोक्षणं करोति। यदा क्षेत्रेषु किमपि कार्यं न लभते तदा सः पार्श्वस्थे आकरे पाषाणकार्यं अथवा नदीतः सैकतवहनस्य कार्यं प्राप्नोति। एते पाषाणाः सैकतानि च पार्श्वस्थेषु नगरेषु गृहनिर्माणाय ट्रकयानेन नीयन्ते।क्षेत्रे कृषिकार्यम् अतिरिच्य अहं गृहस्य सम्पूर्णं कार्यं करोमि। अहं गृहे सर्वेषां कृते भोजनं पचामि वस्त्राणि प्रक्षालयामि अपि च स्वच्छतां करोमि। अन्याभिः महिलाभिः सह गत्वा वनात् काष्ठानि अपि आनयामि। ग्रामात् प्रायः



किं तुलस्यै आवर्षं धनार्जनस्य अवसराः लभन्ते? उपरि प्रदत-चित्रस्य आधारेण ज्ञापयन्तु

११किलोमीटरदूरे (कूपः)बोरवेल इति अस्ति यतः जलम् आनीय आगच्छामि। मम पतिः यथा गृह्यवस्तूनां क्रयणे मम साहाय्यं करोमि।

अस्माकं द्वे पुत्र्यौ एव अस्माकं जीवनस्य प्रसन्नतारूपे स्तः। द्वे एव विद्यालयं गच्छतः। गतवर्षे एका रुग्णा जाता आसीत् तर्हि सा नगरीय-चिकित्सालयं नीता। अस्माभिः तस्य उपचारार्थं रामलिंगात् रूप्यकाणि ऋणरूपेण स्वीकृतानि आसन् तथा च तस्य ऋणस्य नैष्कृत्यर्थम् वयं स्वगां विक्रेतुं बाध्याः जाताः।

यथा भवद्भिः तुल्स्याः कथायां पठितं ग्रामीणक्षेत्रेषु निर्धनपरिवाराणां सम्पूर्णः कालः जलेन्धनानि आनेतुं तथा च पशुचारणे गच्छति। एतैः कार्यैः कश्चित् धनलाभः न भवति,परन्तु निर्धनपरिवारेषु एतानि कार्याणि बहुमहत्त्व-पूर्णानि भवन्ति। ते श्रमेण अल्पं धनम् अर्जयन्ति तेन निर्वाहः न भवति। गृह्यव्यवस्थायै तथा च जीवितुं एतानि कार्याणि करणीयानि भवन्ति।

1. तुलस्याः कार्यस्य विवरणं यच्छन्तु। इदं रमणस्य कार्यात् कथं पृथक् अस्ति?
2. तुलसी स्वकार्यस्य न्यूनं पारिश्रमिकं प्राप्नोति। भवतां चिन्तनस्य अनुसारं क्षेत्रेषु ये श्रमिकाः कार्यं कुर्वन्ति ते न्यूने पारिश्रमिके कार्यं कर्तुं कथं बाध्याः सन्ति?
3. भवतां क्षेत्रे अथवा समीपस्थेषु ग्रामेषु कानि कानि सस्यानि प्ररोह्यन्ते? तत्र कृषकश्रमिकाः कीदृशं कार्यं कुर्वन्ति?
4. यदि तुलस्याः पार्श्वे कृषियोग्यभूमिः स्यात् तर्हि तस्य अर्जनस्य अथवा आजीविकायाः उपायाः कथं पृथक् अभविष्यत्? चर्चां कुर्वन्तु।

अस्माकं देशे ग्रामीण-परिवारेषु प्रायः ४० प्रतिशतं कृषकश्रमिकाः सन्ति। केषाञ्चित् पार्श्वे भूखण्डाः सन्ति अन्ये तुलसीवत् भूमिहीनाः सन्ति। कदाचित् यदा ते आवर्षं कार्यं न प्राप्नुवन्ति तदा बाध्यतावशात् तैः कार्यान्वेषणाय सुदूरक्षेत्राणि गन्तव्यानि भवन्ति। एतादृशं पलायनं केषुचित् विशिष्ट-वातावरणेषु एव भवति।

शेखरः

अस्माभिः एतत् धान्यं स्वगृहं नेतव्यम् अस्ति। मम परिवारेण अधुना एव सस्यकर्तनं समाप्तम्। अस्माकं पार्श्वे केवलम् एकड-द्वय-परिमिता भूमिः अस्ति। वयं स्वक्षेत्रस्य सम्पूर्णं कार्यं स्वयमेव कुर्मः। अहं कर्तनकाले अपरेभ्यः लघुकृषकेभ्यः साहाय्यं स्वीकरोमि अपि च विनिमये तेषां क्षेत्रेषु कर्तनकार्यं कारयामि।

व्यापारी मह्यम् ऋणरूपेण बीजानि उर्वरकं च यच्छति। तं ऋणं प्रत्यावर्तितुं मया अल्पमूल्येन तं धान्यं विक्रेतव्यं भवति। यदि अहं तत् धान्यं विपण्यां विक्रीणीयां तर्हि अधिकं धनम् अर्जयितुं शक्नुयाम्। परन्तु मया ऋणस्य प्रत्यावर्तनम् अपि करणीयम्। व्यापारी कृषकान् स्मारयितुं स्वप्रतिनिधिं प्रेषितवान् अस्ति यत् ये कृषकाः तस्मात् ऋणं स्वीकृतवन्तः ते तम् एव धान्यं विक्रीणीरन्। अहं स्वक्षेत्रात् ६० गोणीधान्यं प्राप्स्यामि। अर्धेन अहं गृहीतं ऋणं प्रत्यावर्तिष्ये अपि च अवशिष्टं गृह्योपयोगाय भविष्यति। परन्तु मम भागभूतं यत् धान्यं भवति तत् केवलम् अष्टौ मासान् यावत् एव भोक्तुं भवति अतः मया अधिकं धनम् अर्जनीयं भवति। एतस्मात् कारणात् अहं रामलिंगमस्य तण्डुलोद्योगे कार्यं करोमि। तत्र अहं पार्श्वस्थेभ्यः कृषकेभ्यः

धान्यसंग्रहणाय तस्य साहाय्यं करोमि। अस्माकं पार्श्वे काचित् संकरप्रजात्याः धेनुः अपि अस्ति तस्याः दुग्धं वयं समीपस्थ-सहकारि-समितिं विक्रीणीमहे । एतस्मात् दैनन्दिन-व्ययस्य कृते किंचित् धनं लभते।

ऋणे स्वीकृते सति

यथा भवद्भिः उपरि पठितं कदाचित् शेखरसदृशाः कृषकाः आवश्यकानि वस्तूनि क्रेतुं ऋणरूपेण धनं स्वीकुर्वन्ति। प्रायः एतत् धनं बीज-कृमिनाशकोर्वरकान् क्रेतुं धनपतेः ऋणरूपेण स्वीक्रियते।

- शेखरस्य परिवारः किं कार्यं करोति? भवतां विचारेण शेखरः अन्यश्रमिकान् स्वक्षेत्रीये कार्ये किमर्थं न नियोजयति?
- शेखरः नगरीय-विपण्यां स्वधान्यं किमर्थं न विक्रेतुं पारयति?
- शेखरस्य भगिनी मीना अपि व्यापारितः ऋणं स्वीकृतवती आसीत् परन्तु सा स्वधान्यं तं न विक्रेतुम् इच्छति। सा व्यापारिणः प्रतिनिधिम् उक्तवती यत् तस्य धनं प्रत्यर्पयिष्यति। मीनायाः व्यापारिप्रतिनिधेः च मध्ये एतम् विषयम् अधिकृत्य का वार्ता जाता स्यात्? द्वयोः तर्कयोः लेखनं कुर्वन्तु।
- तुलसी-शेखरयोः जीवने काः समानताः सन्ति तथा च काः भिन्नताः सन्ति? भवताम्

तुलसी-शेखरयोः विवरणं पुनः पठन्तु। ते उन्नतकृषकस्य रामलिङ्गमस्य विषये किं कथयन्ति? अनेन सहैव भवद्भिः यत् रामलिङ्गमस्य विषये पठितम्,तत् मनसि निधाय निम्नलिखितप्रश्नानाम् उत्तराणि यच्छन्तु-

- तस्य पार्श्वे कियती भूमिः अस्ति?
- स्वभूमौ उत्पन्न-धान्येन सः किं करोति?
- कृषिम् अतिरिच्य तस्य अर्जनस्य अन्यानि कानि कानि साधनानि सन्ति?

उत्तरस्य निम्नलिखिताधाराः भवितुं शक्नुवन्ति- तयोः पार्श्वे कियती भूमिः अस्ति तैः ऋणं किमर्थं स्वीकरणीयं भवति,तयोः

रामलिंगमस्य २०एकडपरिमिते भागे आरोपितं धान्यस्य सस्यम्- तुलस्याः अन्येषां च कृषकाणां कठिनश्रमस्य परिणामः अस्ति।

अर्जनस्य साधनानि कानि कानि सन्ति अपि च अन्येषां भूमौ कार्यकरणस्य आवश्यकता तेषां कृते किमर्थम् अस्ति।

यदि बीजानि उत्तमानि न भवन्ति अथवा सस्यानि कीटाक्रान्तानि स्युः तर्हि सम्पूर्णं सस्यं नष्टीभवितुं शक्नोति। वृष्टेः अभावात् सस्यं नष्टीभवितुं शक्नोति। एतादृश्यां स्थितौ कृषकाः गृहीतर्णं न प्रत्यावर्तयितुं पारयन्ति। बहुधा तैः परिवारस्य भरणाय पोषणाय च इतोऽपि धनम् ऋणरूपेण स्वीकरणीयं भवति।

शीघ्रमेव ऋणम् एतावत् वर्धते कृषकः कियदपि अर्जयेत् सः तत् ऋणं न प्रत्यावर्तितुं पारयति। एतादृश्यां स्थितौ उच्यते यत् कृषकः ऋणभारेण भूमिसात् जातः। गतेषु केषुचित् वर्षेषु इदं कृषकाणां विपत्तेः मूलकारणम् अभवत्। केषुचित् क्षेत्रेषु कृषकाः ऋण-कष्ट-कारणात् आत्महत्यां कृतवन्तः।

रामलिंगमः करुथम्मा च

भूमिम् अतिरिच्य रामलिंगमस्य परिवारस्य पार्श्वे कश्चन तण्डुलोद्योगः अस्ति बीजोर्वरकयोः अपि कार्यम् आसीत्। ते कलपट्टोः पार्श्वस्थेभ्यः ग्रामेभ्यः एव धान्यं क्रीणन्ति। उद्योगस्य तण्डुलाः पार्श्वस्थ-व्यापारिभ्यः विक्रीयन्ते एतस्मात् तेषाम् अर्जनं सम्यक् भवति।

भारतस्य कृषक-श्रमिकाः कृषकाः च

कलपट्टुग्रामे तुलस्याः तुल्याः एव कृषक-श्रमिकाः सन्ति शेखरसदृशाः लघुकृषकाः सन्ति अपि च रामलिंगमसदृशाः महान्तः कृषकाः सन्ति। भारते प्रत्येकं ग्रामीण-परिवारेषु प्रायः परिवारद्वयं कृषक-श्रमिकाणाम् अस्ति। एतादृशाः सर्वे परिवाराः स्वार्जनार्थम् अन्येषाम् क्षेत्राणाम् उपरि आश्रिताः भवन्ति। एतेषु केचन भूमिहीनाः सन्ति अपि च केषाञ्चित् पार्श्वे भूमेः लघुखण्डाः सन्ति।

शेखरसदृशानां कृषकाणां विषये चिन्तयामः तर्हि तेषाम् आवश्यकतायाः अनुगुणं क्षेत्राणि बहु-न्यूनानि सन्ति। भारतस्य ८०प्रतिशतं कृषकाणां

नागालैंडस्य सोपानाकाराकृषिः

अयं कश्चित् ग्रामः अस्ति यस्य नाम चिजामी अस्ति। अयं नागालैंडस्य फेकजनपदे अस्ति। अस्य ग्रामवासिनः चखेसंग-समुदायस्य सन्ति। ते सोपानाकारां कृषिं कुर्वन्ति। एतस्य अभिप्रायः अस्ति यत् उपत्यकायाः नतभूमिः लघुषु लघुषु समतल-भागेषु विभज्यते अपि च सा भूमिः सोपानाकारा क्रियते। प्रत्येकं समतल-भूखण्डस्य प्रान्तभागः उपरि उत्थाप्यते यतः जलं तत्र पूरितं स्यात् इदं तण्डुलकृषेः कृते सर्वोत्तमम् अस्ति।

चिजामी-जनानां पार्श्वे स्वस्य स्वस्य क्षेत्राणि सन्ति परन्तु ते सम्भूय परस्परं क्षेत्रेषु व्यतिकुर्वन्ति। ते षड् अष्टौ वा जनानां समूहं रचयित्वा सम्भूय च पर्वतस्य एकस्मिन् भागे अनावश्यक-तृणानि अपसारयन्ति। यदा दैनन्दिनं कार्यं समाप्तं भवति तदा समूहः सम्भूय भोजनं करोति। इत्थं बहूनि दिनानि यावत् चलति यावत्पर्यन्तं कार्यस्य समाप्तिः न भवति।

स्थितिः एतादृशी एव अस्ति। भारते केवलं २०प्रतिशतं कृषकाः रामलिंगम-सदृशानां महतां कृषकाणां श्रेण्यां गण्यन्ते। एतादृशाः कृषकाः ग्रामस्य भूमौ कार्यं कुर्वन्ति तेषाम् उत्पादनस्य अधिकतरः भागः विपण्यां विक्रीयते। बहुभिः उन्नतकृषकैः अन्यानि कार्याणि अपि प्रारब्धानि सन्ति यथा आपणिक-कार्यम्, व्याजस्य उपरि धनदानं लघूद्योगानां सञ्चालनादिकं च।

उपरि प्रदत्ताङ्कान् दृष्ट्वा किं भवन्तः वक्तुं शक्नुवन्ति यत् भारतस्य अधिकतराः कृषकाः निर्धनाः सन्ति? भवतां दृष्ट्या एतां स्थितिं परिवर्तितुं किं कर्तुं शक्यते?

अस्माभिः कलपट्टुग्रामे यत् कृषिकार्यं भवति तस्मिन् विषये पठितम्। ग्रामीणक्षेत्रेषु कृष्या सार्धं जनाः वनोत्पादानां पशूनाम् उपरि च आश्रिताः भवन्ति। उदाहरणार्थं मध्यभारतस्य केषुचित् ग्रामेषु कृषेः वनस्य उत्पादानाम् उपरि च आश्रिताः भवन्ति। द्वयमेव आजीविकायाः साधनम् अस्ति। मधुद्रुमस्य चयनं तेंदूवृक्षस्य पत्राणाम् एकत्रीकरणं मधुनः निष्पीडनं च आयस्य अतिरिक्तसाधनानि सन्ति। अनेन एव प्रकारेण सहकारिसमितये अथवा पार्श्वस्थ-नागरिकेभ्यः दुग्धविक्रयणम् अपि बहूनां जनानां कृते आयस्य मुख्यसाधनानि सन्ति।

समुद्र-तटीय-क्षेत्रेषु वयं पश्यामः यत् अशेषाः ग्रामाः मत्स्यग्रहणस्य कार्ये संलग्नाः सन्ति।आगच्छन्तु अरुणा-पारिवेलनयोः जीवनविषये पठित्वा मत्स्य-ग्राहिणः कस्यचित् परिवारस्य विषये किञ्चित् इतोऽपि जानीयाम। अयं परिवारः कलपट्टुग्रामस्य पार्श्वे पुदुपेटनामके ग्रामे निवसति।



अरुणा पारिवेलनः च

पुदुपेटः कलपट्टुतः नातिदूरे वर्तते। अत्र जनाः मत्स्य-ग्रहणेन स्वाजीविकां चालयन्ति। तेषां गृहाणि समुद्रस्य पार्श्वे भवन्ति अपि च तत्र परितः जलस्य कैटामरैनस्य (मत्स्यपालकानां विशिष्टप्रकारकस्य नौः) च पङ्क्तयः दृश्यन्ते। प्रातः काले सप्तवादने समुद्रतटे बहुव्यस्तता दृश्यते। एतस्मिन् काले सर्वे धीवराः मत्स्यान् गृहीत्वा प्रत्यागच्छन्ति। मत्स्यान् क्रेतुं विक्रेतुं च बह्व्यः महिलाः समवेताः भवन्ति।

मम पतिः पारिवेलनः मम भ्राता अपि च मम आवुत्तः अद्य चिरेण प्रत्यागतवन्तः। अहं बहु उद्विग्ना आसम्। एते अस्माकं कैटामरैन इत्यस्मिन् सम्भूय एव समुद्रं गच्छन्ति ते ज्ञापितवन्तः यत् ते अद्य सामुद्रिक-झञ्झावाते बद्धाः जाताः।

अद्य ये मत्स्याः गृहीताः तेषु परिवारस्य उपयोगाय केचन मत्स्याः मया उत्थाप्य एकस्मिन् पक्षे स्थापिताः। अन्यान् अहं विक्रेष्ये। अनेन विक्रयणेन यद् धनं लप्स्यते तत् चर्तुषु भागेषु विभज्यते। भागत्रयं तेषु त्रिषु जनेषु विभज्यते ये

स्थानीयापणे मत्स्यान् विक्रीणन्त्यः धीवर्यः

मत्स्यग्रहणार्थं गच्छन्ति अवशिष्टः भागः तस्मै दीयते यस्य नौ-जालादिकं च भवति यतो हि जालं कैटामरैनः तस्य उर्जकः इंजन इति च अस्माकम् एव भवेयुः तर्हि सः भागः अपि अस्मदीयः एव भविष्यति। अस्माभिः वित्तकोशतः ऋणं स्वीकृत्य उर्जकः क्रीतः अस्ति यः कैटरामरैने योजितः अस्ति। अनेन एते जनाः समुद्रे दूरं यावत् गन्तुं शक्नुवन्ति अपि च अधिक्येन मत्स्यान् प्राप्तुं शक्नुवन्ति।

- अरुणा-शेखरयोः परिवारः ऋणं स्वीकर्तुं किमर्थं बाध्यः अस्ति? भवन्तः तयोर्मध्ये कां समानतां कां च पृथक्तां पश्यन्ति।
- किं भवन्तः सुनामीविषये श्रुतवन्तः? इयं का भवति? अनया अरुणासदृशाः परिवाराः कां हानिं प्राप्तवन्तः स्युः?

लीलामय-विक्रयेण याः महिलाः इतः मत्स्यान् क्रीणन्ति ताः कण्डोलेषु मत्स्यान् पूरित्वा पार्श्वस्थेषु ग्रामेषु विक्रयणार्थं नयन्ति। केचन व्यापारिणः अपि सन्ति ये नगरीयापणानां कृते मत्स्यान् क्रीणन्ति। अहं मध्याह्ने द्वादशवादनं यावत् एव मत्स्यविक्रयणस्य
कार्यं समापयामि। सांय़काले मम पतिः अन्ये च सम्बन्धिनः मिलित्वा जालस्य समीकरणं कुर्वन्ति अपि च तस्य परिष्कारं कुर्वन्ति। श्वः प्रातःकाले द्विवादने एव ते समुद्रं प्रति गच्छन्ति। प्रतिवर्षं वर्षाकाले ते मासचतुष्टयं यावत् समुद्रं न गन्तुं पारयन्ति ।

यतोहि एषः मत्स्यानां प्रजननकालः भवति। एषु दिनेषु वयं व्यापारितः ऋणं स्वीकृत्य स्वजीवननिर्वहणं कुर्मः। एतस्मात् कारणात् अस्माभिः बाध्यतावशात् व्यापरिणे मत्स्याः विक्रेतव्याः भवन्ति अपि च वयं मुक्ततया लीलामयं विक्रयणं न कर्तुं पारयामः। ते कार्यरहिताः मासाः काठिन्येन याप्यन्ते। गतवर्षे सुनामीकारणात् अस्माकं महती क्षतिः जाता।

ग्रामीणक्षेत्रेषु आजीविकायाः साधनानि

ग्रामीण क्षेत्रेषु जनाः स्वाजीविकां विभिन्नैः उपायैः चालयन्ति। केचन कृषिकार्यं कुर्वन्ति अपि च केचन अन्यानि कार्याणि कृत्वा स्वाजीविकां चालयन्ति। क्षेत्रेषु बहुविधानि कार्याणि सम्मिलितानि सन्ति यथा क्षेत्रस्य बीजात् पूर्वं सज्जीकरणम् रोपणं बीजवपनं कर्तनं अनावश्यक-तृणनिःसारणं च। सस्यम् प्रभूतं स्यात् तन्निमित्तं वयं वृष्टेः उपरि आश्रिताः स्मः। अनेन प्रकारेण जीवनम् ऋतुषु एव आश्रितम् अस्ति। बीजवपनस्य कर्तनस्य च काले जनाः बहुव्यस्ताः भवन्ति। अपि च अन्यस्मिन् काले कार्यस्य भारः न्यूनः भवति। देशस्य पृथक्-पृथक्-क्षेत्रेषु ग्रामीणाः जनाः पृथक्-पृथक्सस्यानि प्ररोहन्ति। पुनरपि वयं तेषां जीवनस्य परिस्थितिषु अपि च समस्यासु आधिक्येन समानताः पश्यामः।

जनाः कथं जीवननिर्वहणं कुर्वन्ति अपि च कियन्तम् अर्जयितुं पारयन्ति इदमेतस्मिन् तथ्ये श्रितं भवति यत् ये यस्यां भूमौ कृषिं कुर्वन्ति सा कीदृशी अस्ति। केचन जनाः तस्यां भूमौ श्रमिकाणां रूपेण आश्रिताः सन्ति। अधिकतराः कृषकाः स्वावश्यकतानां पूर्त्यर्थम् अपि च विपण्यां विक्रेतुम् अपि सस्यानि प्ररोहन्ति।

कैश्चित् कृषकैः स्वसस्यं तेभ्यः व्यापारिभ्यः विक्रेतव्यं भवति येभ्यः ते धनं ऋणरूपेण स्वीकुर्वन्ति। जीवननिर्वहणाय बहुभिः परिवारैः ऋणरूपेण धनं स्वीकरणीयं भवति यदा तेषां पार्श्वे किञ्चित् अपि कार्यं न भवति। ग्रामीणक्षेत्रेषु केचन एतादृशाः परिवाराः सन्ति ये भूमीनां व्यापारस्य अन्यकार्याणां च कारणात् समृद्धाः जायन्ते पुनरपि बहवः जनाः यथा कृषकाः कृषकश्रमिकाः मत्स्यग्राहिणः ग्रामे हस्तशिल्पिनः च आवर्षं वृत्तिं न प्राप्नुवन्ति ।

अभ्यासः

1. भवद्भिः सम्भवतः एतस्मिन् विषये ध्यातं स्यात् यत् कलपट्टुग्रामस्य जनाः कृषिम् अतिरिच्य अन्यानि अपि बहूनि कार्याणि कुर्वन्ति। तेषु पञ्च कार्याणां सूचीं कुर्वन्तु।
2. कलपट्टुग्रामे विभिन्न-समूह-जनाः कृषिकार्ये आश्रिताः सन्ति। तेषां काञ्चित् सूचीं कुर्वन्तु तेषु निर्धनतमः कः अस्ति अपि च किमर्थम् अस्ति ?
3. कल्पयन्तु यत् भवन्तः कस्यचित् मत्स्यग्राहिपरिवारस्य सदस्याः सन्ति। भवतां परिवारः इमां चर्चां करोति यत् उर्जकस्य कृते वित्तकोशतः ऋणं गृह्णीयाम उत न। भवती किं वदिष्यति ?

4. तुलसीसदृशानां निर्धन-ग्रामीण-श्रमिकाणां पार्श्वे प्रायः सुशिक्षा स्वास्थ्यसौविध्यानि अपि च अन्य-साधनानाम् अभावः भवति। भवद्भिः एतस्य पुस्तकस्य प्रथमे अङ्के असमानतायाः विषये पठितम्। तुलसीरामलिङ्गमयोः मध्ये यद् अन्तरम् अस्ति तत् एकविधासमानतायाः रूपम् अस्ति। किं एषा काचित् उचिता स्थितिः अस्ति? भवतां विचारेण एतस्य कृते किं कर्तुं शक्यते? कक्षायां चर्चयन्तु।
5. भवताम् अनुसारं सर्वकारः शेखरसदृशान् कृषकान् कर-व्यवस्थातः मोचयितुं कथं साहाय्यं कर्तुं शक्नोति? चर्चयन्तु।
6. अधः प्रदत्ततालिकां पूरयन् शेखर-रामलिङ्गयोः स्थितीनां तोलनां कुर्वन्तु –

	शेखरः	रामलिङ्गमः
कर्षिता भूमिः		
श्रमिकाणम् आवश्यकता		
ऋणस्य आवश्यकता		
सस्यस्य क्रयणम्		
तैः कृतम् अन्यत् कार्यम्		

इति अष्टमोऽध्यायः

नवमः अध्यायः

नगरीयक्षेत्रे आजीविका

भारते पञ्चसहस्राधिकानि नगराणि सन्ति अपि च सप्तविंशतिः महानगराणि सन्ति। चैन्नई-मुम्बई-दिल्ली-कोलकातासदृशेषु प्रत्येकं महानगरेषु दशलक्षाधिकाः जनाः निवसन्ति अपि च कार्यं कुर्वन्ति। एवमुच्यते यत् नगरे कदाचित् जीवनं स्थैर्यं न याति अर्थात् न विरमति अजस्रं चलति। चलन्तु, किञ्चित् नगरं गत्वा पश्यामः यत् तत्र जनाः किं कार्यं कुर्वन्ति। किं ते वृत्तिं कुर्वन्ति अथवा ते स्वव्यवसाये संलग्नाः सन्ति? ते स्वकीयं जीवनं कथं निर्वहन्ति? किम् आजीविकायाः अर्जनस्य च अवसराः सर्वेषां कृते समान-रूपेण लभन्ते ?



- एतस्मिन् चित्रे भवन्तः किं पश्यन्ति?
- भवन्तः पूर्वमेव ग्रामीण-क्षेत्र-निवासि-जनानां कार्याणां विषये पठितवन्तः।
- अधुना गतपाठे प्रदत्तग्रामीणक्षेत्रस्य कार्याणां चित्रेण अस्य चित्रस्य तोलनां कुर्वन्तु।
- नगरस्य एकः भागः अपरभागात् पृथक् भवति। भवद्भिः उपरितने चित्रे काः भिन्नताः दृष्टाः?

राजमार्गेषु कार्यम्

इदं तत् नगरम् अस्ति यस्मिन् मम मातृस्वसुः पुत्री निवसति। अहं कदाचित् एव अत्र आगच्छमि। इदं विशालं नगरम् अस्ति। एकदा यदा अहम् अत्र आगतवती तदा मम मातृस्वसुः पुत्री मां पर्यटयितुं नीतवती आसीत्। वयं प्रातःकाले एव गृहात् प्रस्थितवन्तः आस्म। यदा वयं मुख्यराजमार्गं प्रति भ्रमितवन्तः तदा वयं तत्र दृष्टवन्तः यत् तत्र

बहुजनानाम् आवागमनम् आसीत्। शाकविक्रेत्री स्वापणे रक्ताङ्ग-गृञ्जनक-कर्कट्यादीनां सम्यक्प्रकारेण स्थापनं करोति स्म तस्मिन् कार्ये सा सम्पूर्णतया व्यस्ता आसीत् सा तानि शाकानि तथा स्थापयति स्म यत् यथा जनाः तानि प्रति आकर्षिताः भवेयुः अपि च जनाः तानि द्रष्टुं पारयेयुः यत् तस्याः पार्श्वे विक्रेतुं किं किम् अस्ति। तस्याः नातिदूरे पदातिमार्गे काचित् पुष्पविक्रेत्री उपविष्टा आसीत्। सा सुन्दराणि बहुवर्णानि विविधप्रकारकाणि च पुष्पाणि विक्रीणीते स्म। वयं तस्याः समीपात् रक्तं पीतं च पाटलपुष्पं क्रीतवन्तः।

राजमार्गस्य अपरस्मिन् पदातिमार्गे कश्चित् समाचारपत्राणि विक्रीणीते स्म अपि च सः परितः जनैः आवृत्तः आसीत्। प्रत्येकं जनः समाचारपत्रं पिपठिषति स्म। ततः उच्चैः शब्दायमानानि बसयानानि गच्छन्ति स्म।

आटोरिक्शावाहनानि विद्यालयीयैः बालकैः पूर्णानि आसन्। पार्श्वस्थस्य वृक्षम् अधः कश्चित् चर्मकारः स्वलौहमञ्जूषातः स्वकीयानि वस्तूनि निष्कासयति स्म। तत्र एव राजमार्गस्य तीरे नापितः स्वकार्यस्य प्रारम्भं कृतवान् आसीत् तस्य पार्श्वे कश्चित् ग्राहकः पूर्वतः एव आसीत् यः प्रातः काले एव श्मश्रुकर्तनम् इच्छति स्म। तत्रैव नातिदूरे काचित् महिला शकटे प्लास्टिककूपीः पुटकानि केशप्रसाधनानि संदंशिकाः च नयति स्म। तत्र च कश्चित् अपरः जनः गृहं गृहं प्रति विक्रेतुं

बच्चूमांझी – कश्चित् त्रिचक्रिकाचालकः

अहं बिहारस्य कस्माच्चित् ग्रामात् आगतः अस्मि तत्र अहं मिस्त्री इत्यस्य कार्यं करोमि स्म। मम भार्या अपि च त्रयः शिशवः ग्रामे न निवसन्ति। अस्माकं पार्श्वे भूमिः नास्ति। ग्रामे यान्त्रिककर्म नैरन्तर्येण न लभते स्म। यत् अर्जनं भवति स्म तेन परिवारस्य भरणं सम्पूर्णतया न भवति स्म। यदा अहं नगरं प्राप्तवान् तदा अहम् एतत् पुरातन-त्रि-चक्रिका-यानं क्रीतवान् अपि च एतस्य धनं ऋणांशमाध्यमेन प्रत्यर्पितवान्। इयं पुरातनी वार्ता अस्ति।

प्रतिदिनं प्रातःकाले अहं बसस्थानकं प्राप्नोमि, ग्राहकः यत्र गन्तुम् इच्छति तत्र तं प्रापयामि। पुनः रात्रौ नववादनं यावत् त्रिचक्रिकायानं चालयामि। अहं नगरस्य एकस्मिन् निवास-स्थानकस्य पार्श्वे प्रायः षड्- किलोमीटर-परिमितं यावत् यानं चालयामि। गन्तव्यस्य अनुसारं ग्राहकः मह्यं पञ्च अथवा दशरुप्यकाणि यच्छन्ति। यदा स्वास्थ्यं समीचीनं न भवति तदा अहम् एतत् कार्यं न कर्तुं पारयामि। तेषु दिनेषु अर्जनं किञ्चित् अपि न भवति।

अहं स्वस्य मित्रैः सह भाटकप्रकोष्ठे निवसामि ते सर्वे पार्श्वस्थे उद्योगे कार्यं कुर्वन्ति। प्रतिदिनम् अशीतिरुप्यकाणि शतरुप्यकाणि वा अर्जयामि येषु पञ्चाशत् षष्टिः वा रुप्यकाणि भोजनस्य प्रकोष्ठभाटकस्य च उपरि व्ययीभवन्ति। अवशिष्टानि अहं परिवारस्य कृते संरक्षामि। वर्षे द्वित्रिवारम् अहं स्वपरिवारेण मेलितुं ग्रामं गच्छामि। यत् धनम् अहं परिवाराय प्रेषयामि परिवारः तेन एव जीवति। कदाचित् मम भार्या क्षेत्रेषु कार्यं कृत्वा किञ्चित् धनम् अर्जयति।

- बच्चूमांझी नगरं किमर्थम् आगतवान् आसीत्?
- बच्चूः स्वपरिवारेण सह किमर्थं न वसितुं शक्नोति?
- कयाचित् शाकविक्रेत्र्या सह अथवा शकटव्यापारिणा सह वार्तां कुर्वन्तु अपि च जानन्तु यत् ते स्वकार्यं कथं कुर्वन्ति- सज्जा-क्रय-विक्रयणादीनि।
- एकस्य दिनस्य अवकाशे गमनात् पूर्वम् अपि बच्चूमहोदयेन चिन्तनीयं भवति। किमर्थम्?

द्विचक्रिकया शाकानि नयति स्म।

वयं तस्मिन् स्थाने आगतवत्यः यत्र त्रिचक्रिकाचालकाः कस्याञ्चित् पङ्क्तौ स्थित्वा ग्राहकाणां प्रतीक्षां कुर्वन्ति स्म। अस्माभिः तेषु कश्चित् विपणिं गन्तुं कथितः। विपणिः इतः किलोमीटरद्वय-परिमित-दूरम् आसीत्।

बच्चूमांझीवत् एव नगरे बहवः जनाः राजमार्गेषु कार्यं कुर्वन्ति ते वस्तूनि विक्रीणन्ते तेषु वस्तुषु असमीचीनेषु सत्सु तानि समीचीनानि कुर्वन्ति अथवा काञ्चित् सेवां कुर्वन्ति। ते स्वाजीविकार्जने संलग्नाः सन्ति। तेषां कृते कश्चित् अपरः जनः वृत्तिं न यच्छति अतः ते स्वकार्यं स्वयम् एव कुर्वन्ति। एते स्वयमेव योजनाः निर्मान्ति यत् कियती सामग्री क्रेतव्या अपि च कुतः क्रेतव्या। तेषाम् चलापणाः भवन्ति। कदाचित् कदाचित् जीर्ण-शीर्ण-गुरुपत्रस्य पुटकेषु मञ्जूषासु च अपि कागदं विस्तीर्य आपणः जायते अथवा स्तम्भेषु प्लास्टिकप्रच्छर्दनपट्टम् (तिरपाल) आस्तीर्य आपणः जायते। ते तत् कार्यं पदातिमार्गे अपि कुर्वन्ति। कदाचित् आरक्षकाः तान् ततः अपसारयन्ति। तेषां पार्श्वे काचित् अपि सुरक्षा न भवति। कुत्रचित् एतादृशानि अपि स्थानानि सन्ति यत्र हस्तशकटापणिकाः न प्रवेष्टुं शक्नुवन्ति। हस्तशकटापणिकाः यानि वस्तूनि विक्रीणन्ते तानि वस्तूनि तेषां गृह्यजनाः निर्मान्ति। परिवारजनाः वस्तूनि क्रीत्वा तानि च स्वच्छीकृत्य चित्वा

प्रायः नगरेषु कार्यं कृत्वा आजीविकायाः अर्जयितारः कर्मकराः राजमार्गेषु एव वसितुं बाध्याः सन्ति चित्रे एतादृशं स्थानं दृश्यते यत्र कर्मकराः दिने एव स्ववस्तूनि स्थापयन्ति अपि च रात्रौ तत्रैव भोजनं पचन्ति।

विक्रयणार्थं सज्जीकुर्वन्ति। उदाहरणार्थं ये राजमार्गेषु भोजनम् अल्पाहारं वा पचन्ति तत् प्रायः आधिक्येन गृहे एव निर्मीयते। अहमदाबाद-नगरस्य एकस्मिन् सर्वेक्षणे ज्ञातं यत् कार्यकर्तृषु १२ प्रतिशतं जनाः राजमार्गेषु कार्यं कुर्वन्ति स्म।

अस्माकं देशस्य नगरीयक्षेत्रेषु प्रायः कोट्यधिकजनाः पदातिमार्गेषु हस्तशकटेषु च वस्तूनि विक्रीणन्ते। अधुना यावत् अस्माकं देशे वीथिषु पदातिमार्गेषु च ये जनाः वस्तूनि विक्रीणन्ति ते यातायातस्य कृते पदादिजनानां कृते च बाधाः जनयन्ति इति दृश्यते स्म। परन्तु बहूनां संस्थानां प्रयासेन अधुना एते उपयोगिनः सन्ति अपि च एते अपि आजीविकार्जनस्य अधिकारं धारयन्ति इति दृष्ट्या दृश्यन्ते। सर्वकारः अपि तस्य अधिनियमस्य परिवर्तनम् इच्छति येन एतेषाम् उपरि प्रतिबन्धः आसीत्। अधिनियमे परिवर्तिते सति तेषां पार्श्वे अपि कार्यं कर्तुं स्थानं भविष्यति अपि च यातायातस्य जनानां च अवगमनं सहजरूपेण भविष्यति। एतादृशः परमर्शः अस्ति यत् नगरेषु पदातिमार्गेषु च कानिचन स्थानानि एतेषां आपणिकानां कृते निर्धारितानि भवेयुः। एतादृशः अपि परामर्शः अस्ति यत् तेषां कृते आवागमस्य मुक्तता स्यात् अपि च ते तासु समितिषु सम्मिलिताः भवेयुः या एतादृशेषु विषयेषु निर्णयान् स्वीकुर्वन्ति।

विपण्याम्

यदा विपणिं प्राप्तवन्तः तदा आपणाः उद्घटन्ति स्म। परन्तु उत्सवस्य कारणात् तत्र महान् जनसम्मर्दः जातः आसीत्। तत्र मिष्टान्न-क्रीडनक-पादरक्षा-पात्र-वैद्युतीयवस्त्वादीनाम् आपणाः पङ्क्तिबद्धाः आसन्। एकस्मिन् कोणे दन्तचिकित्सकस्य चिकित्सालयः आसीत्। मम मातृस्वसुः पुत्र्या पूर्वमेव तस्मात् समयः निर्धारितः आसीत्। वयं तत्र पूर्वमेव प्राप्तवन्तः यतः अस्माकं क्रमः परिभ्रष्टः न स्यात्। अस्माभिः किञ्चित्कालं यावत् प्रकोष्ठे प्रतीक्षा करणीया अभवत्। चिकित्सकाः तस्याः दन्तानां परीक्षणं कृतवन्तः अपि च दन्तच्छिद्रस्य पूर्त्यर्थम् अग्रिमे दिने आगन्तुं कथितवान्। सा बहुभयभीता आसीत् यत् एकतः तु मम स्वदन्तः नष्टः अपरतः महती वेदना सोढ्व्या भविष्यति।

चिकित्सकस्य पश्चात् वयं पूर्ववयितवस्त्रापणं गतवन्तः यतोहि अहं कानिचन निर्मितपूर्ववस्त्राणि (रेडीमेड) क्रेतुम् इच्छामि स्म । एतस्य महापणस्य तलत्रयम् आसीत् अपि च प्रत्येकस्मिन् तले विभिन्नानि विभिन्नानि वस्त्राणि आसन्। वयं तृतीयं तलं गतवन्तः यत्र बालिकानां वस्त्राणि स्थापितानि आसन् ।

महापणे

हरप्रीतः *- पूर्वं मम पिता पितृव्यः च लघ्वापणे कार्यं कुर्वन्ति स्म। रविवासरे उत्सवकाले च अहं मम माता च तयोः साहाय्यं कुर्वः स्म। अहं महाविद्यालयीयम् अध्ययनं समाप्य तत्र कार्यं कर्तुम् आरब्धवती। अधुना मम पत्नी वन्दना अहं च अमूम् महापणं सञ्चालयामः।*

वन्दना- *अस्माभिः केभ्यश्चित् वर्षेभ्यः पूर्वम् अयं महापणः उद्घाटितः। अहं काचित् वस्त्रालङ्कारिका अस्मि। अहं विभिन्न-प्रचलनस्य वस्त्रनिर्माणस्य अध्ययनं कृतवती। परन्तु अद्यत्वे जनाः वस्त्रवयनस्य स्थाने पूर्ववयितवस्त्राणि क्रेतुं रुचिं नयन्ति अतः मम ध्यानम् एतस्मिन् विषये आधिक्येन भवति यत् कथमेतानि पूर्वनिर्मितवस्त्राणि (रेडीमेड)आकर्षकाणि भवेयुः तथा च तानि स्थापनस्य प्रयासः क्रियते।*

वयं स्वस्य महापणस्य कृते पृथक्-पृथक्स्थानेभ्यः वस्तूनि क्रीणीमः।अधिकतराणि वस्तूनि मुम्बई-लुधियानाहमदाबाद-त्रिपुराभ्यः च आयान्ति। कानिचन वस्तूनि देहल्याः पार्श्वस्थेभ्यः नगरेभ्यः यथा गुरुग्रामतः नोएडातः च आयाति। कानिचन वस्त्राणि वयं विदेशात् अपि आनयामः। एतम् महापणं सम्यक् प्रकारेण सञ्चालयितुम् अस्माभिः बहुकिमपि करणीयं भवति। वयं पृथक्-पृथक्समाचार-पत्रेषु चिलचित्र-गृहेषु दूरदर्शने आकाशवाण्यां च विज्ञापनानि यच्छामः। इदानीं यावत् तु एषः महापणः भाटकस्य उपरि वर्तते परन्तु वयम् एतं शीघ्रमेव क्रेष्यामः। यदारभ्य इयं विपणिः पार्श्वस्थानां जनानां कृते मुख्यापणः जातः अस्ति तदाराभ्य अस्माकं व्यापारः समीचीनतया चलति व्यापारः च अस्माकं वर्धितः अस्ति। अस्माभिः किञ्चित् कारयानं क्रीतम् अस्ति अपि च पार्श्वस्थपरिषदि किञ्चित् भवनम् अपि क्रीतम् अस्ति।

- वन्दनाहरप्रीते कञ्चित् महान्तम् आपणं किमर्थं प्रारब्धवत्यौ? ताभ्यां एतस्यापणस्य सञ्चालनार्थं किं किं करणीयं भवति?
- केनचित् महतः आपणस्य स्वामिना सह वार्तां कुर्वन्तु जानन्तु च ते स्वकार्यस्य योजनां कथं कुर्वन्ति? किं विगतविंशतिभ्यः वर्षेभ्यः तेषां कार्ये किञ्चित् परिवर्तनं जातम् अस्ति?
- ये आपणेषु वस्तूनि विक्रीणन्ति अपि च ये राजमार्गेषु वस्तूनि विक्रीणन्ति तेषां मध्ये का पृथक्ता वर्तते?

हरप्रीतवन्दनयोः इव बहवः जनाः सन्ति येषां पार्श्वे नगस्य विपणिषु स्वापणाः सन्ति। एते आपणाः केचन लघवः केचन च विशालाः सन्ति अपि च जनाः तत्र पृथक्-पृथक्वस्तूनि क्रीणन्ति। अधिकतराः व्यापारिणः स्वापणस्य सञ्चालनं स्वयं कुर्वन्ति ते कस्यचित् अन्यस्य पार्श्वे कार्यं न कुर्वन्ति। परन्तु ते स्वयं अनेकान् जनान् सहायकरूपेण प्रबन्धकरूपेण च वृत्तौ नियोजयन्ति

एते स्थाय्यापणाः भवन्ति येषां पार्श्वे व्यापारं कर्तुं नगरनिगमस्य पक्षतः प्रमाणपत्रं भवति। नगरनिगमः सुनिश्चिनोति यत् सप्ताहे कस्मिन् दिने विपण्याम् अवकाशः भवेत्। उदाहरणार्थम् एतस्यां विपण्याम् आपणाः बुधवासरे पिहिताः भवन्ति। एतस्यां विपण्यां लघुकार्यालयाः अन्ये आपणाः अपि सन्ति ये वित्तकोश-कूरियरादिकानां सौविध्यानि यच्छन्ति।

उद्योगे

अहं स्वस्य एकस्मिन् वस्त्रे प्रान्तभागालङ्करणं कारयितुम् इच्छामि स्म यत् मया कस्मिंश्चित् विशिष्टे अवसरे धरणीयम् आसीत्। मम भगिनी उक्तवती यत् सा निर्मलां जानाति या कस्मिंश्चित् वस्त्रोद्योगे वस्त्रसीवनस्य कार्यं करोति। निर्मलायाः प्रतिवेशिनः सौवर्ण-कार्मिक-वस्त्रस्य अथवा ताशाख्यवस्त्रस्य कार्यं कुर्वन्ति। अस्माभिः लोकयानेन उद्योगं प्रति प्रस्थितम्। बसयाने महान् जन-सम्मर्दः आसीत्। प्रत्येकस्मिन् बसस्थानके यात्रिणः यानम् आरोहन्ति स्म अपि च कश्चित् अपि च अवतरति स्म। स्वस्थानं कल्पयितुं जनाः परस्परं धक्काम् अथवा बलप्रयोगं कुर्वन्ति स्म। मम भगिन्या अहम् एकस्मिन् कोणे स्थापिता यतः सम्मर्देन अस्माकं पीडनं न स्यात्। मम आश्चर्यं भवति स्म यत् जनाः प्रतिदिनं कथं यात्रां कुर्वन्ति। यदा आवां तस्योद्योगगृहस्य समीपे प्राप्तवन्तः तदा जनाः अवतरणं प्रारब्धवन्तः। आवाम् अपि एकस्मिन् वक्रस्थाने अवतीर्णवत्यौ। आह! अधुना प्राणेषु नवीनता आगता।

वक्रमार्गे बहवः जनाः समूहेषु मार्गस्य प्रान्तभागे उपविष्टाः आसन्। केचन स्थिताः आसन् तान् दृष्ट्वा अनुभूयते स्म यत् ते कस्यचित् प्रतीक्षां कुर्वन्ति स्म अपि च मूल्यम् अधिकृत्य चर्चां कुर्वन्ति स्म। मम भगिन्या अहं बोधिता यत् एषः श्रमिकचतुष्पथः अस्ति। एते दैनन्दिन-श्रमकर्तारः श्रमिकाः मिस्त्रीजनाः च सन्ति। केचन यत्र भवनानि निर्मीयन्ते तत्र कार्यं कुर्वन्ति अपि च केचन भारवाहकाः सन्ति अपि च ट्रकयानेभ्यः वस्तूनि अवतारयन्ति। केचन जनाः दूरभाषतन्त्र्याः विस्ताराय भूमेः खननं कुर्वन्ति केचन च जल-

श्रमिकचतुष्पथे दैनन्दिनश्रमिकाः स्वोपकरणैः सह उपविश्य जनानां प्रतीक्षां कुर्वन्ति। जनाः कार्यं कारयितुम् तान् इतः एव कार्यार्थं नयन्ति।

नलिकायाः कृते खननं कुर्वन्ति परन्तु एते सर्वदा कार्यं न प्राप्नुवन्ति। एतादृशाः अनियमित-श्रमिकाः नगरे सन्ति।

वयम् उद्योगगृहं प्रविष्टवन्तः तदा अस्माभिः दृष्टं यत् तत्र पृथक्-पृथक्-कार्याय पृथक्-पृथक्-विभागाः आसन्। तत्र इत्थम् अनुभूयते स्म यत् एतेषां जनानां याः पङ्क्तयः सन्ति ताः कदाचित् अपि समाप्तिं न गमिष्यन्ति। यत्र वस्त्रसीवनं जायते स्म तस्मिन् विभागे अस्माभिः दृष्टं यत् जनाः लघुप्रकोष्ठे यन्त्रैः कार्यं कुर्वन्ति स्म। प्रत्येकं जनस्य पार्श्वे एकं एकं सीवनयन्त्रम् आसीत् यत्र सः कार्यं करोति स्म अपि च प्रत्येकस्मिन् प्रकोष्ठे एतादृशानि बहूनि यन्त्राणि आसन्। यानि वस्त्राणि सिद्धानि भवन्ति स्म तानि प्रकोष्ठे एकस्मिन् कोणे समीकृत्य स्थाप्यन्ते स्म।

यदा वयं निर्मलां दृष्टवन्तः तदा सा अपि तादृशे स्थाने एव उपविष्टा आसीत् सा मम भगिन्या सह मिलित्वा बहुप्रसन्ना जाता अपि च सा वचनम् दत्तवती यत् सा मम वस्त्रेषु सौवर्णकर्म कारयिष्यति। निर्मला वस्त्रनिर्यातके एकस्मिन् वस्त्रोद्योगे सौचिक-कार्यं करोति। यस्मिन् वस्त्रोद्योगगृहे सा कार्यं करोति तत्र अमेरिका-इंग्लैण्ड-जर्मनी-नीदरलैंड-सदृश-देशवासिनां कृते घर्मकाल-परिधानियानि सीव्यन्ते दिसम्बर-मासतः अप्रैलमासं यावत् निर्मलायाः पार्श्वे अधिककार्यभारः भवति। प्रायः सा प्रातः नववादने कार्यम् आरभते अपि च रात्रौ १०वादनं यावत् कार्यं समापयति। कदाचित् इतोऽपि विलम्बः भवति। सा सप्ताहे षड्दिनानि यावत् कार्यं करोति। यदा कार्यं शीघ्रं सम्पादनीयं भवति तदा तया रविवासरे अपि कार्यार्थं गन्तव्यं भवति। प्रतिदिनं अष्टौ होराः यावत् कार्यं करोति तथा च तस्याः दैनन्दिनपारिश्रमिकः अशीतिः रुप्यकाणि सन्ति। अपि च अधिककालं यावत् यदा सा कार्यं करोति तदर्थं तस्यै चत्वारिंशत् रुप्यकाणि इतोऽपि प्राप्यन्ते। जूनमासं यावत् कार्यं समाप्तं भवति तदा उद्योगगृहस्वामिनः सौचिकसङ्ख्यां न्यूनीकुर्वन्ति। निर्मला अपि तदा कार्यविहीना भविष्यति। प्रतिवर्षं तस्याः पार्श्वे मासत्रयचतुष्टयं वा कार्यं न भवति।

- किं भवन्तः अनुभवन्ति यत् उद्योगगृहानि अथवा लघूद्योगगृहाणि श्रमिकेभ्यः नियमितरूपेण सेवाकार्यं किमर्थं न यच्छन्ति?
- निर्मला-सदृशानां श्रमिकाणां कार्यकरणस्य परिस्थितीनां निम्नाधारेण विवरणं यच्छन्तु- कार्यहोराः,अर्जनम्,कार्यकरणस्य स्थानं सौविध्यानि च, आवर्षं सेवादिनानां सङ्ख्या।
- किं भवन्तः इत्थं मंस्यन्ते यत् अपेरेषां गृहेषु कार्यकर्त्र्यः महिलाः अपि अनियमित-श्रमिकाणां कोट्यां समायान्ति, किमर्थम्? कस्याश्चित् एतादृश्याः महिलायाः आदिनं कार्यस्य विवरणं यच्छन्तु।

निर्मलायाः इव अधिकतराः कर्मकराः अनियमितरूपेण कार्ये संलग्नाः सन्ति। अभिप्रायः अयम् अस्ति यत् यदा स्वामी आवश्यकताम् अनुभवति तदा तान् कार्यार्थम् आह्वयति। ते श्रमिकाः तदा कार्यं प्राप्नुवन्ति यदा तेषां स्वामिनः पार्श्वे आधिक्येन कार्यं लभते अथवा विशिष्टर्तुषु कार्यं लभते। वर्षस्य अवशिष्टकाले तैः अन्यत् कार्यम् अन्वेष्टव्यं भवति। निर्मला यादृशीं सेवां करोति सा स्थायिनी न भवति। यदा कर्मचारिणः स्ववेतनस्य विषये अथवा परिस्थितिविषये आपत्तिं अथवा दूषणं कुर्वन्ति तदा ते कार्यतः निष्कास्यन्ते। सेवायाः कश्चित्प्रतिबन्धः न भवति न च सेवा सर्वकालाय सुरक्षिता भवति। यदि कश्चित् दुर्व्यवहारं कुर्यात् तर्हि तस्य रक्षार्थं कश्चित् अपि न भवति श्रमिकात् अपेक्षा क्रियते यत् सः चिरकालं यावत् प्रतिदिनं कार्यं कुर्यात् । उदाहरणार्थं वैद्युतीय-वयनचक्र-वस्त्रोद्योगगृहे अर्थात् पावर-लूमवस्त्रोद्योगगृहे श्रमिकाः अहोरात्र-क्रमेषु द्वादशहोराः यावत् कार्यं कुर्वन्ति। यदि ते अष्टौ होराभ्यः अधिकं कार्यं कुर्वन्ति तर्हि तेभ्यः तस्य समयस्य पारिश्रमिकं पृथक्तया न दीयते।

कार्यालये

मम मातृस्वसा सुधा विपणनप्रबन्धिका अस्ति। सा अस्मान् उक्तवती आसीत् यत् भवन्तः सांयकाले पञ्चवादनात् पूर्वं कार्यालयं प्राप्नुवन्तु। अस्माभिः चिन्तितं यत् विलम्बः न स्यात् अतः अस्माभिः त्रिचक्रिकायानेन आगतम् येन वयं यथाकालं प्राप्तवन्तः। तस्याः कार्यालयः एतादृशे स्थाने आसीत् यत्र परितः महान्ति भवनानि आसन्। तेभ्यः सहस्राधिकाः जनाः बहिः आगच्छन्ति स्म। केचन कारस्थानकं प्रति गच्छन्ति स्म अपि च केचन लोकयानानां याः पङ्क्तयः आसन् ताः प्रति गच्छन्ति स्म।

मातृस्वसा कस्मिंश्चित् सुपिष्टकोत्पादकोद्योग-गृहे प्रन्बन्धिकायाः कार्यं करोति। सुपिष्टकानि नगरात् बहिः कस्मिंश्चित् उद्योगगृहे निर्मीयन्ते। मातृस्वसा पञ्चाशत् विक्रेतृणां कार्यस्य निरीक्षणं करोति ये नगरस्य विभिन्नेषु भागेषु आवागमनं कुर्वन्ति। एते जनाः आपणिकेभ्यः वस्तूनां महतः आदेशान् स्वीकुर्वन्ति अपि च तेभ्यः धनस्य सङ्ग्रहणं कुर्वन्ति।

कार्यं सुव्यवस्थितरूपेण भवेत् तदर्थं मातृस्वस्रा नगरं षड् भागेषु विभक्तम् अस्ति अपि च सा प्रतिसप्ताहं कस्यचिद्भागस्य विक्रेतृभिः मेलनं करोति। सा तेषां प्रगतिपत्रं पश्यति अपि च तेषां समस्यानाम् उपरि चर्चां करोति। तया सम्पूर्णे नगरे विक्रयणस्य योजना करणीया भवति तथा च प्रायः

महानगरेषु काल-केन्द्रेषु कार्यम् आजीविकायाः कश्चित् नूतनं क्षेत्रम् अस्ति। उपभोक्तारः दूरदर्शन-शीतकयन्त्र-सदृशानि वस्तूनि क्रीणन्ति, एतासां सेवानां कृते अपि च वित्तकोश-सम्बद्ध-कार्याय दूरभाष-सदृश-सेवानां उपयोगं कुर्वन्ति। काल-केन्द्रं किञ्चित् केन्द्रीकृतकार्यालयः अस्ति यत्र एकस्मात् स्थानात् एव उपभोक्तृणां समस्या-सम्बद्ध-प्रश्नानां विषये सूचनाः दीयन्ते। कालकेन्द्राणि प्रायः दीर्घ-सभागार-सदृश-प्रकोष्ठेषु सञ्चाल्यन्ते। तत्र पृथक्-पृथक्-कोष्ठकानि निर्मितानि भवन्ति। तत्र सङ्गणक-यन्त्राणि दूरभाषाः श्रवण-साधनानि ध्वनि-विस्तारकाः च भवन्ति ।

भारतम् एतस्मिन् क्षेत्रे कश्चित् महत्वपूर्णं केन्द्रं जातम् अस्ति। यत्र न केवलं भारतीयाः व्यवसायिक-समूहाः अपितु वैदेशिक-व्यवसायि-समूहाः अपि स्वकाल-केन्द्रम् उद्घाटयन्ति। विदेशि-व्यवसायि-समूहानाम् आकर्षणस्य कारणम् इदम् अस्ति यत् अत्र आङ्गलसम्भाषण-शीलाः जनाः सरलतया अल्पवैतनिकाः च लभन्ते।

चिररात्रिं यावत् कार्यं करणीयं भवति । तया कार्यसम्बद्धाः यात्राः अपि करणीयाः भवन्ति। मातृस्वसा नियमितवेतनं प्राप्नोति अपि च सा सुपिष्टकोत्पादकस्य उद्योगगृहस्य स्थायी-कर्मचारिणी अस्ति। सा इमाम् आशां धारयितुं शक्नोति यत् तस्याः सेवाकालः चिरकालं यावत् चलिष्यति। स्थायी-कर्मचारित्वात् सा निम्नलिखितान् लाभान् अपि प्राप्नोति –

वार्धक्यस्य कृते सुरक्षित-निधिः - तस्याः वेतनस्य कश्चित् भागः भविष्यनिधौ सर्वकारस्य पार्श्वे स्थाप्यते। एतस्मिन् अवशिष्टधने व्याजः अपि बार्धुष्यम् अथवा वृद्धिः अपि लभते। सेवानिवृत्ति-काले एतत् धनं लभते।

अवकाशाः – रविवासरस्य अन्यराष्ट्रियपर्वणां च अवकाशः लभते। अपि च सा वार्षिकावकाश-रूपेण अपि काचिचन दिनानि लभन्ते।

परिवारजनानां कृते चिकित्सा-सौविध्यानि – व्यवसायिसमूहाः कस्याञ्चित् सीम्नि आभ्यन्तरे कर्मचारिणां तेषां परिवारजनानां च चिकित्सा-व्यय-भारम् अपि उत्थापयति। यदि कर्मचारिणः

स्वास्थ्यम् असमीचीनं भवेत् तर्हि कर्मचारिणे रोगकाले अवकाशः दीयते।

नगरे एतादृशाः अनेके कर्मचारिणः भवन्ति ये कार्यालयेषु उद्योगगृहेषु सर्वकारीयविभागेषु च कार्यं कुर्वन्ति यत्र ते नियमित-स्थायि-कर्मचारिणा सदृशाम् आजीविकां प्राप्नुवन्ति। ते निरन्तरं तस्मिन् एव कार्यालये उद्योगगृहे वा कार्यं कर्तुं गच्छन्ति। तेषां कार्यम् अपि निश्चितं भवति। ते प्रतिमासं वेतनं प्राप्नुवन्ति यदि उद्योगगृहे कार्यं न्यूनं भवेत् तर्हि अपि ते अनियमित-श्रमिकवत् कार्यतः न बहिष्क्रियन्ते।

दिनस्य अन्तिमः भागः समाप्तः अपि च वयं मातृस्वसुः कारयाने श्रान्ताः इव उपविष्टवन्तः। परन्तु अद्य महान् आनन्दः सञ्जातः। मया चिन्तितं यत् एतत् कियत् शोभनम् अस्ति यत् नगरे एतावन्तः जनाः सदृशं कार्यं कुर्वन्ति। ते कदाचित् परस्परं मिलन्ति अपि न, परन्तु तेषां कार्यं तान् बध्नाति अपि च नगरीय-जीवनं स्थिरं करोति।

अभ्यासः

१. अधः श्रमिकचतुष्पथे आगम्यमानानां श्रमिकाणां जीवनस्य विवरणं प्रदत्तम् अस्ति। एतत् पठन्तु अपि च परस्परं चर्चां कुर्वन्तु यत् श्रमिक-चतुष्पथे आगम्यमानानां श्रमिकाणां जीवनस्य का स्थितिः अस्ति?

श्रमिकचतुष्पथे ये श्रमिकाः निवसन्ति तेषु अधिकतराः स्ववासस्य स्थायिव्यवस्थां न कर्तुं पारयन्ति अतः ते चतुष्पथस्य पार्श्वे पदातिमार्गे स्वपन्ति अथवा पार्श्वस्थे विश्रामगृहे निवसन्ति। एतस्य सञ्चालनं नगरनिगमः करोति अपि च एतस्मिन् षड् रुप्यकाणि दिनस्य प्रतिविष्टरं लगन्ति। वस्तुसुरक्षायाः प्रबन्धः न भवति अतः ते तानि चायापणिकानां पार्श्वे स्थापयन्ति मन्ये ते एव तेषां वित्तकोशाः सन्ति ते आपणिकेभ्यः ऋणम् अपि स्वीकुर्वन्ति। ते स्वोपकरणानि रात्रौ तेषां पार्श्वे सुरक्षादृष्टया परित्यजन्ति। आपणिकाः श्रमिकाणां वस्तूनां सुरक्षया सार्धम् आवश्यकतायां सत्यां तेभ्यः ऋणम् अपि यच्छन्ति।

स्रोतः हिन्दू-आन-लाइन,अमनसेठी

२. निम्नलिखितां तालिकां पूरयन्तु अपि च तेषां कार्यं केन प्रकारेण पृथक् अस्ति एतस्य वर्णनं कुर्वन्तु

नामानि	कार्यस्थलम्	आयः	कार्यसुरक्षा	सौविध्यानि	स्वकार्यम् अथवा आजीविका

बच्चू-मांझी		१००रुप्यकाणि प्रतिदिनम्			
हरप्रीतः वन्दना च					स्वकार्यम्
निर्मला			कापि सुरक्षा नास्ति		
सुधा	व्यवसायिसमूहः	३०,०००रुप्यकाणि प्रतिमासम्			

३. काचित् स्थायिनियमितसेवा अनियमित-कार्यतः कथं पृथक् अस्ति?
४. सुधा वेतनम् अतिरिच्य अन्यान् कान् लाभान् प्राप्नोति?
५. अधोलिखित-तालिकायां परिचित-विपणीनाम् आपणानाम् अथवा कार्यालयानां नामानि पूरयन्तु यत् ते कानि वस्तूनि अथवा सेवाः उपलम्भयन्ति?

आपणानाम् अथवा कार्यालयानां नामानि	**वस्तूनां सेवानां च प्रकाराः**

इति नवमोऽध्यायः

सन्दर्भः

अध्यायः १

पाउली-सेनगुप्ता,१९९७,द-लाइटस-चेंजड, जी. हरिहर-एंड-एस. फ्यूटहैली(सं.) सॉरी-बेस्ट-फ्रेंड, तूलिका-बुक्स,चेन्नई,रिप्रिंट २००१,२००४।

अध्यायः २

शीलाधीरः,२००४-२००५,व्हाई आर यू अफ्रेड टू होल्ड माई हैंड, तूलिकाबुक्स।

वंसत-मून(सं.), डा.बी.आर.अम्बेडकर, राइटिंग एंड स्पीचेज, खंड १२,बंबई-शिक्षा-विभागः, महाराष्ट्रसर्वकारः।

अध्यायः ३

आर.के.लक्ष्मणः,२००२,दि कामन मैन गोज टू दि विलेज,दि बेस्ट आफ लक्ष्मणः,पेंग्विनः,देहली।

आर.के.लक्ष्मणः,२००५,दि कामन मैन कास्ट हिज वोट,दि बेस्ट आफ लक्ष्मणः, पेंग्विनः, देहली।

अध्यायः ६

अंजलि मांटेरियो, रिफ्लेक्शन्स आन माई फैमिली, टाटा इंस्टीटयूट् आफ सोशल सांइसेज, मुम्बई।

अध्यायः ९

जान ब्रीमेन पार्थिवशाहः च, २००५,वर्किंग इन दि मिल नो मोर, आक्सफोर्ड यूनिवर्सिटीप्रेस, देहली।

सूचनायाः अधिकारः Right to information (R T I)

सूचनायाः अधिकारः

सूचनायाः अधिकार-अधिनियमस्य मूलम् उद्देश्यं नागराणां सशक्तिकरणम् अस्ति , सर्वकारस्य क्रिया-कलापेषु पारदर्शितायाः उत्तरदायित्वस्य च वर्धनम्, भ्रष्टाचारस्य वारणम्, लोकतन्त्रं जनसेवायै कृतसङ्कल्पं कर्तुं सज्जीकरणम् । भवन्तः सूचनायाः अधिकारस्य उपयोगं कृत्वा सर्वकारस्य विविधानां क्रिया-कलापानां विषये आवश्यकीं सूचनां प्राप्तुं शक्नुवन्ति ।

सूचनाधिकार-अधिनियमस्य प्रयोग-विधिः

आवेदनं सामान्य-पृष्ठे कर्तुं शक्यते । भवन्तः एतत् आवेदनं शुल्क-सहितं सम्बन्धितस्य विभागस्य सूचनाधिकारिणं (PIO) प्रेषयन्तु । एतत् आवेदनं भवन्तः पत्रालयस्य माध्यमेन अपि प्रेषयितुं शक्नुवन्ति ।

आवेदन-शुल्कम्

केन्द्र-सर्वकारस्य विभागैः सम्बन्धित-विषयेषु भवद्भिः १० रुप्यकानि आवेदन-शुल्क-रूपेण देयानि भविष्यन्ति । तत् शुल्कं प्रस्तुतधन-माध्यमेन धनादेश-माध्यमेन पत्रादेश-माध्यमेन (पोस्टल-ऑर्डर) अथवा वित्तकोशीय-देयादेश-माध्यमेन अपि दातुं शक्यते । राज्यसर्वकारस्य विभागानां कृते एतत् शुल्कं पृथक् अस्ति ।

आर.टी.आई.सम्बन्धिने अधिकाय ज्ञानाय प्रवेशं कुर्वन्तु www.cic.gov.in,www.rti.gov.in



0659

राष्ट्रिय-शैक्षिकानुसन्धान-प्रशिक्षण-परिषद्
NATIONAL COUNCIL OF EDUCATIONL RESEARCH AND TRAINING

ISBN 81-7450-519-